THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY

OU_184431

UNIVERSAL
LIBRARY

SA91.25 P.G. 52316
P29V

पतञ्जलिमुनि

व्याकरणमहाभाष्यम्

द्वि भाग। 1938

OUP—43—30-1-71—5,000

OSMANIA UNIVERSITY LIBRARY

Call No. S491.25 P29V Accession No. S2376

Author पतञ्जलिमुनि

Title व्याकरणमहाभाष्यम् द्वि भाग.

This book should be returned on or before the date last marked below.

1938

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १०८

श्रीभगवत्पतञ्जलिविरचितं

व्याकरणमहाभाष्यम् ।

(तत्राङ्गाधिकारः) ।

नागोजीभट्टविरचितोद्द्योतसमलंकृतकैयटोपाध्यायकृत-

प्रदीपसमुद्भासितम् ।

सप्तमाध्यायगतद्वितीयपादस्थद्वितीयाह्निकमारभ्य सप्तमाध्यायान्तो

द्वितीयो भागः ।

एतत्पुस्तकं

वे० शा० सं० रा० शंकरशास्त्री मारुलकर

इत्येतैः संशोधितम् ।

तच्च

बी. ए. इत्युपपदधारिभिः

विनायक गणेश आपटे

इत्येतैः

पुण्याख्यपत्तने

श्रीमन् ' महादेव चिमणाजी आपटे ' इत्यभिधेय-

महाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८६० ।

खिस्ताब्दाः १९३८ ।

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ।

मूल्यं सार्धो रूपकः (१॰८) ।

श्रीभगवत्पतञ्जलिविरचितं

व्याकरणमहाभाष्यम् ।

(तत्राङ्गनाधिकारः) ।

द्वितीयो भागः ।

स्नुक्रमोरनात्मनेपदनिमित्ते ॥ ७ । २ । ३६ ॥

स्नुक्रमोरनात्मनेपदनिमित्ते चेत्क्त्युपसंख्यानम् ॥ १ ॥

स्नुक्रमोरनात्मनेपदनिमित्ते चेत्क्त्युपसंख्यानं कर्तव्यम् । प्रस्नविता प्रस्नवितुम् प्रस्नवितव्यम् । प्रक्रमिता प्रक्रमितुम् प्रक्रमितव्यम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अविशेषेण स्नुक्रमोरिडागममुक्त्वाऽऽत्मनेपदपरे नेति वक्ष्यामि ।

प्र०— स्नुक्रमोरनात्मनेपदनिमित्ते । स्नुक्रमोरुदात्तत्वादिटि सिद्धे नियमार्थं वचनम् । अनात्मनेपदनिमित्तत्व एवेड्यथा स्यात् । आत्मनेपदनिमित्तत्वे मा भूत् । किति सनि च प्रस्नुतः प्रसुस्नूषतीति क्रमेश्च निष्ठायां क्रान्त इति श्नुक्युकः किति सनि ग्रहगुहोश्च यस्य विभाषेति प्रतिषेध एव भवति । पुरस्तात्प्रतिषेधस्य ह्येतदेव प्रयोजनम् । इण्मात्रस्य प्रतिषेधो यथा स्यादिति । तेन प्रतिषेधबाधनार्थमेतन्न भवति । अथवाऽऽर्धधातुकस्येड्वलादेरित्यस्यानुवर्तनादयमर्थो भवति । यत्र पूर्वेणेड्विहितस्तत्रैवानेन भवति । पूर्वसूत्रेण च प्रतिषेधविषयपरिहारेणेड्विधानात्तत्रैवायं विधिः प्रवर्तमानो नियमाय संपद्यते । अथवाऽऽत्मनेपदनिमित्तत्वे न भवतीति प्रसज्यप्रतिषेध आश्रीयत इति किदादौ न दोषः । **प्रस्नवितेति** । य एवाऽऽत्मनेपदविषयः स्नौतिः स एवात्रापि योग्यताश्रयणेन निमित्तव्यवहारदर्शनादात्मनेपदनिमित्तं भवतीतीण्न प्राप्नोतीति वचनम् । कर्मकर्तृविषयश्चात्र स्नौतिरिति कर्मकर्तर्यात्मनेपददर्शनाद्भवति तद्योग्यः । एवं प्रस्नवितुं प्रस्नवितव्यामिति भावकर्मविषयत्वाद्भावकर्मणोरात्मनेपदोपलम्भादात्मनेपदनिमित्तं स्नौतिः । **प्रक्रमितेति** । आदिकर्मणोऽन्यत्र प्रशब्दो विज्ञेयः । आदिकर्मणि तु कर्तरि

उ०— स्नुक्रमो० । **आत्मनेपदेति** । प्रस्नोषीष्ट प्रक्रंसीष्टेत्यादौ । ननु कित्सनोः श्नुक्युक इत्यादिनिषेधे प्राप्ते विध्यर्थमेवेदं स्यादत आह—**किति सनि चेति**। श्नुक्युक इत्यादिबाधनार्थत्वं तु नास्येत्याह—**पुरस्तादिति** । निषेधाविषये पूर्वेण सिद्धत्वा निषेधविषये चास्याप्राप्तावस्याचरितार्थत्वादनेन विधिरेव स्यादत आह—**अथवेति** । अन्यथा निषेधबाधकतया विधित्वमेव स्यान्न नियमत्वं विधिनियमसंभवे विधेर्ज्यायस्त्वादिति भावः । **अनुवर्तमानादिति** । तदनुवृत्तिश्च विषयानिर्देशार्था । तत्फलितमाह—**यत्रेत्यादि** । अनुवृत्तावेवं व्याख्याने च गौरवादाह—**अथवेति। प्रसज्यप्रतिषेध इति**। एवं च प्रतिषेधार्थमेव सूत्रं न विध्यर्थं नापि नियमार्थमिति किदादौ न दोष इति भावः । एवं हि पूर्वसूत्रात्पूर्वमेव पठेदिति चिन्त्यम् । **योग्यताश्रयणेनेति** । न तु कुर्वद्रूपताश्रयणेनैवेत्यर्थः । कुसूलस्थेष्वपि बीजेष्वङ्कुरनिमित्तानीति व्यवहारात् । ननु कर्तरि तृचो विधानेन भावकर्मविषयत्वाभावात्कथमात्मनेपदयोग्यता स्नौतेरत आह—**कर्मकर्तृविषयश्चेति**। अत्र । प्रलवितेत्यत्र । भावेत्यादि । तुमुनतव्ययोर्भावादौ विधानादिति भावः । **आदिकर्मणि त्विति** । वार्तिके कर्तरीति कुतो विशेषणम् । आदि-

आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधः ॥ २ ॥

आत्मनेपदपरप्रतिषेधे च तत्परपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः । तत्परपरे तावत् । **प्रसुस्नूषिष्यते प्रचिक्रंसिष्यते*** । सीयुटि । **प्रस्नोषीष्ट प्रक्रंसीष्ट** । एकादेशे । **प्रस्नोष्यन्त प्रक्रंस्यन्त** । एकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति ।

प्र०—चाऽऽत्मनेपदविषयात्कृतीति प्रतिषेधेन भाव्यम् । प्रक्रमितुं प्रक्रमितव्यमिति । भावकर्मविषयत्वात्प्रारम्भविषयत्वाद्वाऽऽत्मनेपदनिमित्तत्वम् । **प्रसुस्नूषिष्यत इति** । आत्मनेपदपरः स्यस्तत्परः सन्निति स्येन व्यवधानात्सन इट्प्रतिषेधो न प्राप्नोति । ननु व्यवहितेऽपि परशब्दस्य वर्तनात्प्रतिषेधो भविष्यति । नैतदस्ति । आत्मनेपदपरे नेति न सूत्रन्यासः किं तर्ह्यर्थप्रदर्शनपरमेतत् । स्नुक्रमोर्नाऽऽत्मनेपद इति तु सूत्रन्यासः । तत्र तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्व्यवहितस्य प्रतिषेधाप्रसङ्गः । ननु च सनि ग्रहगुहोश्चेति प्रतिषेधो भविष्यति । न ह्ययमिड्विधिः पूर्वप्रतिषेधविषय इति प्रागेवोक्तम् । यदप्युक्तमविशेषेणेति तस्यायमर्थः—पूर्वसूत्रेण यः स्नुक्रमोरविशेषेणेडुक्तस्तमनूद्याऽऽत्मनेपदपरे प्रतिषेधो विधेयः । एवं तर्हि प्रचिक्रंसिष्यत इत्येतदेवात्रोदाहरणम् । स्नौतिस्तु साहचर्यादुदाहृतः । **प्रस्नोषीष्टेति** । आत्मनेपदमेवात्र सीयुडाद्यार्धधातुकं सीयुटस्तद्भक्तत्वं न त्वात्मनेपदपरत्वमिति प्रतिषेधाप्रसङ्गः । **प्रस्नोष्यन्त इति** । अत्रान्तरङ्गत्वान्नित्यत्वाच्च पूर्वमेकादेशेन भाव्यमिट्प्रतिषेधस्तु बहिरङ्गोऽनित्यश्च वार्णा-

---

उ०—कर्मणि प्रारम्भविषयत्वादात्मनेपदविषयत्वं बोध्यम् । नन्वादिकर्मणोऽन्यत्र प्रशब्देऽपि नेदमुदाहरणं युक्तम् । अनात्मनेपदनिमित्त एवेट् नाऽऽत्मनेपदनिमित्त इत्यर्थे ह्यात्मनेपदनिमित्तत्वादिडागमाप्राप्तौ कृत्युपसंख्यान कर्तव्यमिति प्रक्रान्तम । एवं चास्य कथमात्मनेपदनिमित्तत्वं वृत्त्याद्यादायाऽऽत्मनेपदनिमित्तत्वे तु वक्ष्यमाणवार्तिकेन निषेधो दुर्वार इति चेन्न । **दृष्टान्तार्थं** तत्सत्त्वात् । प्रक्रमितेतिवत प्रक्रमितुमित्यादीष्यते तन्न सिध्येदिति कृतीति वक्तव्यमित्याशयात । वस्तुतस्तदपरामर्शेनेदं भाष्यमिति बोध्यम् । **प्रारम्भविषयत्वाद्वेति** । तत्र हि प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदं कर्तृकृतोऽभावान्निषेधविषयाभाव इति बोध्यम् । **अविशेषेणेति** । स्नुक्रमोरात्मनेपदे परे नेति न्यासे तात्पर्यम् । तत्परपरेति वार्तिकस्याऽऽत्मनेपदं परमस्मात्तत्परं यस्य तस्य प्रतिषेधो वक्तव्य इत्यर्थः । तदाह—**आत्मनेपदपर इति** । **ननु चेति** । आत्मनेपदे परे नेति न्यासे परशब्दोपादानसामर्थ्येन तस्मिन्निति परिभाषानुपस्थानादिति भावः । नन्वस्य कित्सनादिप्रतिषेधविषय आरम्भात्कथमेतद्विषये प्रतिषेधप्राप्तिरत आह—**नह्ययमिति** । नानेनेड्विधीयते किं तर्हि निषेध एव । विधिस्तु पूर्वेणेवेति तस्य प्रतिषेधः स्यादेवेति भावः । अत्रार्थे भाष्यं योजयति—**यदपीति** । स्नुक्रमोर्वलाद्यार्धधातुकस्याऽऽत्मनेपदे परत इण्नेति

---

* १. ३. ६२.

अन्तादिवद्भावेन व्यपवर्गः। उभयत आश्रये नान्तादिवत्। एवं तर्ह्येकादेशः पूर्वविधिं प्रति स्थानिवद्भवतीति÷ स्थानिवद्भावाद्व्यपवर्गः। तत्परपरसीयुटोस्तार्हि प्रतिषेधो वक्तव्यः।

सिद्धं तु स्नोरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ॥ ३ ॥

सिद्धमेतत्। कथम्। स्नोरात्मपदेन समानपदस्थस्य नेड् भवतीति वक्तव्यम्। यदि स्नोरात्मनेपदेन समानपदस्थस्येण्न भवतीत्युच्यते प्रस्नवितेवाऽऽचरति प्रस्नवित्रीयते अत्र न प्राप्नोति। बहिरङ्गत्वाच्च। बहिरङ्गलक्षणमत्राऽऽत्मनेपदम्*।

क्रमेश्च ॥ ४ ॥

क्रमेश्चाऽऽत्मनेपदेन समानपदस्थस्येण्न भवतीति वक्तव्यम्। अथ किमर्थं

प्र०—दाङ्गं बलीय इत्यनेन त्वेकनिमित्ता प्रवृत्तिर्वार्णस्य प्रतिषिध्यते न तु भिन्ननिमित्तेति स्यादेवेड्डागमः। अत एवेट्यपि कर्तव्ये वार्णादाङ्गमित्यस्यानुपस्थानम्। **एकादेशः पूर्वविधिमिति**। ननु चाऽऽर्धधातुकस्येट्प्रतिषेध उच्यते न चाऽऽर्धधातुकमेकादेशात्पूर्वं व्यपवर्गाभावात्। अत्राऽऽहुः—पूर्वस्मादपि विधिः पूर्वविधिरिति समासाश्रयणाद्दोषः। **प्रस्नवित्रीयत इति**। तृजन्तात्क्यङ् गीङ् ऋत इति गिङादेशः। **बहिरङ्गलक्षणमिति**। तृजन्तादाचारलक्षणे क्रियान्तरे क्यङ् तत्रांऽऽत्मनेपदमिङागमस्तु पूर्वमेव तृजन्तावस्थायामुत्पन्नो न शक्यो निवर्तयितुमित्यर्थः। यद्येवं प्रचिक्रंसिष्यत इत्यत्राऽऽत्मनेपदस्य बहिरङ्गत्वात्प्रतिषेधो न प्राप्नोति। नैष दोषः। समानपदस्थस्येति वचनादिडागमेन पदावस्थाऽपेक्षणीया तत्र तृचि विभक्तावुत्पन्नायां लब्धे पदत्व आत्मनेपदस्यासंनिधानादिडागमः प्रवर्तते। प्रचिक्रंसिष्यत इत्यत्र तु पदावस्था-

---

उ०—वाक्यार्थ इति भावः। **एकनिमित्तेति**। यथा कारक इत्यत्र यणृवृद्ध्योः। अत्र तु प्रत्ययस्येट् तदवयवस्यैकादेश इति भिन्नाश्रयत्वमिति भावः। निमित्तशब्दः षष्ठीनिर्दिष्टपरः। **ननु चाऽऽर्धधातुकस्येति**। आदेशावस्थायां व्यपवर्गाभावादचः पूर्वत्वमार्धधातुकस्य न संभवति स्थान्यवस्थायामपि न द्वयोः स्थानित्वादिति चोद्याशयः। **पूर्वस्मादपीति**। व्यवहितेऽपि पूर्वशब्दस्य वृत्तेः, एकादेशात्तत्स्थानिनो वा पूर्वस्माद्धातोः परस्य विधिरस्तीति न दोषः। वस्तुतः षष्ठीसमासेऽपि यत्किंचित्स्थानिनः पूर्वत्वमस्त्येवेति न दोष इति भाष्याशयः। स्थानिभूतत्वावच्छिन्नात्पूर्वग्रहणे तु न मानम्। ध्वनितं चेदं कृदतिङ्सूत्रे भाष्ये। **स्नोरात्मनेपदेनेति**। स्नुघटितसमुदायघटकमात्मनेपदमादाय यावतः पदसंज्ञा तत्स्थस्य स्नोः परस्य वलाद्यार्धधातुकस्य नेड्इत्यर्थः। **अत्र न प्राप्नोतीति**। इडित्यर्थः। बहिरङ्गलक्षणत्वाच्चेत्यस्य ' अयं न दोषः ' इति शेषः। चस्त्वर्थे। **न शक्य इति**। उत्प-

---

÷ १. १. ५७. * ३. १. ११; १. ३. १२.

क्रमेः पृथग्ग्रहणं क्रियते न स्नुक्रमिभ्यामित्येवोच्येत। कर्तरि चाऽऽत्मनेपदविषयात्क्रति नेति वक्ष्यति तत्क्रमेरेव यथा स्यात्स्नोर्मा भूत्। व्यतिप्रस्नवितारौ व्यतिप्रस्नवितारः÷।

कर्तरि चाऽऽत्मनेपदविषयात्क्रति ॥ ५ ॥

कर्तरि चाऽऽत्मनेपदाविषयात्क्रति प्रतिषेधो वक्तव्यः। प्रक्रन्ता उपक्रन्ता*।

तत्तर्हीदं बहु वक्तव्यम्। स्नोरात्मनेपदेन समानपदस्थस्येण्न भवतीति वक्तव्यम्। क्रमेश्चेति वक्तव्यम्। कर्तरि चाऽऽत्मनेपदाविषयात्क्रतीति वक्तव्यम्। सूत्रं च भिद्यते।

यथान्यासमेवास्तु। ननु चोक्तं स्नुक्रमोरनात्मनेपदानिमित्ते चेत्क्रत्युपसंख्यानमिति। नैष दोषः। स्नुक्रमी एवाऽऽत्मनेपदनिमित्तत्वेन विशेषयिष्यामः। न चेत्स्नुक्रमी आत्मनेपदस्य निमित्ते इति। कथं पुनर्धातुर्नामाऽऽत्मनेपदस्य निमित्तं स्यात्। धातुरेव निमित्तम्। आह हि भगवाननुदात्तङित आत्मनेपदं शेषात्कर्तरि परस्मैपदम् [१. ३. १२; ७८] इति। यत्र तर्हि धातुर्नाऽऽश्रीयते। भावकर्मणोः [१. ३. १३] इति। अत्रापि धातुरेवाऽऽश्रीयते। भावकर्मवृत्त्याद्धा-

---

प्र०—यामेवाऽऽत्मनेपदसंनिधानात्प्रतिषेधप्रवृत्तिः। **आत्मनेपदविषयादिति**। तद्योग्यादित्यर्थः। **प्रक्रन्तेति**। प्रारम्भविषयत्वात्क्रमेः प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदविषयत्वम्। **स्नुक्रमी एवेति**। अनात्मनेपदनिमित्ते इति प्रथमाद्विवचनं न सप्तमी। सप्तम्यां हि भावादेरात्मनेपदनिमित्तस्याऽऽश्रयणात्प्रस्नवितव्यमित्यादावपि निषेधः स्यात्। **कथं पुनरिति**। वृत्त्यादिरर्थ आत्मनेपदस्य निमित्तं न धातुरिति भावः। **धातुरेवेति**। वृत्त्याद्यर्थविशिष्टः। **भावकर्मवृत्तादिति**। भावकर्मणी धातोरेव विषय-

---

उ०—न्ननिवृत्तेरशक्यत्वादित्यर्थः। **प्रतिषेधप्रवृत्तिरिति**। वार्तिके प्रत्यासत्तिन्यायेन स्नुक्रमिनिमित्तकात्मनेपदेन समानपदस्थस्येत्यर्थः कार्य इति भावः। बहिरङ्गक्यङादिनिमित्तमत्राऽऽत्मनेपदमिति भाष्यार्थः। प्रच्चिक्रंसिष्यत इत्यत्र पूर्ववत्सन इत्यनेनाऽऽत्मनेपदं स्नुक्रमिनिमित्तमेवेति भावः। एवं च प्रच्चिक्रमिषयत इत्यत्र णिच आत्मनेपदनिमित्तत्व इड् भवत्येव। एवं सन्नन्ताद्भावे कर्मणि वाऽऽत्मनेपदे प्रच्चिक्रमिषिष्यत इत्येव। पूर्ववत्सन इत्यस्य तु न तत्र प्रवृत्तिः। कर्तरीत्यनुवृत्तेश्च। अत एव वक्ष्यमाण प्रत्याख्याने न फलभेदः। सप्तम्यन्तस्यान्वयायोग्यत्वादाह—**प्रथमाद्विवचनमिति**। स्नुक्रमोर्बलादेरिट् यदि ते स्नुक्रमी अनात्मनेपदनिमित्ते भवत इति सूत्रार्थ इति भावः। वस्तुतो भावप्रधानः सौत्रो निर्देशः प्रसज्यप्रतिषेधश्च। स्नुक्रमोरात्मनेपदनिमित्तत्वाभावे सत्येव प्रत्यासत्त्या ताभ्यां परस्य वलादेरिडित्यर्थः। तत्फलितं भाष्य

---

† १. ३. १४. * १. ३. ४२.

तोरिति । कथं प्रक्रमितव्यम् । सत्यात्मनेपदे निमित्तशब्दो वर्तते । कथं प्रक्रन्ता उपक्रन्ता तस्मादसत्यपि । कथं प्रक्रमितव्यम् । तस्मात्सत्येव । कथं प्रक्रन्ता उपक्रन्ता वक्तव्यमेवैतत्कर्तरि चाऽऽत्मनेपदविषयात्कृतीति । अथवा कृतीति* वर्तते ।

ग्रहोऽलिटि दीर्घः ॥ ७ । २ । ३७ ॥

ग्रहेर्दीर्घत्व इड्ग्रहणम् ॥ १ ॥

ग्रहेर्दीर्घत्व इड्ग्रहणं कर्तव्यम् । इटो दीर्घ इति वक्तव्यम् । न वक्तव्यम् ।

प्र०—भावेन विशेषणे इत्यर्थः । **सत्यात्मनेपदे इति** । न योग्यतामात्राश्रयमिह निमित्तत्वमाश्रीयते किंतु कार्यं कुर्वतः । यद्येवमर्थेऽपि निमित्तत्वेनाऽऽश्रीयमाणे दोषाभावात्कस्मात्सुक्रमी एवेत्युक्तम् । उच्यते । अर्थं निमित्तत्वेनाऽऽश्रीयमाणेऽनुपसर्गाद्वेत्यात्मनेपदमर्थनिरपेक्षत्वादसंगृहीतं स्यादिति धातुरेव निमित्तत्वेनाऽऽश्रितः । यदि सति कार्ये निमित्तमाश्रीयते तदा निमित्तग्रहणं न कर्तव्यम् । आत्मनेपद इति सत्सप्तम्याऽऽश्रयणात् । नैतदस्ति । तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषायां सत्यां सत्सप्तम्याश्रयणस्याशक्यत्वात् । **अथवा कृतीति वर्तत इति** । तच्च कृदग्रहणं वाक्यभेदेन क्रमिणैव संबध्यते न स्नौतिना । अनात्मनेपदनिमित्त इति च प्रसज्यप्रतिषेधः । तेनायमर्थो यदाऽप्यात्मनेपदयोग्यः क्रमिस्तदा ततः परस्य कृत इण्न भवति ।

ग्रहो । इड्ग्रहणमिति । आदेशस्य स्थानिनिर्देशार्थं षष्ठ्यन्तमिड्ग्रहणं कर्त-

---

उ०—उक्तम्—न चेत्सुक्रमी इति । ननु कर्मणि धातोर्वृत्त्यभावेन कर्मवृत्तादित्यसंगतमत आह—भावकर्मणी इत्यादि । विषयसप्तमी भावकर्मविषयाद्धातोरित्यर्थः । ते अपि प्रत्ययद्योत्ये इति भावः । पञ्चकस्य प्रातिपदिकार्थत्ववत्सर्वस्य धात्वर्थत्वमिति तत्त्वम् । शत्रादिविषयत्वस्य तु सत्त्वप्रधानानि नामानीत्युक्तेर्वाच्या एव भावादय इति बोध्यम् । एतदर्थमेव विषयभावेनेति कैयटेन व्याख्यातम् । तद्विषयत्वं च धातोस्तेषां स्वप्रकृतिकप्रत्ययार्थतया स्वस्य तत्तद्विशिष्टक्रियावाचकत्वेन वेत्यन्यत् । **यद्येवमिति** । आत्मनेपदनिमित्तार्थविषयमिन्नस्नुक्रमिभ्यां परस्य वलादेरिडित्यर्थं आश्रयणीय इति भावः । **सत्सप्तमीति** । आत्मनेपदेऽसतीत्यर्थः । **अशक्यत्वादिति** । इनान्नलोप इत्यत्र तु लक्ष्यानुरोधान्नैषा परसप्तमी । का तर्हि सत्सप्तमीत्युक्तमिति न तद्विरोधः । सतीति पदाध्याहारस्य दुर्ज्ञेयतया स्पष्टप्रतिपत्तये निमित्तग्रहणं कृतमिति तात्पर्यम् । **तच्चेति** । अनुवृत्तं चाऽऽवृत्त्या कर्तृपरं कृत्संज्ञकपरं चेति प्रक्रमितुमित्यादौ न दोषः ।

ग्रहोऽलिटि । कर्तव्यमिति । अनुवर्तमानं तु प्रथमान्तत्वादन्वयायोग्यमिति

---

* ७. २. ८.

प्रकृतमनुवर्तते । क्व प्रकृतम् । आर्धधातुकस्येड्वलादेः [७. २. ३५] इति । एवमपि कर्तव्यमेव ।

अग्रहणे ह्यसंप्रत्ययः षष्ठ्यभावात् ॥ २ ॥

अक्रियमाणे हीड्ग्रहणेऽसंप्रत्ययः स्यात् । किं कारणम् । षष्ठ्यभावात् । षष्ठीनिर्दिष्टस्याऽऽदेशा उच्यन्ते÷ न चात्र षष्ठीं पश्यामः । क्रियमाणे चापीड्-ग्रहणे ।

चिण्वदिटः प्रतिषेधः ॥ ३ ॥

चिण्वदिटः* प्रतिषेधो वक्तव्यः । ग्राहिष्यते ।

यङ्लोपे च ॥ ४ ॥

यङ्लोपे च प्रतिषेधो वक्तव्यः । जरीगृहिता जरीगृहितुम् । जरीगृहितव्यम् । यदि पुनरिड्दीर्घ आगमान्तरं विज्ञायेत ।

प्र०—व्यम् । **एवमपीति** । सत्येव प्रथमान्त इड्ग्रहणे षष्ठ्यन्तमन्यत्कर्तव्यमित्यर्थः । **अक्रियमाणे हीति** । प्रथमान्तमिड्ग्रहणमयोग्यत्वान्न संबध्यते । अच्परिभाषोपस्था-नाच्चाज्मात्रस्य ग्रहेः परस्य दीर्घप्रसङ्गः । **असंप्रत्यय इति** । ग्रहेः परस्येटो दीर्घ इत्ययमिष्टः संप्रत्ययो न स्यात् । **क्रियमाण इति** । प्राकरणिकमिटमनपेक्ष्येट इत्यु-च्यमाने सर्वस्येटो विशेषाभावाद्दीर्घप्रसङ्गाच्चिण्वदिटो दीर्घः प्रतिषेध्यः । **जरीगृहि-तेति** । जरीगृह्यशब्दात्तृच् इट्· अल्लोपयलोपयोः कृतयोर्द्विःप्रयोगे द्विर्वचने स एव ग्रहिरितीटा दीर्घप्रसङ्गः । दीर्घविधौ स्थानिवत्त्वनिषेधादकारेण व्यवधानाभावः । **यदि पुनरिति** । इडिति वर्तते दीर्घ इति च निर्दिश्यते । तत्र दीर्घ इड् भवतीति सामर्थ्याद्व्यक्तिपरित्यागेनैकारजातिराश्रीयते । दीर्घग्रहणाच्च दीर्घव्यक्तिसमवेता सा विधीयते । टकारो देशविध्यर्थ इति सामर्थ्यादीडागमविधिः । एवं च षष्ठी-

---

उ०—भावः । नन्विड्ग्रहणाभावे किमनिष्टमत आह—**अच्परिभाषेति** । **अज्मात्रस्येति** । ग्राहक इत्यादावपीत्यर्थः । नन्वेवमसंप्रत्ययोऽनुपपन्नोऽत आह—**ग्रहेः परस्येति** । नन्वत्र करणेनैतत्प्रकरणस्थेड्ग्रहणं भविष्यतीत्यत आह—**प्राकरणिकमिति** । प्राकरणिकेड्ग्र-हणे हि पूर्वप्रक्रान्तमेव विभक्तिविपरिणामेन संबध्येतेत्यपूर्वकरणात्प्रकरणानादर इति भावः । **विशेषाभावादिति** । इट्त्वस्य समानत्वादिति भावः । **स एव ग्रहिरिति** । उत्तरखण्डभूत इत्यर्थः । **स्थानिवत्त्वनिषेधादिति** । पूर्वस्य विध्यभावाच्चेत्यपि बोध्यम् । पञ्चमीसमासस्तु क्वाचित्क इति तदनाश्रयेणेदं भाष्यमिति तत्त्वम् । नन्विट् दीर्घ इति सामानाधिकरण्यमसंगतमत आह—**सामर्थ्यादिति** । इत्वजात्याक्रान्तो दीर्घ

इडुदीर्घ इति चेद्विप्रतिषिद्धम् ॥ ५ ॥

इडुदीर्घ इति चेद्विप्रतिषिद्धं भवति । यदि इण्न दीर्घः । अथ दीर्घो न इट् । इडुदीर्घश्चेति विप्रतिषिद्धम् ।

प्रतिषिद्धस्य च पुनर्विधाने दीर्घत्वाभावः ॥ ६ ॥

प्रतिषिद्धस्य च पुनर्विधाने दीर्घत्वस्याभावः । वुवूर्षते विवरिषते विवरीषते+ । अत्रापि* इडुदीर्घ इत्यनुवर्तिष्यते । यत्तर्हि विदेशस्थं प्रतिषिध्य पुनर्विधानं तन्न सिध्यति । जॄव्रश्च्योः क्ित्व [७. २. ५५] श्न्युकः किति [११] इत्यनेन प्रतिषिद्धे× दीर्घत्वं न प्राप्नोति । जरित्वा जरीत्वा ।

प्र०–निर्दिष्टमिड्ग्रहणं न कर्तव्यम् । चिण्वदिट् चास्यापवाद इति तत्र दोषाभावः । न च कस्यचित्स्थानिनो दीर्घत्वं विधीयत इति स्थानिवत्त्वानिषेधात्पूर्वस्मादपि विधौ स्थानिवत्त्वादकारेण व्यवधानाच्च यङ्लोप इटोऽप्रसङ्गः । अथ त्वागमान्तरेऽपि दीर्घत्वमस्तीत्येवायं दीर्घविधिस्तदा यङ्लोपे दोषो न परिहृतः । इतरो व्यक्तिपदार्थाश्रयेणाऽऽह—**इडुदीर्घ इति चेदिति** । **विवरीषत इति** । सनीटि प्राप्ते वृतो वेत्यनेन पक्ष ईटि च प्रसक्ते सति ग्रहगुहोश्चेत्यनेनोभयस्मिन्नपि प्रतिषिद्ध इट्सनि वेति पक्ष इट् विधीयते ततः पुनरीटो विधानाभावादीर्घ ईकारः पक्षे न श्रूयेत । इटस्तु पक्षे दीर्घविधौ दोषाभावः । **अत्रापीति** । इट्सनि वेत्यत्र दीर्घ इति वृत इति चानुवर्तत इति सिद्धं त्रैरूप्यम् । **विदेशस्थमिति** । दीर्घग्रहणानुवृत्तेरत्रासंभवः । **जरीत्वेति** । उदात्तत्वादिट्प्राप्तो वृतो वेत्यनेन पक्ष ईट् च श्न्युकः किताविति प्रतिषिद्धः । इकारजात्याश्रयणादीटोऽपि प्रतिषेधः प्रवर्तते । ततो जॄव्रश्च्योः

उ०–इत्यर्थ इति भावः । **अपवाद इति** । सामान्यमिकस्येट्जातीयस्य नित्यत्वाद्बाधक इत्यर्थः । यङ्लोपे दोषाभावमत्र पक्ष उपपादयति—**न च कस्यचिदिति** । **दोषो न परिहृत इति** । तस्मादेवं दीर्घविधिग्रहणमनुचितमिति भावः । वस्तुतोऽयं दोषः पक्षद्वयेऽपीति सूत्रशेषे भाष्यकृद्वक्ष्यतीत्याद्यदोषपरिहारफलक एवायं पक्ष इति तत्त्वम् । यङ्लुगन्तात्तृजादौ त्विटो दीर्घ इष्ट एव । स्थाने द्विवचनपक्षेऽप्यन्तरङ्गानपीति न्यायेन लुगुत्तरमेव द्वित्वप्रवृत्तेः स्थानिवद्भावेन ग्रहित्वाद्भवत्येव दीर्घः । यदि यङ्लुगस्तीति तात्पर्यम् । प्रतिषिद्धस्य पुनर्विधानमुपपादयति—**सनीटीति** । **उभयस्मिन्नपीति** । पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्याज्जातिपक्षाश्रयणाच्चेति भावः । **सिद्धं त्रैरूप्यमिति** । वाक्यभेदेनेटोऽपि विधानादिति भावः । विदेशस्थमित्यस्य हेतुगर्भविशेषणत्वमुपपादयति—**दीर्घेति** । भाष्ये **न सिध्यतीति** । तद्विषये न सिध्यति दीर्घ इत्यर्थः । नन्विटो निषेधः कथमीटः स्यादत आह—**जातीति** ।

+ ७. २. ३५; ३८; १२; ४१. * ७. २. ४१. × ७. २. ३५; ३८.

ईटो विधिरिटः प्रतिषेधः+ । यथाप्राप्त इड्दीर्घो भविष्यति । यदि तर्हि इटो ग्रहण ईटो ग्रहणं न भवति जरीत्वा न क्त्वा सेट् [१. २. १८] इति कित्त्वप्रतिषेधो न प्राप्नोति । इह च अग्रहीदिति इट ईटि [८. २. २८] इति सिज्लोपो न प्राप्नोति । इह च अग्रहीत् नेटि [७. २. ४] इति वृद्धिप्रतिषेधो न प्राप्नोति । मा भूदेवम् । ह्म्यन्तानामित्येवं× भविष्यति । अत्रापि नेटीत्येवानुवर्तते । तच्चावश्यमिड्ग्रहणमनुवर्त्यमधाक्षीदित्येवमर्थम् । तथा अग्रहीध्वम् अग्रहीढ्वम् विभाषेटः [८. ३. ७९] इति मूर्धन्यो न प्राप्नोति । तस्मान्नैवं शक्यं वक्तुमिटो ग्रहण ईटो ग्रहणं न भवतीति । भवति चेत्प्रतिषिद्धस्य च पुनर्विधाने दीर्घाभाव इत्येव । तस्मादशक्य इड्दीर्घ आगमान्तरं विज्ञातुम् । न चेद्विज्ञायत इटो ग्रहणं कर्तव्यम् । न कर्तव्यम् । आर्धधातुकस्येति÷ वर्तते । ग्रहः परस्याऽऽर्धधातुकस्य दीर्घत्वं वक्ष्यामि । इहापि तर्हि प्राप्नोति । ग्रहणम् ग्रहणीयम् । वलादेरिति* वर्तते । एवमपि ग्रहीता ग्रहीतुम् अत्र न प्राप्नोति । भूतपूर्वगत्या भविष्यति । एवमपि ग्राहकः अत्र प्राप्नोति । किंचेट्प्रतीघातेन खल्वपि दीर्घत्वमुच्यमानमिटं बाधते । तस्मादिटो ग्रहणं कर्तव्यम् ।

प्र०—क्त्वीत्यनेनेटि विधीयमाने पक्षे दीर्घो न स्यात् । एतत्परिहरति—**ईटो विधिरिटः प्रतिषेध इति** । वृतो वेत्यनेन पक्षे ईडागमो विधीयते । इत्युकः कितीत्यनेन तु नेडित्यधिकाराद्वयर्थमुपक्षाश्रयणाच्च निषेध इटः । न त्वीटः । पाठान्तरं तु प्रकृतेऽर्थे दुर्योजित्वादस्माभिर्नोपन्यस्तम् । सन्मार्गसंभवे को हि विमार्गं मतिमान्भजेत् । **यदि तर्हीति** । इटप्रतिषेध ईटो यथा न भवत्येवं कार्यान्तरस्याप्यप्रसङ्गः । **तस्मान्नैतदिति** । इड्ग्रहण इकाराकृतिग्राश्रयणीया नतु व्यक्तिः । **भवति चेदिति** । जॄव्रश्च्योः क्त्वीतीडविधौ दोष एवेत्यर्थः । नन्वनुवाद इव विधावपीकाराकृत्याश्रयणाज्जरित्वा जरीत्वेति रूपद्वयं भविष्यति । नैतदस्ति । विधौ जात्याश्रये लवितेत्यादावपि दीर्घः स्यात्तस्माद्विहितस्य दीर्घस्येडग्रहणेन ग्रहणं नतु विधेयस्य । **ग्रह इति** । इडागमे कृते तदादेरार्धधातुकस्याऽऽदेः परस्येतीट एव दीर्घः । **वलादेरिति** । वलादि यदृष्टमित्याश्रीयते । **इतरः सांप्रतिकं वलादित्वमाश्रितामिति** मत्वाऽऽह—**एवमपीति** । **भूतपूर्वगत्येति** । सांप्रतिकाभावादलिटीति निषेधाच्च **इट्प्रतिघातेनेति** । येन नाप्राप्तिन्यायेनेटं बाधित्वाऽकृतेटकस्यैवाऽऽर्ध-

---

उ०—**नत्वीट इति** । एवं च जरीत्वा विवरीषत इति सिद्धमिति भावः । **तस्माद्विहितस्येति** । अनुवाद एव जातेर्ग्रहणं विधौ तु व्यक्तेरेवेति भावः । नन्वार्धधातुकस्य दीर्घविधाने कथमिटस्तत्सिद्धिरत आह—**इडागम इति** । विशिष्यानुच्चारणान्निर्दिश्यमानपरिभाषाया अविषय इति भावः । भाष्य **इट्प्रतिघातेनेति** । येन

+ ७. २ ३८; ११. × ७. २. ५. ÷ ७. २. ३५. * ७. २. १०.

न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। आर्धधातुकस्येड्वलादेरिति। ननु चोक्तमेवमपि कर्तव्यमेवाग्रहणे ह्यसंप्रत्ययः षष्ठ्यनिर्देशादिति। नैष दोषः। ग्रह इत्येषा पञ्चमीडिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१. १. ६७]इति। एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं चिण्वदिटः प्रतिषेध इति। कथम्। प्रकृतस्येट इदं दीर्घत्वं न च चिण्वदिट् प्रकृतः। यङ्लोपे कथम्। यङ्लोपे चोक्तमिटि सर्वत्र। क्व सर्वत्र। यद्येव प्रकृतस्येटो दीर्घत्वमथापि इड्-दीर्घं आगमान्तरं विज्ञायेत।

यङ्लोपे चोक्तम् ॥ ७ ॥

किमुक्तम्। तदन्तद्विर्वचनादिति*।

प्र०—धातुकस्य दीर्घत्वमच्परिभाषोपस्थानाद्यत्र तत्र स्थितस्याचः स्यात्। **न चेति**। जृव्रश्च्योः क्त्वीत्यनेन तु वलादिलक्षण एवेट् प्रतिप्रसूयत इत्यप्राकरणिकत्वाभावाद्दीर्घः सिध्यति। **यङ्लोपे चेति**। सन्यङन्तस्य स्थाने द्विर्वचनमित्यत्र पक्षे प्रकृतिप्रत्ययसंमोहान्नष्टः स ग्रहिः। ननु च द्विःप्रयोगो द्विर्वचनमिति पक्षस्तत्र स्थितः। तत्कथमस्थितपक्षाश्रयेण परिहारः। अत्राऽऽहुः—**यङ्लोपे चोक्तमिति**। अत्राप्ययमभिप्रायो वार्तिककारस्य द्विःप्रयोगे द्विर्वचने पूर्वस्मादपि विधावल्लोपस्य स्थानिवत्त्वादकारेण व्यवधानाद्दीर्घाभावः। न पदान्तेत्यत्र पूर्वत्रासिद्धे न स्थानिवदित्युक्तं तस्मिन्नुच्यमाने पदान्तवरेयलोपस्वरवर्जं द्विर्वचनादीनि न वक्तव्यानीति साप्तमिके दीर्घविधौ स्थानिवत्त्वं भवत्येव। सूत्रकारमतेऽपि ग्रहेर्विहितस्येत्येवं विहित-विशेषणाश्रयणाद्यङ्लोपे दीर्घाभावसिद्धिः। भाष्यकारेण त्वस्थितमपि पक्षमाश्रित्य तदन्तद्विर्वचनादिति विवृतम्। अन्यत्रास्य दोषस्य सम्यक्परिहाराभिधानादनादृतम्।

उ०—नाप्राप्तिन्यायाच्च तत्प्रतिघातेनास्य विधानं बोध्यम्। ननु प्राकरणिकस्यैव दीर्घे जृव्रश्च्योरित्यस्योत्तरत्र विधानादप्राकरणिकत्वाज्जरित्वेत्यत्र पक्षे दीर्घो न स्यादत आह—**जृव्रश्च्योरिति**। **प्रतिप्रसूयत इति**। इ-युक इति प्रतिषिद्धः प्रतिप्रसूयत इत्यर्थः। **साप्तमिक इति**। वस्तुतो वर्ज्यकोटौ दीर्घस्याप्युपलक्षणतायाः कमेर्णिङित्यादिसूत्रस्थ-भाष्यसंमततयेदं चिन्त्यम्। ननु वार्तिकमतेऽस्त्वयं परिहारः सूत्रमते तु कथमत आह—**सूत्रकारेति**। इदं भाष्यकृतोऽप्युपलक्षणम्। अपिना पञ्चमीसमासाभाव इत्यपि बोध्यम्। **अन्यत्रेति**। एकाचो द्वे इत्यत्र। तत्र हि ग्रहेरङ्गादिति भाष्यम्। तृचो हि जरीगृह्येत्यङ्गं नतु ग्रहिः। न चाल्लोपयलोपयोरेकदेशविकृतन्यायेन जरीगृहित्यङ्गम्। तस्य च ग्रहिरूपत्वमपि द्विःप्रयोगत्वाद्द्विर्वचनस्येति वाच्यम्। विशेषणसामर्थ्याद्धि यथाश्रुतरूपाश्रयणमिति न दोष इति कैयटेन व्याख्या-

---

* ७. २. १०.

स्वरतिसूतिसूयतिधूञूदितो वा ॥ ७ । २ । ४४ ॥

अथ वेति+ वर्तमाने पुनर्वावचनं किमर्थम् ।

पुनर्वावचनं लिङ्सिचोर्निवृत्त्यर्थम् ॥ १ ॥

पुनर्वावचनं क्रियते लिङ्सचोर्निवृत्त्यर्थम्* ।

अथ किमर्थं सूतिसूयत्योः पृथग्ग्रहणं क्रियते । सुवतेर्मा भूत् । अथ किमर्थं

प्र०– स्वर०। अथेति। इट्सनि वेत्यतः । **लिङ्सिचोर्निवृत्त्यर्थमिति।** ननु स्वरतिग्रहणाल्लिङ्-सिचोरनुवृत्तिर्न भविष्यति। ऋतश्च संयोगादेरितीड्विकल्पस्य सिद्धत्वात् । नैतदस्ति । नित्यार्थं स्वरतिग्रहणमित्यज्ञापकम् । लिङ्सिजनिवृत्तेः । **अथ किमर्थमिति** । सूग्रहणमेव क्रियतामिति भावः । **सुवतेरिति** । अननुबन्धकग्रहणे न सानुबन्धकस्येति सुवतेरेव ग्रहणं स्यात् । सूङ्ग्रहणेऽपि क्रियमाणे लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति सूयतेरेव ग्रहणं स्यात् । अस्याश्च परिभाषायाः सूङ्ग्रहणे कर्तव्ये सूतिसूयतीति भेदे-

---

उ०–तत्वात् । किच समुदायस्य द्विःप्रयोगेऽपि न ग्रहित्वमुत्तरखण्डस्य तु कैयटरीत्या न तत्त्वम् । न चात्र पक्षे यङ्लुगन्तात्तृच इटि दीर्घो न स्यात्ततो यँङ्लुक्सत्त्वे दृढतरमानाभावादनैमित्तिकलुकः पूर्वमेव प्रवृत्तत्वेन द्विःप्रयोगाद्विर्वचनेन च ग्रहेरेवाङ्गत्वे-नाक्षतेश्च । यङ्लोपे तु जरीगृह्यशब्दात्तृचि विशिष्टस्याङ्गत्वेऽल्लोपयलोपयोरेकदेशविकृत-न्यायेन जरीगृहित्यस्येवाङ्गत्वं न तु ग्रहेः । नच द्विःप्रयोगत्वाद्ग्रहिरेव सः । अङ्ग-संज्ञाप्रवृत्तिकाले ग्रहिरूपत्वाभावात् । यङ्लुगन्ते तु तत्कालेऽपि तथैव । यत्तु हर-दत्तेनैकाज्ग्रहणानुवृत्त्या यङ्लोपे दोषपरिहार उक्तः स तु यङ्लुक्यातिव्यापक-त्वान्मानाभावाच्च हेय एव । यत्रेडाद्यार्धधातुकनिरूपिताङ्गसंज्ञाप्रवृत्तिवेलायां स्वतः स्थानि-वद्भावेन वा ग्रहिरूपत्वं तत्र ग्रहेः परस्येटो दीर्घ इति यथाश्रुतरूपाश्रयणमिति कैय-टस्यार्थः । अत एव गृहीतमित्यादिसिद्धिः । अन्यथाऽत्रेडपेक्षया नित्यत्वात्संप्रसारणे यथाश्रुतरूपाभावः स्पष्ट एवेति दिक् । वस्तुतस्तदन्तद्विर्वचनादिति भाष्यं तत्रोक्त-सकलपरिहारोपलक्षणं बोध्यम् ।

स्वरतिसूति० । भाष्ये **लिङ्सिचोरिति** । तत्सूत्रपरं तत्सूत्रानुवृत्तेर्निवृत्त्यर्थमि-त्यर्थः । अन्यथा परस्मैपदे सिचि विकल्पस्य चारितार्थ्येन ऋतश्च संयोगादेरितीड्विक-ल्पस्य सिद्धत्वादिति कैयटासंगतिः । **नित्यार्थमिति** । अत्र लिङ्सिच्सहितवाग्र-हणानुवृत्तावपि लिङ्सिचोर्विकल्पे प्राप्ते स्वृग्रहणं संस्वृषीष्टेत्यादौ सामर्थ्यान्नित्यार्थं स्यादित्यर्थः । केचित्त्वेवं सति सूत्रस्य वैरूप्यापत्तिस्तस्माल्लिङ्सिचोः परतः क्वचि-द्विषये संस्वृषीष्टेत्यादौ पूर्वसूत्रस्य व्यवस्थितविभाषात्वबोधनद्वारेटो निवृत्त्यर्थं वाग्र-हणमेवं च लिङ्सिचोरित्यस्य क्वचिद्विषये निवृत्त्यर्थमिति भाष्याक्षरार्थमाहुः । **सुव-तेरिति** । षू प्रेरण इति हि निरनुबन्धः । षूङ् प्राणिगर्भविमोचन इत्यदादिः

+ ७. २. ४१. * ७. २. ४२.

धूञः सानुबन्धकस्य ग्रहणं क्रियते। धुवतेर्मा भूदिति।

किं पुनरियं प्राप्ते विभाषाऽऽहोस्विदप्राप्ते। कथं च प्राप्ते कथं वाऽप्राप्ते। यदि स्वरातिरुदात्तस्ततः प्राप्ते। अथानुदात्तस्ततोऽप्राप्ते।

स्वरातिरुदात्तः ॥ २ ॥

स्वरातिरुदात्तः पठ्यते। किमर्थं तर्हि वावचनम्।

वावचनं निवृत्त्यर्थम् ॥ ३ ॥

वावचनं क्रियते निवृत्त्यर्थम्।

अनुदात्ते हि किति वाप्रसङ्गः प्रतिषिध्य पुनर्विधानात् ॥ ४ ॥

अनुदात्ते हि सति किति विभाषा प्रसज्येत। स्वृत्वा। किं कारणम्। प्रतिषिध्य पुनर्विधानात्। प्रतिषिध्य+ किलायं पुनर्विधीयते। स यथैवैकाज्लक्षणं× प्रतिषेधं बाधत एवं श्नुकः किति [७. २. ११] इत्येतमपि बाधेत। यदि

प्र०–नोपादानमेव ज्ञापकम्। **धूञ्** इति। धूञ् कम्पन इति स्वादिषु क्र्यादिषु च पठ्यत इति द्वयोरपि सामान्येन ग्रहणम्। धू विधूनन इत्यस्मात्तु नित्यमिट् भवति। **किं पुनरिति**। स्वरत्युद्देशेनायं विचारोऽन्येषां तूदात्तत्वात्प्राप्तविभाषाया निश्चयात्। दोषाभावाच्च। स्वरतेस्तूदात्तानुदात्तप्रतिज्ञाने दोषदर्शनाद्विचारः। ऋतां च वृङ्वृञाविति परिगणनादस्योदात्तत्वं न प्रतिज्ञातम्। तत्र किमुदात्तत्वप्रतिज्ञानेन दोषः परिह्रियते। अथानुदात्तत्वप्रतिज्ञाने न्यायेनेति प्रश्नः। **यदि स्वरातिरुदात्त इति**। ननु किति प्रत्यये इ्नुकः कितीति प्रतिषेधात्तत्राप्राप्तविभाषेयं स्यात्। नैतदस्ति। अल्पविषयत्वप्रसङ्गात्स्वरतेः प्राप्तविभाषायां तु महाविषयत्वं भवति। **किमर्थमिति**। यदि पक्ष इण्निवृत्त्यर्थं तदा ऋद्धनोः स्य इतीममपीटं पक्षे निवर्तयेदिति प्रश्नः। **निवृत्त्यर्थमिति**। निवृत्तिः कंचिदेव विधिं बाधते न सर्वमिति भावः। **स**

उ०–धूञ् प्राणिप्रसव इति च दिवादिः सानुबन्धकौ। **ज्ञापकमिति**। न च साहचर्यादलुक्विकरणस्यैव भविष्यतीति वाच्यम्। तदनित्यत्वस्यापि ज्ञापनादिति भावः। न च लुग्विकरणस्यैवेत्येव कुतो न ज्ञाप्यते। ज्ञापितेऽप्यस्य वैयर्थ्यापत्तेः। परिभाषाद्वयेनोभयोरपि ग्रहणस्य वक्तुं शक्यत्वात्। धू विधूनन इति कुटादिः। **किमुदात्तत्वप्रतिज्ञानेन दोष इति**। स्वृत्वेत्यादौ विकल्पप्रसङ्गरूप इत्यर्थः। **न्यायेनेति**। येन नाप्राप्तिन्यायेन पुरस्तात्प्रतिषेधकाण्डारम्भन्यायेन चेत्यर्थः। **तत्राप्राप्तेति**। भावतात्पर्यकतालोभेनेति भावः। **महाविषयत्वमिति**। व्याप्तिन्यायानुग्रहाय साहचर्यानुग्रहाय च प्राप्तविभाषैव युक्तेत्यर्थः। वावचनस्य विकल्पार्थत्वात्प्रश्नाशयमाह–**यदीति**। **कंचिदेवेति**। वक्ष्यमाणेन न्यायेनेति भावः। नन्वस्य विकल्पत्वात्प्रतिषेधोक्तिरसंग-

---

+ ७. २. ११. × ७. २. १०.

तर्ह्युदात्तः स्वरितः पठिष्यति विप्रतिषेधं स्वरतेर्वैदूत्वादृतः स्ये विप्रतिषेधेनेति× स विप्रतिषेधो नोपपद्यते । किं कारणम् । स विधिरयं प्रतिषेधो विधिप्रतिषेधयोश्चायुक्तो विप्रतिषेधः । सोऽपि विधिर्मृदूनामिव कार्पासानां कृतः प्रतिषेधविषय आरभ्यते । स यथैवैकाज्लक्षणं प्रतिषेधं बाधत एवमिममपि बाधिष्यते । अथवा येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते बलादिलक्षण+ इयं विभाषाऽऽरभ्यते स्यलक्षणे पुनः प्राप्ते चाप्राप्ते च । अथवा मध्येऽपवादाः पूर्वान्विधीन्बाधन्त इत्येवमियं विभाषा बलादिलक्षणमिटं बाधिष्यते स्यलक्षणं न बाधिष्यते ।

अथवा पुनरस्वनुदात्तः । ननु चोक्तमनुदात्ते हि किति वाप्रसङ्गः प्रतिषिध्य पुनर्विधानादिति । नैष दोषः । येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्त एका-

---

प्र०—**विभिरिति** । ऋद्धनोः स्य इत्येषः । **अयं प्रतिषेध इति** । प्राप्तविभाषापक्षे यथा बलादिलक्षण इट् प्रतिषिध्यते तथा स्यलक्षणोऽपि प्रतिषिध्येत । अनुदात्तप्रतिज्ञाने तु द्वयोरपि विधित्वाद्विप्रतिषेधोपपत्तिः । **सोऽपीति** । वैधर्म्येण दृष्टान्तो यथा मृदुकार्पासकृतो रज्ज्वादिर्दुर्बलो नैवम् 'ऋद्धनोः स्ये' इत्ययं विधिः । **स यथैवेति** । करिष्यतीत्यादौ । **एवमिममपीति** । न च स्वरतेरुदात्तत्वे येन नाप्राप्तिन्यायोऽस्ति येनैकाज्लक्षणमेव प्रतिषेधं बाधेत न स्वरतिलक्षणम् । यद्येवं विप्रतिषेधानुपपत्तिः । स्यलक्षणस्य विधेरपवादत्वात् । अन्यथाऽपीष्टस्य सिद्धत्वान्मोपपादि विप्रतिषेधः । अथवा स विधिरयं प्रतिषेध इति विधेर्दुर्बलत्वं यदुक्तं तदनेन निराकृतम् । तत्र द्वयोस्तुल्यबलत्वादुपपद्यते विप्रतिषेधः । **अथवेति** । परिभाषाश्रयणादुत्सर्गापवादभावेऽपनीते द्वयोर्विप्रतिषेधोपपत्तौ परत्वेन व्यवस्था । उदात्तत्वे दोषं प्रतिविधायानुदात्तत्वे प्रतिविधत्ते । **अथवेति** । **न चाप्राप्त एकाज्लक्षण इति** । अयमेव

उ०—तेत्यत आह—**प्राप्तविभाषेति** । **प्रतिषिध्येतेति** । निषेधाश्च बलीयांस इति न्यायादिति भावः । **कार्पासकृत इति** । भाष्ये षष्ठी तु करणस्य शेषत्वविवक्षया बोध्या । **न्यायोऽस्तीति** । स्वरतावुदात्तत्वपक्ष एकाज्लक्षणनिषेधाप्राप्तेरिति भावः । **स्यलक्षणस्येति** । एवं चोत्सर्गापवादयोरयुक्तो विप्रतिषेध इत्यर्थः । एवं च 'स्वरतेर्वैदूत्वादृतः स्ये विप्रतिषेधेनेत्युक्तविप्रतिषेधासंगतिरिति भावः । **अन्यथाऽपीति** । इष्टसिद्धिरेव प्रार्थनीया सा त्वपवादत्वादेव सिद्धेति किं विप्रतिषेधेनेत्यर्थः । एवं हि विप्रतिषेधवार्तिकं विरुध्येतेत्यत आह—**अथवेति** । **तदनेनेति** । न त्वपवादत्वमुक्तमिति भावः । **स्यलक्षणावकाशः करिष्यतीति** । एतदवकाशः स्वर्ता स्वरितेति । एवं चेममपि बाधिष्यत इत्यत्र परत्वादिति शेषः । **परिभाषाश्रयणादिति** । येन नाप्राप्त इति,

---

× ७. २. ७०. + ७. २. ३५.

ज्लक्षणे प्रतिषेध इयं विभाषाऽऽरभ्यते श्न्युकः कितीत्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च। अथवा श्न्युकः कितीत्येष योग उदात्तार्थश्च येभ्यश्चानुदात्तेभ्य इट् प्राप्यते तद्बाधनार्थश्च। अथवा श्न्युकः कितीतीहानुवर्तिष्यते। अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति नेयं विभाषोग्लक्षणस्य प्रतिषेधस्य विषये भवतीति यदयं सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् [७. २. ४९] इति स्वृग्रहणं करोति*।

इण्निष्ठायाम् ॥ ७ । २ । ४७ ॥

इडिति× वर्तमाने पुनरिड्ग्रहणं किमर्थम्।

इड्ग्रहणं नित्यार्थम् ॥ १ ॥

नित्यार्थोऽयमारम्भः। नैतदस्ति प्रयोजनम्। सिद्धाऽत्र विभाषा पूर्वेणैव+ तत्राऽऽरम्भसामर्थ्यान्नित्यो विधिर्भविष्यति। नात्र पूर्वेण विभाषा प्राप्नोति। किं कारणम्। यस्य विभाषा [७. २. १५] इति प्रतिषेधात्। तत्राऽऽरम्भसामर्थ्याद्विभाषा लभ्येत पुनरिड्ग्रहणादिडेव भवति।

तीषसहलुभरुषरिषः ॥ ७ । २ । ४८ ॥

प्र०—पाठो युक्तः। केचित्तु वलादिलक्षण इति पठन्ति। वलादिमात्रविषयत्वाद्वलादिलक्षणमिति व्याचक्षते। **श्न्युकः कितीत्येतस्मिन्निति**। तत्र स्वृत्वेत्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधो भवतीति वक्तव्यम्। **येभ्यश्चानुदात्तेभ्य इति**। प्रतिषेधकाण्डस्य पुरस्तात्करणस्य सर्वेट्प्रतिषेधार्थत्वात्। **यदयमिति**। यद्युग्लक्षणं प्रतिषेधमयं विकल्पो बाधेत ततः सनि ग्रहगुहोश्चेत्यस्य प्रतिषेधस्याभावादनेनैव सनि विकल्पस्य सिद्धत्वात्पुनस्तन्न विदध्यात्।

इण्नि०। **सिद्धेति**। निरः कुष इत्यनेन।

तीष०। इषु इच्छायामिति केचित्तौदादिकमुदितमधीयते। अन्ये तूदित्त्वस्य

उ०—मध्येऽपवादा इति वेत्यर्थः। **वलादिमात्रेति**। अयं तु कित्त्वलक्षणोऽपीति भावः। वलादिमात्रविषयत्वेन वलादिलक्षणशब्दस्यैकाज्लक्षणे लक्षणापत्त्याऽयं पाठो न युक्तः। **पूर्वविप्रतिषेध इति**। एवं च पूर्वविप्रतिषेधेन निषेधो भवतीति भाष्यं वाक्यशेषाध्याहारेण व्याख्येयमिति भावः। अत्र पक्षे पूर्वविप्रतिषेधाश्रयणे गौरवात्समाध्यन्तरमेवाऽऽह—**अथवेति**। इदमेव मुख्यं समाधानम्।

इण्निष्ठायाम्। भाष्ये—**आरम्भसामर्थ्याद्विभाषा लभ्यत इति**। विप्रतिषेधबाधनद्वारेति भावः। नचैवं निरः कुषोऽनिष्ठायामित्येव सूत्रमस्तु। यस्य विभाषेत्यस्य प्राप्त्या निष्ठायां विकल्पप्राप्तेरनिष्ठायामित्यस्य वैयर्थ्यप्रसक्तेः। सामर्थ्येनाऽऽनुमानिकवचनकल्पने तु न किंचिल्लाघवम्। पर्युदासेन कृत्येव विकल्प इति शङ्काव्यावारणार्थं तदित्याहुः।

तीषसह०। **केचिदिति**। वामनादयः। **अपश्यन्त इति**। न च 'उदि-

---

* ७. २. १२. × ७. २. ४१. + ७. २. ४६.

इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः ॥ १ ॥

इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधो वक्तव्यः । इह मा भूत् । प्रेषिता प्रेषितुम् प्रेषितव्यम् ।

वसतिक्षुधोरिट् ॥ ७ । २ । ५२ ॥

इडिति+ वर्तमाने पुनरिड्ग्रहणं किमर्थम् ।

पुनरिड्ग्रहणं नित्यार्थम् ॥ १ ॥

इडिति वर्तमाने पुनरिड्ग्रहणं क्रियते नित्यार्थम् । नित्यार्थोऽयमारम्भः ।

गमेरिट्परस्मैपदेषु ॥ ७ । २ । ५८ ॥

गमेरिट्परस्मैपदेषु चेत्कृत्युपसंख्यानम् ॥ १ ॥

गमेरिट्परस्मैपदेषु चेत्कृत्युपसंख्यानं कर्तव्यम् । जिगमिषिता जिगमिषितुम् जिगमिषितव्यम् । तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । अविशेषेण गमेरिडागममुक्त्वाऽऽत्मनेपदपरे नेति वक्ष्यामि ।

आत्मनेपदपरप्रतिषेध उक्तम् ॥ २ ॥

किमुक्तम् । आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेध इति× । इहाप्यात्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः । तत्परपरे तावत् । संजिगंसिष्यते । सीयुटि । संगंसीष्ट । एकादेशे । संगंस्यन्ते । एकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति ।

सिद्धं तु गमेरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ॥३॥

प्र०—प्रयोजनमपश्यन्त इष इच्छायामिति पठन्ति । ये त्विह तीषुसहेति पठन्ति तन्मतेनेह विशेषणार्थ उकारः । तत्र वार्तिककारमतेन त्रयोऽपीषयोऽननुबन्धका इह च तीषसहेति पाठस्तदाह—**इषेरिति** । इष आभीक्ष्ण्य इत्यस्य क्रैयादिकस्य तु विकल्पमिच्छति वार्तिककारः । तौदादिकस्य तूदित्त्वेऽभ्युपगम्यमाने तीषसहेति पाठेऽननुबन्धकपरिभाषया क्रैयादिकस्यैव ग्रहणं स्यात् । इह **मा भूदिति** । विकल्पः । तेनेष गतावित्यस्मात्तकारादौ नित्यमिड् भवति ।

गमे० । सिद्धं त्विति । इह तु जिगमिषितेवाऽऽचरति जिगमिषित्रीयत इति बहिरङ्ग-

---

उ०—तो वा ' इति फलम् । क्त्व इड्विकल्पस्यानेनैव सिद्धत्वादिति भावः । **तन्मतेनेति** । क्त्यादेर्विकल्पासिद्ध्याऽयं पाठो न युक्तः । **क्रैयादिकस्यैवेति** । न तु तौदादिकस्येत्यर्थः । तस्मात्तौदादिकस्योदित्पाठो न युक्तः ।

गमेरिट् । सिद्धं त्वितीति । सूत्रस्थपरस्मैपदग्रहणं फलोपहितात्मनेपदनिमित्तत्वाभावोपलक्षणम् । तेन संजिगमिषितेत्यादौ तृजन्त इट् सिद्धिरिति बोध्यम् ।

+ ७. २. ४७. × ७. २. ३६.

सिद्धमेतत्। कथम्। गमेरात्मनेपदेन समानपदस्थस्येण्न भवतीति वक्तव्यम्।

न वृद्भ्यश्चतुर्भ्यः ॥ ७। २। ५९ ॥

वृतादिप्रतिषेधे च ॥ १ ॥

किम्। कृत्युपसंख्यानं कर्तव्यम्। विवृत्सिता विवृत्सितुम् विवृत्सितव्यम्। तत्तर्ह्युपसंख्यानं कर्तव्यम्। न कर्तव्यम्। अविशेषेण वृतादिभ्य इट्प्रतिषेधमुक्त्वाऽऽत्मनेपदपर इड् भवतीति वक्ष्यामि।

आत्मनेपदपर इड्वचने तत्परपरस्मीयुडेकादेशेष्विड्वचनम् ॥ २ ॥

आत्मनेपदपर इड्वचने तत्परपरस्मीयुडेकादेशेष्विड् वक्तव्यः। तत्परपरे तावत्। विवर्तीषिष्यते। स्मीयुटि। वर्तिषीष्ट। एकादेशे। वर्तिष्यन्ते वर्धिष्यन्ते।

सिद्धं तु वृतादीनामात्मनेपदेन समानपदस्थस्येड्वचनात् ॥ ३ ॥

सिद्धमेतत्। कथम्। वृतादीनामात्मनेपदेन समानपदस्थस्येड् भवतीति वक्तव्यम्।

चतुस्तासिकल्पिग्रहणानर्थक्यं च ॥ ४ ॥

चतुर्ग्रहणं चानर्थकं सर्वेभ्यो हि वृतादिभ्यः प्रतिषेध इष्यते। तासिग्रहणं* चानर्थकम्। किं कारणम्।

प्र०—त्वादात्मनेपदस्य प्रतिषेधाभावः। केचित्तु योगविभागेनेष्टसिद्धिमाहुः। गमेः सकारादाविड् भवतीत्येको योगः। ततः परस्मैपदेष्विति द्वितीयो योगो नियमार्थः। तुल्यजातीयापेक्षत्वाच्च नियमस्याऽऽत्मनेपदविषय एवेण्निवर्त्यत इति कृति परस्मैपदलुकि चेड् भवत्येव जिगमिषितुम्। जिगमिषितव्यम्। जिगमिषत्वमिति।

न वृद्भ्यश्चतुर्भ्यः। सिद्धं त्विति। तेन परस्मैपदलुक्यपि प्रतिषेधो भवति विवृत्सत्वमिति। अन्यथा न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधः स्यात्। विवृत्सित्रीयत इत्यत्र तु पूर्ववदात्मनेपदस्य बहिरङ्गत्वादिडभावः। **चतुर्ग्रहणं चेति**। कृपू सामर्थ्य इत्य-

---

उ०—**बहिरङ्गत्वादिति**। वार्तिकेऽन्तरङ्गत्वाद्गमिनिमित्तात्मनेपदस्यैव ग्रहणमिति भावः। **नियमार्थ इति**। परस्मैपद एवेति नियमार्थ इति भावः। तदाह—**तुल्येति**। **परस्मैपदलुकि चेति**। परस्मैपदे पर इत्यर्थेन लुमतेति निषेधेन तत्परत्वाभावान्न स्यादिडिति भावः। यद्यप्यङ्गस्येत्यस्यानुवृत्तस्याऽऽर्धधातुकस्येत्यादावङ्गनिमित्तस्येत्यर्थस्य क्लप्ततया गमेः परस्याङ्गनिमित्तस्य सादेरार्धधातुकस्येत्यर्थादिणनिरूपिताङ्गस्यात्रोद्देश्यकोटौ प्रवेशाभावेन न लुमतेत्यस्य न प्राप्तिस्तथाऽपि परस्मैपदस्य प्रत्ययतया तदाक्षिप्ताङ्ग एव तत्प्रवृत्त्या प्रत्यये परतः पूर्वकार्यसत्त्वेन च स्यादेव निषेध इति भावः। भाष्ये कृतीत्युपलक्षणं बोध्यम्।

न वृद्भ्यः। सिद्धं त्वितीति। अत्रापि परस्मैपदग्रहणं फलोपहितात्मनेपदनि-

---

* ७. २. ६०.

निवृत्तत्वात्सकारस्य ॥ ५ ॥

निवृत्तं सकारादाविति÷ । तास्ग्रहणे चेदानीमक्रियमाणे क्लृपिग्रहणेनापि* नार्थः । एषोऽपि हि वृतादिः पञ्चमः । भवेत्क्लृपिग्रहणं न कर्तव्यं तास्ग्रहणं तु कर्तव्यम् । यद्धि तत्सकारादाविति न तच्छक्यं निवर्तयितुं तृच्यपि हि प्रसज्येत । वर्तिता वर्धिता । तास्ग्रहणे चेदानीं क्रियमाणे क्लृपिग्रहणमपि कर्तव्यमन्येभ्योऽपि वृतादिभ्यस्तासौ मा भूदिति । भवेत्तास्ग्रहणं कर्तव्यं क्लृपिग्रहणं तु नैव कर्तव्यम् । अन्येभ्योऽपि वृतादिभ्यस्तासौ कस्मान्न भवति । परस्मैपदेष्विति* वर्तते क्लृपेरेव च तास्परस्मैपदपरो नान्येभ्यो वृतादिभ्यः । यद्येवं तास्ग्रहणेनापि नार्थः । तृचि कस्मान्न भवति । परस्मैपदेष्विति वर्तते ।

प्र०—स्यानन्तरं वृत्करणं पठ्यते तद् द्युतादीनां वृतादीनां च समाप्त्यर्थं भविष्यति । एकस्यानेकप्रयोजनाविरोधात् । **सर्वेभ्य इति** । संकल्प्स्यतीत्यादौ क्लृपेरपीत्यर्थः । **भवेत्तास्ग्रहणमिति** । क्लृपिग्रहणाकरणपरमेतन्नतु तासिग्रहणपरम् । तथा चास्यापि प्रत्याख्यानं करिष्यते । **परस्मैपदेष्विति वर्तत इति** । वृतादीनामनुदात्तेत्त्वात्स्यसनौ विहाय क्लृपेस्तासिं चाऽऽर्धधातुकं वलादि परस्मैपदपरं नास्ति । एतच्च यथान्या-

---

उ०—मित्तत्वाभावलक्षकमित्यादि प्राग्वत् । **समाप्त्यर्थमिति** एवं चेह चतुर्ग्रहणमुत्तरसूत्रं च न कर्तव्यमित्यर्थः । **संकल्प्स्यतीति** । तासि चेति चेन सादेरप्यनुकर्षणादिति भावः । एवं च चतुर्ग्रहणाभावे तासि चेति चोऽपि व्यर्थ इति तात्पर्यम् । भाष्ये—**निवृत्तं सकारादाविति** । न वृद्भ्य इति सूत्र एवेत्यर्थः । अत एव वक्ष्यति तन्निवृत्तौ वर्तितेत्यादावपि प्राप्नोतीति । परस्मैपदेष्वित्यनुवर्तमाने कथमन्येभ्यस्तासि निवृत्तिस्तदाह—**वृतादीनामिति** । तासिं चाऽऽर्धधातुकमित्यत्र विहायेति शेषः । वृद्भ्यः स्यसनोर्लुटि च क्लृप इति परस्मैपदं स्यादिविषये विकल्पेन विधीयत इति तत्रैवेटः प्रतिषेध इति परस्मैपदग्रहणानुवृत्तौ चतुर्ग्रहणं तासि च क्लृप इति सूत्रं च न कार्यमिति भावः । न च स्यन्तस्यतीत्यादावुदिल्लक्षणविकल्पबाधनार्थं चतुर्ग्रहणम् । तत्र हि सति तत्सामर्थ्यात्पुनर्विधानकल्पनद्वारा प्रत्येकं निषेधव्यापारबोधनद्वारा वा तस्यापि निषेध इति वाच्यम् । न वृद्भ्य इत्यनेन परत्वात्तद्बाधसिद्धेः । निषेधाश्च बलीयांस इति न्यायाच्च । न चैवमपि विवृत्सितेत्यनुरोधेन परस्मैपदपदस्य फलोपहितात्मनेपदनिमित्तत्वाभावोपलक्षणत्वावश्यकत्वेन वर्तितेत्यादावतिव्याप्तिवारणाय तत्र सादेरित्यनुवृत्त्यावश्यकतया तासि चेत्यावश्यकमिति वाच्यम् । इष्टापत्तेः । अत एव पूर्वं भवेत्तास्ग्रहणं कर्तव्यं क्लृपिग्रहणं तु नैव कर्तव्यमिति भाष्य उक्तम् । यद्येवं तास्ग्रहणेनापीति भाष्यं तु सिद्धान्त्येकदेश्युक्तिरिति बोध्यम् । तद्ध्वनयन्नाह—**एतच्चेति**।

÷ ७. २. ५७. ७. २. ६०. * ७. २. ५८.

उपदेशेऽत्वतः ॥ ७ । २ । ६२ ॥

तासावत्वत्प्रतिषेधे घसेः प्रतिषेधप्रसङ्गोऽकारवत्त्वात् ॥ १ ॥

तासावत्वत्प्रतिषेधे घसेः प्रतिषेधः प्राप्नोति । जघासिथ+ । किं कारणम् । अकारवत्त्वात् । सोऽपि ह्यकारवान् ।

सिद्धं तु हलादिग्रहणात् ॥ २ ॥

सिद्धमेतत् । कथम् । हलादिग्रहणं कर्तव्यम् । तच्चावश्यं कर्तव्यम् । अटचशी प्रयोजयतः । अटचशी तावन्न प्रयोजयतः । किं कारणम् । तासावनिट इत्युच्यते सेटौ चेमौ तासौ । अञ्ज्वशू तर्हि प्रयोजयतः । अञ्ज्वशू चापि न प्रयोजयतः । किं कारणम् । तासौ नित्यानिट इत्युच्यते विभाषितेटौ चैतौ* । अदिस्तर्हि प्रयोजयति । आदिथ । क्रियमाणेऽपि वै हलादिग्रहणेऽत्र प्राप्नोति । जघसिथ । एषोऽपि हलादिः ।

तस्य चाभावात्तासौ ॥ ३ ॥

प्र०—साश्रयेणोच्यते । यदा त्वात्मनेपदेन समानपदस्थस्येड् भवतीत्युच्यते तदा परस्मैपदेष्विति नानुवर्त्यमिति । स इत्येतदनुवर्त्यम् । तस्मिन्ननुवर्तमाने तासि चेत्यपि कर्तव्यम् । क्लप इत्येतत्तु न कर्तव्यम् । क्लपेरन्येभ्यो वृतादिभ्यस्तासेरात्मनेपदपरत्वादिटोऽभावात् ।

उपदेशे० । **तासाविति** । तासाविडभावे सत्यत्वतस्थलि प्रतिषेधे विधीयमान इत्यर्थः । **सिद्धं त्विति** । उपदेशग्रहणेन द्वयं संबध्यत उपदेशे योऽत्वान् हलादिश्चेति । नच घसिरयुपदेशे हलादिः । **अञ्ज्वशू तर्हीति** । अशू व्याप्तावित्यस्यानुदात्तेत्त्वात्थलभावादुपन्यासोऽयुक्तः । **क्रियमाणेऽपीति** । यद्यपि स्थान्युपदेशे घसिर्हलादिर्न भवति तथाऽपि स्वोपदेशे हलादिरेव । **तस्य चाभावादिति** । उप-

---

उ०—**स इत्येतदिति** । परस्मैपदग्रहणस्योक्तार्थोपलक्षणत्वाभावे चेत्येतदपि द्रष्टव्यम् ।

उपदेशेऽत्वतः । ननु हलाहिग्रहणेऽपि घसेः प्रतिषेधः प्राप्नोत्येवेत्यत आह—**उपदेशग्रहणेनेति** । **न च घसिरिति** । उपदेशत्वावच्छेदेन यो हलादिरित्यर्थः । **आद्युपदेश इति** । आद्य उपदेश इत्यर्थः । आदिश्चासावुपदेशश्चेति विग्रहः । अद्युपदेश इति पाठस्तु सुगम एव । **अनुदात्तेत्त्वादिति** । वस्तुतस्तु भाष्यप्रामाण्येनास्याप्यनुदात्तेत्वाभावमप्याश्रित्य परस्मैपदं थलस्त्येवेति बोध्यम् । भाष्ये—**आदिथेति** । केचित्त्विदित्यर्तिव्ययतीनामिति नित्येटैव सिद्धेऽत्र हलादेरित्यस्य प्रयोजनं चिन्त्यमित्याहुः । तत्राद्ग्रहणं न कार्यमिति भाष्याशयमन्ये । **तथाऽपि स्वोपदेश इति** । अस्योपदेशग्रहणस्याचस्तास्वदित्यत्राप्यपकर्षणेन तत्र चक्षिङः ख्यादेशेऽजेर्व्यादेशे च चख्याथ

+ २. ४. ४०. * ७. २. ४४.

तासावनिट इत्युच्यते न च घसिस्तासावस्ति । ननु च यस्तासौ नास्त्यनिडप्यसौ तासौ भवति । नैवं विज्ञायते यस्तासावनिडिति । कथं तर्हि । यस्तासावस्त्यनिट् चेति । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । सप्तम्यर्थेऽपि वै वतिर्भवति । तद्यथा । मथुरायामिव मथुरावत् । पाटलिपुत्र इव पाटलिपुत्रवत् । एवं तासाविव तास्वत् ।

प्र०—माने दृष्टानां धर्माणामुपमेये भूतानां भाविनां वा संप्रत्ययः । तत्र तास्वत्थलि नेट् भवतीत्युच्यमाने यदि घसिस्तासौ स्यात्ततस्थलि प्रतिषेधोऽतिदिश्येत । यतस्तु तासौ नास्ति ततोऽस्य तासावनिट्त्वमशक्यं प्रतिपत्तुमिति थल्यतिदेशो न प्रवर्तते । **अनिडप्यसाविति** । असत्त्वादेवेडभावात् । **सप्तम्यर्थ इति** । तासाविव तास्वदित्यौपश्लेषिकमधिकरणमाश्रीयते तासौ परतः पूर्वस्य यथेण्न भवति तथा थल्यपीत्यर्थः । ननु चास्य स्थान्यदिस्तासावस्ति स चानिट् चेति तदादेशस्यापि स्थानिवद्भावात्सत्त्वानिट्त्वे स्याताम् । नैतदस्ति । स्थानिवद्भावः शास्त्रीयेष्वेव कार्येषु प्रवर्तते । नच तासौ सत्त्वं शास्त्रीयं कार्यम् । अत एव वयेस्थल्युवयिथेति प्रतिषेधाभावः । क्रमेरपि चक्रमिथेति भाव्यम् । नहि तासौ नित्यानिट् क्रमिः । आत्मनेपद इडभावात्परस्मैपदे सेट्त्वात् ।

उ०—विवेथेत्यादिसिद्धय उपदेशत्वसामानाधिकरण्येनैवान्वयावश्यकत्वेनात्रापि तथैवान्वय उचितः । स्वोपदेश एव च मुख्य इति स एवाऽऽश्रीयते न स्थान्युपदेश इति भावः । ननु घसेस्तासावभावेऽप्यसत्त्वादेव तस्य तत्रेडभावोऽप्यस्तीत्यत आह— **उपमान इति** । यथोशीनरवन्मद्रेषु यवाः संपन्नाः संपत्स्यन्त इति वा प्रतीतिः । सर्वथोपमाने दर्शनमवश्याश्रयणीयमिति भावः । **अशक्यं प्रतिपत्तुमिति** । स्थानिवत्त्वं तु न । अशास्त्रीयत्वादिति भावः । एतदभिप्रायमजानतः प्रश्नो भाष्ये— **ननु च यस्तासाविति । तासौ परतः पूर्वस्येति** । तास्परधातोः परस्य वलाद्यार्धधातुकस्यार्थात्तासूरूपस्यैव यथेण् न भवति तथेत्यर्थः । तासौ परतः पूर्वस्य धातोर्यथेड् इड्निमित्तत्त्वं न भवति तथेत्यक्षरार्थः । **शास्त्रीयेष्विति** । प्रत्यासत्तेः । **न चेति** । लौकिकत्वात् । **वयेरिति** । वेञो वयिरिति लिटि वयादेशः । प्रतिषेधाभावाच्च क्रादिनियमान्नित्यमिड् भवति । **नहि तासाविति** । अनिट इत्यत्रापि प्रत्यासत्त्या तासावत्यध्याह्रियत इति बोध्यम् । अजन्तस्य धातोः प्रयोगमात्रावच्छेदेनेड्रहितस्याप्रसिद्धेः क्रानिडित्याकाङ्क्षोदयात् । एवं चाञेरिवास्यापि स्नुक्रमोरिति नियमेन पदभेदेन विभाषितेट्त्वेन नित्यानिट्त्वाभावान्न प्रतिषेध इति भावः ।

---

१ ख. तासौ सत्तायास्तत्सदृक्षेणाप्यतिदेष्टुमशक्यत्वादि° ।

ऋतो भारद्वाजस्य ॥ ७ । २ । ६३ ॥

किमर्थमिदमुच्यते नाचस्तास्वत्थल्यनिटो नित्यम् [७. २. ६१] इत्येव सिद्धम् । एवं तर्हि नियमार्थोऽयमारम्भः । ऋत एव भारद्वाजस्य नान्यतो भारद्वाजस्येति । क्व मा भूत् । ययिथ वविथेति ।

ऋतो भारद्वाजस्येति नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ॥ १ ॥

ऋतो भारद्वाजस्येति नियमानुपपत्तिः । किं कारणम् । अप्राप्तत्वात्प्रतिषेधस्य । गुणे कृते रपरत्वे चानजन्तत्वात्प्रतिषेधो न प्राप्नोति । असति नियमे को दोषः ।

तत्र पचादिभ्य इड्वचनम् ॥ २ ॥

तत्र पचादिभ्य इड् वक्तव्यः । पेचिथ शेकिथेति । यदि पुनरयं भारद्वाजः पुरस्तादपकृष्येत । अचस्तास्वत्थल्यनिटो नित्यं भारद्वाजस्य । उपदेशेऽत्वतो भारद्वाजस्य । तत ऋतः । भारद्वाजस्येति निवृत्तम । सिध्यत्येवमयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवति । एवं तर्हि ।

प्र०— **ऋतो** । **गुणे कृत इति** । जहर्थेत्यादौ नह्ययमजन्तो नाप्युपदेशेऽत्वान् । **असति नियम इति** । जहर्थेत्यादाविट्प्रतिषेधार्थ एव योगोऽस्त्विति भावः । **तत्र पचादिभ्य इति** । पूर्वयोगाभ्यां पचादिभ्यस्थलि नित्ये प्रतिषेधे प्राप्ते पक्ष इड्विधेयः । जहर्थेत्यादौ च नित्यः प्रतिषेध इष्यते । तत्र भारद्वाजस्येति वचनात्स्मृत्यन्तरानुसंधानाद्विकल्पः प्राप्नोति । नियमफलमन्यथोपपादयितुमाह—**यदि पुनरिति** । पूर्वयोगे भारद्वाजग्रहणं कृत्वा तदेव द्वितीये योगेऽनुवर्त्यते । **स्वस्मान्मतादिति** । भारद्वाजस्य मतम् । पेचिथ पपिथेतीट् भवत्येव । अन्येषां तु मतं पपक्थ पपाथे-

---

उ०— **ऋतो भार०** । भाष्ये **नाचस्तास्वदिति** । न च ऋकारान्ते विकल्पेन निषेधार्थमिदं सूत्रमिति वाच्यम् । भारद्वाजातिरिक्तैरप्यचस्तास्वदिति सामान्यसूत्रप्रणयनेन निषेधस्यैवाङ्गीकृतत्वेन स्मृत्यन्तरानुसंधानद्वारेण विकल्पस्य वक्तुमशक्यत्वादिति भावः । भाष्ये पेचिथेत्युपलक्षणं पपिथेत्यादेरपि तदाह—**पूर्वयोगाभ्यामिति** । नियमपक्षे हि तास्वत्थल्यनिटो नित्यमित्यनुवर्त्य योऽयं तासौ नित्यानिटस्थलीण्निषेधः स भारद्वाजमते ऋकारान्तस्यैव नान्यस्य भारद्वाजमत इत्यर्थात् । उभयोरपि नियमाङ्गीकारादिति भावः । इदं चाचस्तास्वदिति सिद्धे नियम इत्युपक्रम उक्तेस्तत्र पचादिभ्य इड्वचनमित्युक्तेश्च विज्ञायते । एतेन सजातीयत्वाद्दकारान्ते तस्यैव प्राप्तेश्चाचस्तास्वदितस्यैव नियम इत्यपास्तम् । स्वयं दोषान्तरमप्याह—**जहर्थेत्यादौ चेति** । अचस्तास्वदित्यस्याप्राप्त्या पूर्वोक्तयुक्त्या विकल्पासंभवस्य वक्तुमशक्यत्वादिति भावः । अत्रत्यं भारद्वाजग्रहणं कथं व्यवहितपूर्वयोगेऽपकर्षेण संबध्येतेत्यत आह—**पूर्वयोग इति** । **मतविपर्यय**.

योगविभागात्सिद्धम् ॥ ३ ॥

योगविभागः करिष्यते+ । अचस्तास्वत्थल्यनिटो नित्यमुपदेशे । ततोऽत्वतः । अत्वतश्चोपदेश इति ।

बभूथाऽऽततन्थ जगृभ्म ववर्थेति निगमे ॥ ७ । २ । ६४ ॥

वृग्रहणं किमर्थं न कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि [७. २. १३] इत्येव सिद्धम् । एवं तर्हि नियमार्थोऽयमारम्भः । निगम एव यथा स्यात् । क्व मा भूत् । ववरिथ ।

प्र०—तीडभावः । न्यासविपर्यये तु मतविपर्ययः प्रदर्शितः स्यात् । ननु च नित्येषु शब्देषु विकल्पिते विधौ विकल्पमात्रं प्रदर्शयितव्यम् । तत्र कस्य किं मतं यत्प्रच्यावितं स्यात् । उच्यते । विकल्पप्रतिपादनाय वाग्रहण एव कर्तव्ये पूजार्थमाचार्या उपादीयन्ते । सा चैवं पूजा भवति । यदि येनाऽऽचार्येण यः शब्दः स्मृतः स तेनैव स्मृतत्वेनोपदिश्यते । एवं हि तस्य स्मर्तृत्वेन प्रमाणत्वेन स्तुतिः कृता भवत्येवं चाङ्गार्ग्यगालवयोरित्यादावनेकाचार्योपादानमर्थवद्भवति । विकल्पस्यैकाचार्योपादानेनापि सिद्धत्वात् । **योगविभाग इति** । ततश्च हरत्यादीनां गुणरपरत्वयोरनजन्तत्वेऽप्युपदेशेऽजन्तत्वात्सिद्धे प्रतिषेधेऽस्य नियमार्थत्वोपपत्तिः । आदेशोपदेशोऽप्याश्रीयते न तु स्थान्युपदेश एवेत्यजत्यादेशस्य वीशब्दस्य चक्षिङादेशस्य च ख्यो विकल्पस्थलि भवति । विवेथ विवयिथ । आचख्याथ । आचख्यिथ ।

बभूथाऽऽततन्थ । वृग्रहणमिति । एकदेशाक्षेपद्वारेण ववर्थशब्दसमुदाय एवाऽऽक्षिप्यते ।

उ०—**इति** । भारद्वाजस्येडभावोऽन्यस्येडित्याकारः । **ननु चेति** । विकल्पप्रतिपादनमात्रफलत्वाद्वाचार्यग्रहणस्येति भावः । **ततश्चेति** । योगविभागद्वारा चोपदेशग्रहणापकर्षः कार्य इति बोध्यते । अत एव सूत्रेऽज्ग्रहणं चरितार्थम् । नन्वेजन्तानामात्वविधानात्तेषामसंभवेनाग्रहणमेव कार्यं तत्राकारमात्रग्रहणे कार्ये प्रत्याहारग्रहणसामर्थ्यादिकारावंशे भूतपूर्वगतिराश्रयिष्यत इति सूत्रस्थाच्पदमुपदेशग्रहणापर्षश्च वृथेति चेन्न । प्रत्याहारग्रहणेनोपदेशपदापकर्षणस्यापि वक्तुं शक्यत्वेन भूतपूर्वगत्याश्रयणे दृढतरमानाभाव इत्याशयात् । तदपकर्षे च धेट्टो दधिथेत्यादिसिद्ध्येऽच्ग्रहणमप्यावश्यकमेवेति दिक् । **नतु स्थान्युपदेश एवेति** । यस्य यो मुख्य उपदेशस्तस्य स एवाऽऽश्रीयते तदभावे तु गौणोऽपीत्यर्थः । यद्यपि स्थान्युपदेशग्रहणेऽप्युपदेशेऽत्वत्त्वमास्ति तथाऽपि तदुपदेशे तासौ नित्यानिट्त्वाभावः प्रत्यासत्त्या यदुपदेशेऽत्वांस्तदुपदेशविशिष्टस्यैव तासौ नित्यानिट्त्वग्रहणमुचितमिति भावः । तुष्टोथेत्यादौ तु पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादस्यापि क्रादिनियमेन निषेध इति नेड्वशीत्यत्र भाष्य उक्तम् ।

बभूथाऽऽत० । भाष्ये **वृग्रहणं किमर्थमिति** । भूविषये तु न शङ्कितम् ।

+ ७. २. ६२.

वस्वेकाजाद्घसाम् ॥ ७ । २ । ६७ ॥

किमर्थमिदमुच्यते ।

वस्वेकाजाद्घसांवचनं नियमार्थम् ॥ १ ॥

नियमार्थोऽयमारम्भः । वस्वेकाजाद्घसामेव । क्व मा भूत् । बिभिद्वान् । किमुच्यते नियमार्थमिति न पुनर्विध्यर्थोऽपि स्यात् । प्रतिषेधोऽपि ह्यत्र प्राप्नोति नेड् वशि कृति [७.२.८.] इति । कृच्चैव ह्ययं वशादिश्च । एवं तर्हि कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि [७.२.१३] इत्येतस्मान्नियमादत्रेड् भविष्यति । नात्र तेन परिप्रापणं प्राप्नोति । किं कारणम् । प्रकृतिलक्षणस्य* प्रतिषेधस्य स प्रत्यारम्भः प्रत्ययलक्षणश्चायं प्रतिषेधः । उभयोः स प्रत्यारम्भः । कथं ज्ञायते । वृङ्वृञोर्ग्रहणात् । कथं कृत्वा ज्ञापकम् । इमौ वृङ्वृञावुदात्तौ तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति । पश्यति त्वाचार्य उभयोः स प्रत्यारम्भ इति ततो वृङ्वृञोर्ग्रहणं करोति । न खल्वपि कश्चिदुभयवान्प्रतिषेधः प्रकृतिलक्षणः प्रत्ययलक्षणश्च । तुल्यजातीयेऽसति यथैव प्रकृतिलक्षणस्य नियामको भवत्येवं प्रत्ययलक्षणस्यापि नियामको भविष्यति । अथ यावता वसावेकाज्भ्य इटा भवितव्यं कोन्वत्र विशेषो नियमार्थे वा सति विध्यर्थे वा । न खलु कश्चिद्विशेषः । आहोपुरुषिकामात्रं तु भवानाह विध्यर्थमिति । वयं तु ब्रूमो नियमार्थामिति ।

प्र०— वस्वेका०। किमर्थमिति । यदि क्रादिनियमः प्रकृत्याश्रयस्य प्रत्ययाश्रयस्य च प्रतिषेधस्य निवर्तकस्तत इदं नियमार्थम् । अथ प्रकृत्याश्रयस्यैव ततो नेड् वाशि कृतीति प्रतिषेधे प्राप्ते निध्यर्थमित्युभयसंभवात्प्रश्नः । **न खलु कश्चिदिति** । उभयथैकाजाद्घसिभ्य इटा वसोर्भाव्यम् । नान्येभ्यो बिभिद्वानित्यादावित्यर्थः । **आहोपुरुषिकामात्रमिति** । अहो अहं पुरुष इति यस्याभिमानः सोऽहोपुरुष उच्यते । यथा यर्वाणस्तर्वाणो नामर्षयो बभूवुरित्युक्तम् । तस्य भावो मनोज्ञादित्वाद्वुञ् । क्वस्वभिप्रायेणैतदुच्यते । **न खलु कश्चिद्विशेष इति** । अन्यत्र विशेषोऽस्त्येव । यदि क्रादिनियमः

उ०—उकारान्तानां सेट्त्वात् । यथा चैतत्तथैकाच उपदेश इत्यत्र निरूपितम् । अस्य तु कृसृभृ इति निषेधाल्लिट्यनिट्त्वं बोध्यम् ।

वस्वेकाजाद्घसाम् । विधिनियमयोर्विशेषाभावं दर्शयति—**उभयथेति** । कथं तदभिमानवांस्तच्छब्दवाच्यो भवतीत्यत्राऽऽह—**यथा यर्वाण इति** । यथा तत्प्रयुञ्जानाः साहचर्यात्ताभ्यां शब्दाभ्यामभिधीयेते तथाऽहो अहं पुरुष इत्यभिमानवांस्तेन शब्देनाभिधीयत इत्यर्थः । **तस्य भाव इति** । स चाभिमान एव । कृसृभ्रित्यस्योभयप्रत्यारम्भत्वं नैतस्य नियमार्थत्वायैव किंत्वन्यार्थमपीत्याह—**अन्यत्र विशेषोऽस्त्ये-**

---

* ७. २. १०.

अथैकाज्ग्रहणं किमर्थम् । इह मा भूत् । बिभिद्वान् चिच्छिद्वानिति । क्रियमाणेऽपि वा एकाज्ग्रहणेऽत्र प्राप्नोति । एषोऽपि ह्येकाच् । एवं तर्हि कृते द्विर्वचने य एकाच् । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । एकाज्ग्रहणसामर्थ्यात् । न हि कश्चिदकृते द्विर्वचनेऽनेकाजस्ति यदर्थमेकाज्ग्रहणं क्रियते । ननु चायमस्ति जागर्तिः । जागृवांसो अनुग्मन् । यत्तर्ह्योकारग्रहणं करोति न हि कश्चिदकृते द्विर्वचन आकारान्तोऽनेकाजस्ति । ननु चायमस्ति दरिद्रातिः । न दरिद्रातेरिटा भवितव्यम् । किं कारणम् । उक्तमेतद्दरि-

---

प्र०—प्रकृत्याश्रयस्य प्रतिषेधस्य स्यात्ततो युयुविवेत्यादौ इ्युकः कितीति प्रतिषेधः स्यात् । वृग्रहण च क्रादिसूत्रेऽनर्थक स्यादिति प्रत्ययाश्रयोऽपि प्रतिषेधः क्रादिनियमेन निवर्त्यत इति सूत्रमिद नियमार्थमेव । **अथैकाज्ग्रहणमिति** । क्रियमाणमप्येकाज्ग्रहणमनिष्टनिवृत्तये नालमिति मत्वा प्रश्नः । **बिभिद्वानिति** । कृतद्विर्वचनानामनेकाचां निवृत्त्यर्थमित्यभिप्रायः । **एकाज्ग्रहणसामर्थ्यादिति** । यद्यपि नित्यत्वाद्द्विर्वचने कृतेऽनेकाच्त्वाद्दिण्न भवतीति परिहारोऽस्ति तथाऽपि परिहारान्तरसद्भावान्नोक्तः । तथा हि द्विर्वचनस्यावकाशः पपाचेति । इटोऽवकाशो यत्र कृते द्विर्वचन एकाच्त्व पेचिवानादिवानिति । बिभिद्वानित्यादौ तु नित्यत्वादद्विर्वचन पूर्वम् । **जागर्तिरिति** । उषविदजागृभ्योऽन्यतरस्यामिति विकल्पितत्वादामो जागर्तेः परः क्रसुः । चिरिजिरिचिकास्त्यादिभ्यस्तु कास्यनेकाज्ग्रहण चुलुम्पाद्यर्थमित्यामा भाव्यमिति क्रसोः परस्यासंभवः । **जागृवांस इति** । द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यमिति द्विर्वचनाभावः । **न दरिद्रातेरिति** । दरिद्रातेरनित्य आमित्यात औ णल इत्योकारे विधातव्य औकारविधानेन ज्ञापितमोकारस्य प्रश्लिष्टावर्णत्वादुच्चारणे लाघवं भवत्यौकारस्य

उ०—वेति । **नियमार्थत्वमेवेति** । अत एव भाष्य उक्तम्—वय तु ब्रूमो नियमार्थमिति । न्यायसिद्धत्वादित्यर्थः । पपिवानित्यादावालोपसिद्धिस्तु सनिपातपरिभाषाया अनित्यत्वादिति बोध्यम् । **अनिष्टनिवृत्तये नालमिति** । भिद्वासित्यस्यामवस्थायामेकाचत्वान्नियमव्यावर्त्यविषयाभावादनर्थक तदित्यर्थः । इट्द्विर्वचनयोरन्यतरस्य निरवकाशत्वे तदेव स्यान्न तु नित्यमत उभयोरवकाशं दर्शयति—**तथा हीति** । विषयभेदात्फलभेदाच्च मापवादत्वमित्याशयः । **नित्यत्वाद्द्विर्वचनामिति** । इट् तु कृते द्विर्वचनेऽनेकाचत्वादप्राप्तेरनित्यः । शब्दान्तरात्प्राप्नुवत इव शब्दान्तरेऽपि प्राप्नुवतोऽनित्यत्वान्नाय नियतः परिहार इति परिहारान्तराश्रयणामिति तत्त्वम् । **चिरीत्यादि** । मन्त्रे त्वेषां क्रस्वन्तानां प्रयोग एव नास्तीति भावः । जागृवांस इत्यत्र लिटि धातोरिति द्विर्वचनं स्यादत आह—**द्विर्वचनप्रकरण इति** । ननु दरिद्रातेः क्वसौ कास्यनेकाज्ग्रहणमित्यामा भाव्यमिति कथमिडुपक्षिप्तोऽत आह—**दरिद्रातेरिति** । **आकार-**

ङ्गातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति× । यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धोऽसाविड्विधौ । एवमपि भूतपूर्वगतिर्विज्ञायेत । आकारान्तो यो भूतपूर्व इति । एकाज्ग्रहणमेव तर्हि ज्ञापकम् । ननु चोक्तं जागर्त्यर्थमेतत्स्यात् । नैकमुदाहरणमेकाज्ग्रहणं प्रयोजयति । यद्येतावत्प्रयोजनं स्याज्जागर्तेर्नेत्येव ब्रूयात् ।

प्र०—तु विश्लिष्टावर्णत्वादोकाराद्विवृततरत्वाच्च गौरवमित्योकार एव विधेयः । तत्र वृद्धिरेचीति वृद्धौ कृतायां ययावित्यादि सिध्यति । ददरिद्रावितिं त्वाकारलोपे न सिध्यति । तदर्थमौकारविधानमनित्यत्वमस्मादामो ज्ञापयति । **सिद्धोऽसाविड्विधाविति** । क्वचित्तु सिद्धसिद्ध इति पाठः । सिद्धश्चासौ सिद्ध इति विशेषणसमासोऽत्यन्तसिद्ध इत्यर्थः । एकेन सिद्धशब्देन सामान्यसिद्धिः प्रतिपाद्यते द्वितीयेन तु विशेषसिद्धिः । **एवमपीति** । सांप्रतिकस्याकृतद्विर्वचनस्यानेकाच आकारान्तस्याभावाद्दरिद्राग्रहणे कर्तव्ये लाघवार्थमाद्ग्रहणं स्यादिति नैकमुदाहरणमाद्ग्रहणं प्रयोजयतीति नोक्तम् । **नैकमुदाहरणमिति** । ऊर्णोतेर्णुवद्भावादेकाच्त्वादेकाज्ग्रहणेनानिवृत्तिः । **जागर्तेर्नेति** । सूत्रमिदं नियमार्थम् । तत्र यद्यस्य जागर्तिरेव निवर्त्यः स्यात्तस्यैव साक्षात्प्रतिषेधं कुर्यात् । लघीयसी हि साक्षात्प्रतिपत्तिः । न च दरिद्रातिर्द्वितीयोऽनिवर्त्योऽस्यां ह्यवस्थायामाद्ग्रहणस्याकृतद्विर्वचनानेकाजाकारान्तार्थत्वाद्भूतपूर्वाकारान्ताश्रयात्स्यादेव तत इडागमः । यदा त्वेकाज्ग्रहणेन कृतद्विर्वचना एकाचो गृह्यन्ते तदाऽऽद्ग्रहणं कृतद्विर्वचनानेकाजाकारान्तार्थं पपिवानिति । सांप्र-

---

उ०—**लोप इति** । न च परत्वादौत्वे संनिपातपरिभाषया लोपो दुर्लभः । आर्धधातुके विवक्षिते तद्विधानेन लोपस्यान्तरङ्गत्वात् । न चैवमादन्तत्वाभावादौत्वस्याप्राप्तिः । औविधानसामर्थ्यादेव भूतपूर्वगत्याऽऽकारान्तत्वमाश्रित्य णल आदेशप्रवृत्तेः । **अनित्यत्वमिति** । अत एव कासृप्रत्ययादिति सूत्रे दरिद्रांचकारेति भाष्यप्रयोगः संगच्छत इति बोध्यम् । **सिद्धोऽसाविति** । एवं चाऽऽदन्तत्वाभावान्नास्य तत्र प्रवृत्तिरिति भावः । एकस्य सिद्धशब्दस्य पौनरुक्त्यपरिहारायाऽऽह—**अत्यन्तसिद्ध इति** । कथमेतदर्थलाभस्तत्राऽऽह—**एकेनेति** । एवं सिद्धिद्वयप्रतिपादनेऽत्यन्तसिद्धिरुक्ता भवतीत्यर्थः । **आकारान्तस्याभावादिति** । एकाच्पदस्य कृतद्विर्वचनैकाच्परत्वेन लक्षणायां तात्पर्यग्राहकत्वापेक्षया भूतपूर्वाश्रयणं लघीय इति भावः । ननूर्णोतेः सत्त्वान्नैकमित्ययुक्तमत आह—**ऊर्णोतेरिति** । **प्रतिषेधमिति** । वसोरजागुरिति न्यासः कार्य इति भावः । ननु तदपेक्षयैकाज्ग्रहणं नियमपरं लघ्वत आह—**लघीयसी हीति** । **अस्यां ह्यवस्थायामिति** । एकाज्ग्रहणेन कृतद्विर्वचनैकाचामग्रहणे इत्यर्थः । **अकृतेति** । आद्ग्रहणस्य तज्ज्ञापकत्वापेक्षया भूतपूर्वानेकाजाकारान्तार्थत्वं युक्तमिति भावः । **सांप्र-**

× ६. ४. ११४.

अथ घसिग्रहणं किमर्थं नैकाजित्येव सिद्धम् ।

घसिग्रहणमनच्कत्वात् ॥ २ ॥

घसिग्रहणं क्रियते लोपे कृतेऽनच्कत्वादिण्न प्राप्नोति । इदमिह संप्रधार्यम् । इट् क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वादिडागमः । नित्यो लोपः । कृतेऽपीटि प्राप्नोत्यकृतेऽपि+ । इडपि नित्यः । कृतेऽपि लोपे प्राप्नोत्यकृतेऽपि । अनित्य इण्न हि कृते लोपे प्राप्नोति । किं कारणम् । अनच्कत्वात् । एवं तर्हि द्विर्वचने कृतेऽभ्यासे योऽकारस्तदाश्रय इड् भविष्यति । न सिध्यति । किं कारणम् । द्वित्वाल्लोपस्य परत्वात् । द्विर्वचनं× क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वाल्लोपः । लोपे कृतेऽनच्कत्वाद्द्विर्वचनं न प्रामोति । घसिग्रहणे

प्र०—तिकाकारान्तसद्भावे भूतपूर्वगतिरयुक्ताऽऽश्रयितुम् । **अथ घसिग्रहणमिति** । द्विर्वचनेऽचीति स्थानिवद्भावः पूर्वप्रतिषेधाश्रयेण प्रत्याख्यायते । द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्य इति । तत्र घस् वस् इति स्थिते घसिभसोर्हलि चेति परमप्युपधालोपं पूर्वविप्रतिषेधेन बाधित्वा द्विर्वचनं भवति । तत्र कृते पुनःप्रसङ्गविज्ञानादुपधालोपः । ततः कृतद्विर्वचन एकाज्भवतीति सिद्ध इडागम इति मत्वा प्रश्नः । इतरस्तु स्थानिवद्भावारम्भात्पूर्वविप्रतिषेधो नाऽऽश्रितः । ततः परत्वान्नित्यत्वाद्वोपधालोपे कृत एकाच्त्वाभावान्न द्विर्वचनं स्यान्नापीडागम इति मत्वाऽऽह—**घसिग्रहणमनच्कत्वादिति** । **नित्यो लोप इति** । हल्यचि च विधानात् । इट् तु लोपे कृतेऽनच्कत्वान्न प्राप्नोतीत्यनित्यः । पूर्वविप्रतिषेधवाद्याह—**इडपि नित्य इति** । कृते द्विर्वचन उपधालोपे चाभ्यासाकाराश्रयेणैकाच्त्वात् । स्थानिवद्भाववाद्याह—**अनित्य इडिति** । पूर्वविप्रतिषेधवाद्याह—**एवं तर्हीति** । पूर्वस्मादपि विधौ स्थानिवदिति सर्वत्र नाऽऽश्रीयत इति स्थानिवद्भावादनेकाच्त्वामिति न चोदनीयम् । स्थानिवद्भाववाद्याह—**न सिध्यतीति** । **परत्वादिति** । नित्यत्वादित्यपि बोद्धव्यम् । **वचनादिति** । अपवादत्वादिति न बोद्धव्यम् । सत्यपि संभवे बाधनं भवतीति लोपद्विर्वचनयोरिटा बाधप्रसङ्गात्किंतु क्रमः प्रदर्श्यते । घसिग्रहणे क्रियमाणे कृताकृतप्रसङ्गित्वादिडागमो नित्यः कृतयोरपि लोपद्विर्वचनयोः प्रवर्तनात्सावकाशश्च

उ०—**तिकेति** । तत्र हीडागमं विनाऽऽकारलोपो दुर्लभ इति भावः । एवं च दरिद्रातेर्दरिद्रिवानित्येव । **प्रत्याख्यायत इति** । स्थानिवत्त्वं तु न । द्वित्वनिमित्ताज्जनिमित्तादेशाभावादिति भावः । **स्थानिवद्भावादिति** । अचः परस्मिन्नित्यनेन । सावकाशयोरेव नित्यत्वेन व्यवस्थेत्यत इटः सावकाशत्वं दर्शयति—**कृतयोरपीति** । इदं चिन्त्यम् । तत्प्राप्तिकालेऽवश्यं तयोः प्राप्तेः । तस्माद्धलि लोपं बाधित्वाऽपवादत्वादिटि पश्चादचि लोपः । तत आतिदेशिकं द्विर्वचनम् । औपदे-

---

+ ६. ४. ९८; १००. × ६. १. ८.

पुनः क्रियमाणे न दोषो भवति । कथम् । वचनादिट् भविष्यति । इटि कृते द्विर्वचनं क्रियतां लोप इति यद्यपि परत्वाल्लोपः स्थानिवद्भावाद्द्विर्वचनं भविष्यति*।

विभाषा गमहनविदविशाम् ॥ ७ । २ । ६८ ॥

दृशेश्चेति वक्तव्यम् । ददृश्वान् ददृशिवान् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । दृशेरितिx वर्तते ।

ऋद्धनोः स्ये ॥ ७ । २ । ७० ॥

स्वरतेर्वेट्त्वादृतः स्ये विप्रतिषेधेन ॥ १ ॥

स्वरतिलक्षणाद्वावचनादृतः स्य इत्येतद्भवति विप्रतिषेधेन+ । स्वरतिलक्षणस्य वावचनस्यावकाशः । स्वर्ता स्वरिता । ऋतः स्य इत्यस्यावकाशः । करिष्यते हरिष्यते । इहोभयं प्राप्नोति । स्वरिष्यति अस्वरिष्यत् । ऋतः स्य इत्येतद्भवति विप्रतिषेधेन ।

यमरमनमातां सक् च ॥ ७ । २ । ७३ ॥

किमुदाहरणम् । अयंसीत् व्यरंसीत् अनंसीत् अयासीत् अवासीत् । नैतदस्ति । नास्त्यत्र विशेषः सति वेटचसति वा । इदं तर्हि अयंसिष्टाम् । अयं-

---

प्र०—लोपोऽपि नित्यः । तत्र परत्वादिडागमः । ततो लोपः । ततो द्विर्वचनमिति सिद्धं जक्षिवानिति ।

विभाषा गमहन० । **दृशेरिति वर्तत इति** । विभाषा सृजिदृशोरित्यतः । इडत्त्यर्तिव्ययतीनामिति योगं प्रयोजनाभावादुल्लङ्घ्य वस्वेकाजाद्घसामित्यत्र विभाषाग्रहणसंबद्धं दृशिग्रहणमनुवर्तते ।

यमरम० । **किमुदाहरणमिति** । वृत्तिकारैरेकवचनान्तान्युदाहरणान्युपन्यस्तानि । तत्र विशेषं सगिटोरबुद्ध्वा पृच्छति । इतरस्तु वृद्ध्यभावं स्वरे च विशेषं मत्वैकवचनमेवोदाहरति—**अयंसीदिति**। **अयंसिष्टामिति** । न केवलमत्र वृद्ध्यभावो विशेषो यावत्सगिटोः

उ०—शिकस्य बाधेऽपीति भाष्यार्थमन्ये । न तिस्रिति ज्ञापकाद्भिन्नफलत्वे विषयभेदे वाऽनवकाशस्याप्यबाधकत्वम् । ज्ञापकान्न दोष इति युक्तं वक्तुम् । **ततो द्विर्वचनमिति** । द्विर्वचनेऽचीति रूपस्थानिवत्त्वात् ।

विभाषा ग० । **अनुवर्तत इति** । एकदेशे स्वरितत्वप्रतिज्ञानान्मध्ये फलाभावाच्च मण्डूकप्लुत्या दृशिग्रहणमात्रमनुवर्तत इति भावः । विभाषाग्रहणसंबद्धमित्यनेन मध्ये प्रयोजनाभावो दर्शितः । केवलस्यानुवृत्तौ हि नित्यविधानार्थं तत्रापि संबन्धः स्यात् । थलि विकल्पस्तु पूर्वसूत्रेणैव सिद्ध इति भावः ।

यमरमन० । **तत्र विशेषमिति** । सिगीड्भ्यां रूपस्य सिद्धत्वादिति भावः । **वृद्ध्यभावमिति** । अयंसीदित्यत्र हलन्तलक्षणाया नेटीति प्रतिषेधेन । स्वरविशे-

---

* १. १. ५९. x ७. २. ६५. + ७. २. ४४.

सिषुः । व्यरंसिष्टाम् व्यरंसिषुः । अनंसिष्टाम् अनंसिषुः । अयासिष्टाम् अयासिषुः । अवासिष्टाम् अवासिषुः । इदं चाप्युदाहरणम् । अयंसीत् व्यरंसीत् अनंसीत् अयासीत् अवासीत् । ननु चोक्तं नास्त्यत्र विशेषः सति वेट्यसति वेति । अयमस्ति विशेषः । यद्यत्रेण्न स्याद्वृद्धिः प्रसज्येत× । इटि पुनः सति नेटि [७. २. ४] इति प्रतिषेधः सिद्धो भवति । मा भूदेवं हूम्यन्तानामित्येवं÷ भविष्यति । अत्रापि नेटीत्यनुवर्तते । तच्चावश्यमिड्ग्रहणमनुवर्त्यमधाक्षीदित्येवमर्थम् । आकारान्ताश्चापि पदपूर्वा एकवचन उदाहरणम् । मा हि+ यासीत्* । यद्यत्रेण्न स्यादनुदात्तस्य ईटः श्रवणं प्रसज्ये(त) । इटि पुनः सत्युक्तमेतदर्थवत्तु सिचश्चित्करणसामर्थ्याद्धीट उदात्तत्वमिति× तत्रैकादेश उदात्तेनोदात्तः [८. २. ५] इत्युदात्तत्वं सिद्धं भवति ।

ईशः से ॥ ७ । २ । ७७ ॥

ईडजनोर्ध्वे च ॥ ७ । २ । ७८ ॥

किमर्थो योगविभागो नेशीडजनां ध्व इत्येवोच्येत । ईशो ध्वे मा भूदिति । इष्यत एव । ईशिध्व इति । ईडजनोस्तर्हि से मा भूदिति । इष्यत एव ।

प्र०—श्रवणमपि । **मा हि यासीदिति** । अयासीदित्यत्राट्स्वरो भवतीति तन्निवृत्त्यर्थो माङ्प्रयोगः । हिशब्दप्रयोगो हि चेति निघातप्रतिषेधार्थः । इट्यसत्याद्युदात्तं पदं स्यात् । सति तु तस्य सिज्भक्तत्वादुदात्तत्वादेकादेश उदात्तेनोदात्त इत्यन्तोदात्तं पदं भवति । तत्राऽऽदिः सिचोऽन्यतरस्यामिति पक्ष आद्युदात्तं पदं पक्षेऽन्तोदात्तम् । एतच्चानिटः पित उपसंख्यानमित्युपसंख्यानमनपेक्ष्य प्रयोजनमुक्तम् । तेन यथा मा हि कार्षमित्यत्र पर्यायेणाऽऽद्यन्तयोरुदात्तत्वं भवत्येवं मा हि यासीदित्यत्रासत्यपीटि भविष्यतीतीटो भावाभावयोः स्वरे भेदाभावः ।

ईशः । **इष्यत ईशिध्व इति** । एतदर्थमेव चकारेणेशिरनुकृष्यते । **ईडजनोस्तर्हीति** । कथं पुनरीडजनोरध्वे चेति सूत्रपाठे योगविभागेनेडजनोः सेशब्द इट्छक्यते निवर्तयितुम् । उच्यते । चकारेणेशेरनुकर्षणात्सकारादौ सेशब्द इतीटि

उ०—वस्तूत्तरत्र स्फुटी भविष्यति । आदन्तोदाहरण उपपदपूर्वत्वस्य फलं दर्शयति—**अयासीदित्यत्रेति** । **तत्राऽऽदिरिति** । अन्तोदात्ते प्राप्त इदमारभ्यते । **अनिटः पित इति** । अनिटः सिचः परस्य पित उदात्तत्वं भवतीति तदर्थः । एवं च यथास्थितसूत्रमतेऽयं दोष इति भावः ।

ईशः । अत्रेडजनोरध्वे चेति पाठे भाष्यम् । तत्र सादेः सार्वधातुकस्य सूत्र एवोपादानाच्चकारेणेशिरेवानुकृष्यत इत्याह—**एतदर्थमित्यादि** । अत एवाऽऽह—**कथं पुनरिति** । अत्र पाठे विपरीतं प्राप्नोत्येवेति भावः । **चकारेणेशेरनुकर्षणादिति** ।

× ७. २. ३. – ७. २. ५. + ८. १. ३४. * ६. १. १८७. × ३. १. ४४.

ईशिषे जनिष इति। ईशस्तार्हि स्वे मा भूदिति। इष्यत एव। ईशिष्वेति। से तार्हि यः स्वशब्दस्तत्र+ यथा स्यात्क्रियासमभिहारे यः स्वशब्दस्तत्र* मा भूदिति। अत्रापीष्यते। स भवानीशिष्वेशिष्वेत्येवायमीष्ट इति। आतश्चेष्यत एवं ह्याह सिद्धं तु लोण्मध्यमपुरुषैकवचनस्य क्रियासमभिहारे द्विर्वचनादिति×।

अतो येयः ॥ ७। २। ८० ॥

प्र०—सिद्ध ईशः स इति नियमार्थं विज्ञायते। ईशेरेव सेशब्द इण्न त्वीडजनोरिति। **स इति**। थासः स इत्यस्यानुकरणं सुपां सुलुगिति सप्तमीलुका निर्दिष्टम्। **इष्यत इति**। न चानिष्टार्थो योगविभागः। **जनिष इति**। व्यत्ययेन शप् तस्य बहुलं छन्दसीति लुक् छान्दसत्वादुपधालोपाभावः। जायस इत्यत्र तु नित्यत्वाद्विकरणे कृते तेन व्यवधानादिडभावः। ईशेस्तार्हि स्वे मा भूदिति चकारेणेशेरनुकर्षणात्सकारादौ ध्वशब्दे चेटः सिद्धेः, ईशः स इति नियमः क्रियते। ईशेः सेशब्द एव सकारादाविण्नान्यस्मिन्सकारादाविति। यद्यप्येकदेशविकृतमनन्यवदिति स्वशब्दः सेशब्द एव भवति तथाऽप्यन्यस्य सकारादेर्व्यावर्त्यस्याभावादन्यत्वमाश्रित्य स्वशब्दो व्यावर्त्यते। **से तर्हीति**। ईडजनोरध्वे चेत्यनेन सर्वसकारादेरिटि विहित ईशः स इत्यनेन नियमः क्रियते। सेशब्द एव सकारादाविति। तेनेशिष इत्यत्र भवतीशिष्वेत्यत्रापि स्थानिवद्भावात्। यस्तु लोट एव स्थाने स्वशब्दो नासौ सेशब्द इति व्यावर्त्यते। **अत्रापीति**। लोड्धर्माणौ हिस्वौ लोटो भवत इत्युक्तं तेन यथाऽन्यलोडादेशस्य स्वशब्दस्य सेग्रहणेन ग्रहणादिड् भवत्येवं क्रियासमभिहारे समुच्चये च लोडादेशस्य स्वस्य। अत्रैवार्थे वार्तिककारवचनं साक्षित्वेनाऽऽह—**आतश्चेष्यत इति**। तदेवं दोषवान्गुरुश्च योगविभाग इत्येक एव योगः कर्तव्यः। ईडीशिजनां सेध्वयोरिति।

अतो०। केषांचिदतो या इति सकारान्तानुकरणत्वात्पाठोऽन्येषां तु सौत्रत्वा-

---

उ०—एकयोगेनेति वक्तुमुचितम्। ननु से इत्यस्यानुकरणे सर्यीति युक्तमत आह—**सुपां सुलुगिति**। जनेर्दैवादिकत्वादाह—व्यत्ययेनेत्यादि लुगिति। अत एव जादेशो न। नन्वेवं सेशब्दे ङिति परतो जनसनखनामिति लोपः स्यादत आह—**छान्दसत्वादिति**। **अन्यत्वमाश्रित्येति**। नियमविधानसामर्थ्याद्रूपभेदमात्रेणान्यत्वमाश्रीयत इत्यर्थः। नन्वस्य सेशब्दविकारत्वाभावात्कथमिष्यतेऽत आह—**लोड्धर्माणाविति**। योगविभागेन तत्रायमर्थः साधितः। **आतश्चेति**। लोण्मध्यमपुरुषस्येत्युस्त्या लोड्धर्मत्वं तयोरुक्तमिति भावः।

अतो येयः। **सकारान्तेति**। अनुकार्येणार्थवत्त्वात्षष्ठ्या जातायाः सुपां सुलुगिति लुकि रुत्वयत्वयलोपेषु तस्यासिद्धत्वाद्गुणाभावेऽतो या इति रूपम्। **अन्येषां त्विति**। अत्र

+ ३. ४. ९१. * ३. ४. २. × ३. ४. २.

किं सार्वधातुकग्रहणमनुवर्तत* उताहो न । किंचार्थोऽनुवृत्त्या । बाढमर्थो यद्यकारात्परो याशब्द आर्धधातुकमस्ति । ननु चायमस्ति । चिकीर्ष्यात्। जिहीर्ष्यात्+ । लोपोऽत्र बाधको भविष्यति× । किं तर्ह्यस्मिन्योग उदाहरणम् । पचेत् यजेत् । अत्राप्यतो दीर्घो यञि [७. ३. १०१] इति दीर्घत्वं प्राप्नोति । स यथैवेयादेशो दीर्घत्वं बाधत एवं लोपमपि बाधेत । तस्मात्सार्वधातुकग्रहणमनुवर्त्यम् ।

प्र०—निर्देशस्य यलोपस्यासिद्धत्वानाश्रयणादतो येय इति । **किंचार्थ इति** । आचार्यदेशीय आह—प्रयोजनाधीनाधिकारानुवृत्तिरिति मन्यते । आचार्य आह—**बाढमर्थ इति** । चोदक आह—**यद्यकारादिति** । किंतु नास्तीति भावः । **चिकीर्ष्यादिति** । लिङाशिषीत्यार्धधातुकसंज्ञा । **लोपोऽत्रेति** । कृताकृतप्रसङ्गित्वान्नित्यो लोपः । इयादेशस्तु लोपे कृतेऽनकारान्तत्वान्न प्राप्नोतीत्यनित्यः । इतरस्त्वियादेशस्य सावकाशत्वे लोपस्य नित्यत्वं वक्तुं शक्यं नान्यथेति मत्वाऽऽह—**किं तर्ह्यस्मिन्निति** । **स यथैवेति** । न च येन नाप्राप्तिन्यायेन दीर्घस्यैव बाधक इति शक्यं वक्तुम् । यस्मात्स सार्वधातुके विधीयत इति सिद्धान्तः । तथा च ज्ञाजनोर्जा इत्यत्र वक्ष्यते । जानातीत्यत्राप्यतो दीर्घो यञीत्येव दीर्घो भविष्यतीति यदि तिङि दीर्घो विधीयते कथं जानातीत्यत्र स्यात् । यत्तु वक्ष्यते तिङीत्येवं तदिति नासौ सिद्धान्तः । मध्येऽपवादा इत्यनाश्रित्यैतदुक्तं तस्मिन्नाश्रीयमाणे लोपमेवेयादेशो बाधेत न दीर्घम् । दीर्घस्तु परत्वात्स्यादिति सर्वथा सार्वधातुकानुवृत्तिः सप्रयोजना ।

उ०—पाठ आकारान्तानुकरणं ततः षष्ठ्याम् 'आतः' इति योगविभागादालोपे ततो रुत्वादिषु सौत्रत्वाद्गुण इत्यन्ये । या इत्याकारान्तानुकरणेऽविभक्तिको निर्देश इति परे । एतदेवाभिप्रेत्य याशब्द आर्धधातुकमिति निर्विसर्गः पाठो भाष्ये । क्वचित्तु सविसर्गः पाठः । नायं प्रश्नश्चोदकस्य नापि सिद्धान्तिनः । तेनानुवृत्तेरङ्गीकारादत आह—**आचार्यदेशीय इति** । बाढमर्थ इति वदतो यदिगर्भं वाक्यमयुक्तमत आह—**चोदक इति** । ननु पर इयादेश इति कथं लोपस्य बाधकत्वमत आह—**कृताकृतेति** । ननु प्रत्युदाहरणप्रश्ने प्रकृत उदाहरणप्रश्नो न युक्तोऽत आह—**इतरस्त्विति** । **न चेति** । तिङीत्येवं तद्विधानात्सर्वत्र प्राप्त इति मन्यते । उत्तरयति—**यस्मात्स इति** । अनाश्रयणे हेतुः सार्वधातुकानुवृत्तेरावश्यकतेत्याह—**सर्वथेति** । तदभावे पचेदित्यत्रेष्टस्येयोऽनापत्तिः । चिकीर्ष्यादित्यत्रानिष्टस्य तस्याऽऽपत्तिः । तदनुवृत्तौ तु दीर्घस्य बाधः । अत्र विषयभेदेऽप्यानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति दीर्घादेर्बाधः । बाधकत्वसामान्याच्चापवादत्वव्यवहार इति सर्वेष्टसिद्धिः ।

---

* ७. ३. ७६. + ३. ४. ११६. × ६. ४. ४८.

आने मुक् ॥ ७ । २ । ८२ ॥

मुकि स्वरे दोषः ॥ १ ॥

मुकि सति स्वरे दोषो भवति । पचमानः यजमानः । मुका व्यवहितत्वादनुदात्तत्वं* न प्राप्नोति। ननु चायं मुगदुपदेशभक्तोऽदुपदेशग्रहणेन ग्राहिष्यते। न सिध्यति । अङ्गस्य मुगुच्यते विकरणान्तं चाङ्गं सोऽयं संघातभक्तोऽशक्योऽदुपदेशग्रहणेन ग्रहीतुम् । एवं तर्हि भक्तः करिष्यते ।

प्र०— आने । मुकीति । पूर्वान्तकरणे दोष इत्यर्थः । अदुपदेशादिति स्वरो न सिध्यति । अग्निचित्वानित्यादौ ह्रस्वनुड्भ्यां मतुबित्याद्युदात्तत्वं प्राप्नोतीति स्वरविधौ व्यञ्जनमविद्यमानवदिति दूषयित्वा हलस्वरप्राप्तौ व्यञ्जनमविद्यमानवदिति परिभाषा भाष्यकारेण व्यवस्थापितेति व्यवधानेव मुगागमः । **ननु चायमिति** । अकार उपदेश इत्याश्रीयते न त्वकारान्त उपदेश इति मुक् चाकारमात्रभक्त इति व्यवधानाभावः । **अङ्गस्येति** । अङ्गाधिकारादङ्गस्य मुग्विधीयमानोऽङ्गमेव न व्यवदधात्यवयवान्तरं तु व्यवदधात्येव । **एवं तर्हीति** । ककारमनुबन्धमकृत्वा विकरणवदकारा-

---

उ०— आने मुक । ननु स्वरविधौ व्यञ्जनस्याविद्यमानत्वान्न दोषोऽत आह—**ह्रस्वनुड्भ्यामिति** । **दूषयित्वेति** । स्वरानुद्देश्यकस्वरविधिविषय इत्यर्थः । पचमानादौ चित्स्वरं बाधित्वा परत्वात्तास्यनुदात्तेदित्यनुदात्तत्वमिष्यते । **अकार उपदेश इति** । विशेषणत्वेऽप्युपदेशशब्दस्य सौत्रत्वात्परनिपात इत्यभिमानः । **मुक् चाकारेति** । अङ्गावयवस्यातो मुगित्यर्थ इति भावः । यद्यपि वर्णग्रहणे यदागमा इति नास्ति । अत एव प्रकृते सवर्णदीर्घो न । तथाऽप्यकारान्तोपदेश इत्यर्थस्य स्वरविधौ सिद्धान्तितत्वेन तत्र वर्णग्रहणाभावान्न दोष इति भावः । अकार उपदेश इत्याश्रीयते नत्वकारान्त उपदेश इति कैयटोक्तं चिन्त्यमेव । तथाऽऽश्रयणेऽपि व्यपदेशिवद्भावेनाकारस्यैव तदन्तोपदेशत्वमादाय दोषाभावात् । तदनाश्रयणे हतो हथ इत्यादावप्यनुदात्तत्वापत्तेश्च । एवं च विशेष्यत्वादुपदेशशब्दस्य परनिपातोऽपि युक्त एव । (+ यक्ष्यत इत्यादावव्याप्तेश्च । यक्ष्यमाण इत्यादावप्यवयवावयवस्य समुदायावयवत्वेन स्यस्यापि न मुग्व्यवधायक इति न दोषः)। अनित्यत्वेन क्वचिदेव वर्णग्रहणेऽप्रवृत्तिर्न सर्वत्रेति तत्त्वम् । **अङ्गाधिकारादिति** । सामानाधिकरण्यानुरोधेन तस्य विशेष्यतैवेति तदन्तविधिरिति भावः । **अङ्गमेव न व्यवदधातीति** । कुतश्चित्पूर्वस्याङ्गस्य कार्ये वाऽङ्गात्परस्य कार्ये वेति भावः । **अवयवं त्विति** । ततः परस्य कार्ये कर्तव्य इत्यर्थः । अवयवान्तरमिति पाठस्तु चिन्त्यार्थः । कस्य-

---

* ६. १. १८६.

+ धनुश्चिह्नान्तर्गतो ग्रन्थः ख, पुस्तके नास्ति।

अभक्ते च ॥ २ ॥

किम् । स्वरे दोषो भवति । पचमानः यजमानः । मुका व्यवहितत्वादनुदात्तत्वं न प्राप्नोति । एवं तर्हि परादिः करिष्यते ।

परादौ दीर्घप्रसङ्गः ॥ ३ ॥

यदि परादिः क्रियतेऽतो दीर्घो यञि [७. २. १०१] इति दीर्घत्वं प्राप्नोति । नैष दोषः । तिङीत्येवं तत्* । सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं मुकि स्वरे दोष इति । परिहृतमेतददुपदेशभक्तोऽदुपदेशग्रहणेन ग्राहिष्यते । ननु चोक्तमङ्गस्य मुगुच्यते विकरणान्तं चाङ्गं सोऽयं संघातभक्तोऽशक्योऽदुपदेशग्रहणेन ग्रहीतुमिति ।

अथायमभक्तः स्याद्गृह्येतादुपदेशग्रहणेन । बाढं गृह्येत । अङ्गकस्तर्हि भविष्यति । तत्कथम् । अतो या इयः [७. २. ८०] इत्यत्राकारग्रहणं पञ्चमीनिर्दिष्टमङ्गस्येति+ च षष्ठीनिर्दिष्टं तत्राशक्यं विविभक्तित्वादत इति पञ्चम्याऽङ्गं विशेषयितुम् । तत्प्रकृतमिहानुवर्तिष्यते । एवमपि षष्ठ्यभावान्न प्राप्नोति । आन इत्येषा सप्तम्यत इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] इति ।

प्र०—न्तादङ्गात्पर आने परतो मध्ये मः करिष्यते । **मुकेति** । यथान्यासाश्रयेणोक्तमभक्तत्वात्तु मकारेणेति युक्तं वक्तुम् । **एवं तर्हीति** । आनस्य मुडिति सूत्रन्यासेन । **तिङीत्येवं तदिति** । मुटि क्रियमाणे सार्वधातुकमननुवर्त्य तिङीत्यनुवर्त्यमेवेति भावः । **पञ्चमीनिर्दिष्टमिति** । पूर्वसूत्र एवात इत्यनेनाङ्गं न विशेषितमिति तदन्तविध्यभाव इत्युक्तं भवति । तेनाङ्गस्य योऽकारस्तस्मात्परस्य यास इत्यङ्गं यथा पूर्वसूत्रे विशेषणं तथेहापीत्यङ्गावयवस्याकारस्याऽऽने मुग्भवति । **तत्प्रकृतमिति** । विशेष्यं सत्प्रधानमेवेत्यर्थः । **आन इत्येषेति** । अकृतार्था सप्तमी पूर्वत्र कृतार्थायाः **पञ्चम्याः**

उ०—चिद्वयवस्य प्रसङ्गे हि तथा वक्तुं युक्तम् । न चात्र तथा । अङ्गस्यावयविन एव पूर्वं प्रसङ्गात् । **अकारान्तादिति** । अत इति पञ्चम्यन्तानुवृत्तेस्तदनुरोधेनाङ्गस्येत्यपि पञ्चम्या विपरिणम्यत इति भावः । अभक्तत्वपक्षे मुकोऽभावादाह—**यथा न्यासेति** । मुगिति मकारोपलक्षणमिति भावः । **तिङीत्यनुवर्त्यमिति** । भूसुवोस्तिङीत्यतः । इद न युक्तमित्युक्तम् । **पूर्वसूत्र एवेति** । एवं चार्थाधिकारानुरोधादिहाप्यङ्गेनाकारो विशेष्यत इति भावः । तत्प्रकृतमित्यस्य यद्धर्मकं प्रकृतं तद्धर्मकमेवेहानुकृष्यत इत्यर्थ इत्याह—**विशेष्यं सदिति** । ननु विपरीतं किं न स्यादत आह—**अकृतार्थेति** । **उपदेशग्रहणादिति** । वस्तुतस्तपरसूत्रस्य विध्यर्थत्वपक्षे तप-

---

* ७. ३ ८८. + ६. ४. १.

अष्टन आ विभक्तौ ॥ ७ । २ । ८४ ॥

अष्टञ्जनादिपथिमथ्यात्वेष्वान्तरतम्यादनुनासिकप्रसङ्गः॥ १ ॥

अष्टञ्जनादिपाथिमथ्यात्वेष्वान्तरतम्यादनुनासिकः प्राप्नोति* । अष्टाभिः अष्टाभ्यः । जातः जातवान् । पन्थाः मन्थाः ।

सिद्धमनण्त्वात् ॥ २ ॥

प्र०—षष्ठीं प्रकल्पयति नतु पञ्चमीं सप्तम्याः । यद्येवमङ्गस्यात इति समानविभक्तित्वात्तदन्तविधिप्रसङ्गः । नैष दोषः । विशेषणविशेष्यभावे कामचारादङ्गेनातो विशेषणात्ततो मुगकारमात्रभक्तत्वान्न व्यवधायकः । यद्यपि मुकि कृतेऽध्यर्धमात्रोऽकारस्तथाऽप्युपदेशग्रहणादुपदेशे मात्रिकत्वाश्रयः स्वरः प्रवर्तते । तथा च पचाव इत्यादौ दीर्घेऽपि कृते भवति पचमान इत्यादौ त्वातो ङित इति इयादेशाभावोऽत इति तपरकरणात् ।

अष्ट० । सौत्रत्वान्निर्देशस्याल्लोपोऽन इत्यकारलोपो न कृतः । समानविचारत्वात्प्रकरणान्तरविहितमप्यनुनासिकस्थानिकमाकारमिहैवोपन्यस्यति—**अष्टनिति** । यत्र तपरत्वमस्ति तत्र तपरस्तत्कालस्येति वचनाद्गुणान्तरयुक्तस्य तत्कालस्य ग्रहणात्स्थानेऽन्तरतम इति वचनाच्चानुनासिकस्थानेऽनुनासिक एवाऽऽकारः प्राप्नोति । यत्रापि तपरत्वाभावस्तत्राप्याकृतिनिर्देशाद्दीर्घोच्चारणसामर्थ्याच्च ह्रस्वप्लुताग्रहणात्सर्वदीर्घव्यक्तिप्रसङ्गेऽन्तरतमपरिभाषोपस्थानादनुनासिकप्रसङ्गः । **सिद्धमनण्त्वादिति** । अणुदित्सवर्ण-

---

उ०—रस्तत्कालस्य सवर्णस्य ग्राहक इत्यर्थो न त्वन्यनिवर्तकमेतदिति कोऽत्र दोषः । नियमपक्षेऽतत्कालसवर्णमेव व्यावर्तयेत् । नतु यदागमा इत्येतल्लुब्धमिति चिन्त्यमिदम् । नचैवं पचमान इत्यत्राऽऽतो ङित इति दुर्वारम् । अनित्यत्वेन क्वचिद्वर्णग्रहणे यदागमा इत्यस्याप्रवृत्तेरदोषात् । **तपरकरणादिति** । उपदेशग्रहणस्यात्राभावादिति भावः ।

अष्टन आ० । ननु पथ्यादीनामप्रकृतत्वादुपन्यासोऽसंगतोऽत आह—**समानेति** । **यत्रेति** । जनादिविषये विह्वनोरित्यत आदित्यनुवृत्तेः पथ्यादिसूत्र आदित्युच्चाणाञ्चेति भावः । **गुणान्तरेति** । तपरसूत्रेऽणिति नानुवर्तते विध्यर्थं च सूत्रमिति भावः । **यत्रापीति** । यथा प्रकृतसूत्रे । नान्वाकृतिनिर्देशे ह्रस्वप्लुतयोरपि ग्रहणं स्यादत आह—**दीर्घेति** । अन्यथा ह्रस्वमेवोच्चारयेदिति भावः । दीर्घोच्चारणं दीर्घव्यक्तिसमवेतजातिग्रहणायेति तत्त्वम् । व्यक्तिपक्षाश्रयणेन समाधत्ते भाष्ये—**सिद्धमेतदिति** । अयं भावः । अष्टन इत्यादिसूत्र आदिति व्यक्तिर्गृह्यते । व्यक्तिपक्षे च ग्रहणकशास्त्रारम्भात्तेनैव सानुनासिकग्रहणं वाच्यम् । तच्चानण्त्वान्न प्रवर्तत इति । तत्रानण्त्वं व्युत्पादयति—**अणुदिदिति** । इदं च [प्र]कृतसूत्राभिप्रायेण । **न च प्रत्याहार इति** ।

---

* ६. ४. ४२; ७. १. ८५; १. १. ५०.

सिद्धमेतत् । कथम् । अनण्त्वात् । कथमनण्त्वम् । अण्सवर्णान्गृह्णातीत्युच्यते + । न चाऽऽकारोऽण् ।

उच्चारणसामर्थ्याद्वा ॥ ३ ॥

अथवा शुद्धोच्चारणसामर्थ्यान्न भविष्यति । नैतौ स्तः परिहारौ । यत्तावदुच्यतेऽनण्त्वादिति न ब्रूमोऽण्सवर्णान्गृह्णातीति । कथं तर्हि । तपरस्तत्कालस्य [१. १. ७०] इति । यदप्युच्यत उच्चारणसामर्थ्याद्वेत्यस्त्यन्यदुच्चारणे प्रयोजनम् । किम् । उत्तरार्थम् । रायो हलि [७. २. ८५] इति । एवं तर्हि नेमौ पृथक्परिहारौ । एकपरिहारोऽयम् । सिद्धमनण्त्वादुच्चारणसा-

---

प्र०—स्येत्यत्राण्ग्रहणेन प्रत्याहारसंनिविष्टा अकारादयो गृह्यन्ते न त्वाकारादयोऽसंनिविष्टत्वान्न च प्रत्याहारेऽकारादिभिराकारादयो गृह्यन्ते । नाप्यणुदित्सूत्रेऽङ्गेषु स्वात्मनि च ग्रहणकशास्त्रस्यानभिनिर्वर्तनात्स्वात्मनि क्रियाविरोधाच्च ग्रहणकशास्त्रान्तराभावाच्च । **कथमनण्त्वमिति** । अकारेण गृह्यमाण आकारोऽण् भवतीति मत्वा प्रश्नः । पूर्वोक्तेनाभिप्रायेणाऽऽह—**अण् सवर्णानिति** । अनण्त्वादेव भाव्यमानोऽण्सवर्णान्न गृह्णातीति परिहारो नोक्तः । ग्राह्यासद्भावाच्चान्तरतमपरिभाषा नोपतिष्ठते । **उच्चारणसामर्थ्याद्वेति** । यद्यनुनासिकोऽभविष्यत्स एवोदचारयिष्यतेति निरनुनासिक एवोच्चारणसामर्थ्यात्प्रवर्तते । तत्र पूर्वः परिहारोऽष्टऊश्शब्दाकाराभिप्रायेणोक्तः । उत्तरस्तु जनाद्याकाराभिप्रायेण । चोदकस्तु विषयविभागमबुद्ध्वाऽऽह—**नैतौ स्त इति । कथं तर्हीति** । अणिति न तत्रानुवर्तते । **उत्तरार्थमिति** । इहानुनासिक उच्चार्यमाणेऽननुनासिक उत्तरत्र कर्तव्य इति लाघवायाननुनासिकोच्चारणं स्यादित्यर्थः । इतरः स्वाभिप्रायमाह—**एवं तर्हीति** । अष्टन आत्वे न द्वौ परिहारौ नापि जनाद्यात्वे किंतु विषयविभागेन । **एक इति** । यद्यपि द्वावेतौ परिहारौ वाशब्दस्य समुच्चयार्थत्वात्तथाऽपि समुदायापेक्षया संभवापे-

---

उ०—चतुर्दशसूत्र्यामित्यर्थः । **स्वात्मनीति** । अत्रानभिनिर्वृत्तिमूलक एव स्वात्मनि क्रियाविरोधो द्रष्टव्यः । चस्तु वाक्यालंकारे । **ग्राह्यासद्भावाच्चेति** । यदि सानुनासिक स्याप्यत्र ग्रहणमभविष्यत्तदा तस्यैव प्रवृत्त्यर्थमन्तरतमपरिभाषा प्रावर्त्स्यत् । तदभावान्न प्रवर्तत इत्यर्थः । **स एवेति** । ऊँ इत्यादाविव प्रतिपत्तिलाघवायानुनासिक एवोच्चारणीये शुद्धोच्चारसामर्थ्येनान्तरतमबाध इति भावः । ननु वाशब्दस्य विकल्पार्थत्वेन प्रसिद्धत्वात्प्रतिज्ञातेऽर्थे पर्यायेण परिहारद्वयमिति भाति । तत्तु न विरोधात् । **विषयभेदे** तु पृथक्परिहारत्वमेवेति नेमौ पृथगित्ययुक्तमत आह—**अष्टन आत्व इति** । एकैकत्र विषये पृथक्परिहारौ नेति भाष्यार्थः । एवं च वाशब्द समुच्चयार्थ इति भावः । नन्वेवं तर्ह्येकः परिहारोऽयमित्यसंगतमत आह—**यद्यपीति तथाऽपीति** । समुदाय एकः । स च यथासंभवं प्रतिज्ञातेऽर्थे प्रवर्तत इति भावः

मर्थ्याद्वेति । इह तावदष्टाभिः अष्टाभ्य इत्यनण्त्वात्सिद्धम् । जातः जातवान् पन्थाः मन्थाः उच्चारणसामर्थ्यात्सिद्धम्। यद्येवं पृथक्परिहारयोरपि न दोषः। यो यत्र परिहारः स तत्र भविष्यति ।

युष्मदस्मदोरनादेशे ॥ ७ । २ । ८६ ॥

अनादेशग्रहणं शक्यमकर्तुम् । कथम् । हलीत्यनुवर्तते+ न चाऽऽदेशो हलादिरस्ति । तदेतदनादेशग्रहणं तिष्ठतु तावत्सांन्यासिकम् ।

योऽचि ॥ ७ । २ । ८९ ॥

अज्ग्रहणं शक्यमकर्तुम् । कथम् । अविशेषेण यत्वमुत्सर्गस्तस्य हलादावात्वमपवादः* ।

प्र०—क्षया चैवमुक्तम् । अथवैकोऽसहायः क्वचित्क्वचिदन्यनिरपेक्षः परिहार इत्यर्थः । स एवाऽऽह—**यद्येवमिति** । यदि भवान्संमन्यते परिहारसमुदाये यथासंभवमवयवौ परिहारत्वेन तदा समुदायकल्पनया नार्थः पृथगेवैतौ परिहारौ यथाविषयमवतिष्ठेते ।

युष्म० । **हलीत्यनुवर्तत इति** । रायो हलीत्यतः । **न चाऽऽदेशो हलादिरिति** । भ्यसोऽभ्यमित्यभ्यमादेशो नतु भ्यमिति भावः । **तदेतदिति** । उत्तरत्रोपयुज्यते । योऽचीति यत्वमादेशेऽजादौ मा भूत्त्वमहमित्यादौ शेषे लोप इति शेषव्यवस्थार्थं च ।

योऽचि । **यत्वमुत्सर्ग इति** । अनादिष्टायां विभक्तौ विधीयमानं यत्व-

---

उ०—**स एवेति** । परिहारग्रन्थशेषत्वादिति भावः । एकग्रन्थत्वे योजनाप्रकारमाह—**यदि भवानिति** । पूर्वं समुदायरूपत्वमुक्त्वा तत्र समुदायस्यावयवद्वारेण यथासंभवं प्रतिज्ञाते प्रवृत्तिरित्यर्थे परस्य संमतिं दृष्ट्वा पृथक्परिहारत्वेऽपि तथैव न दोष इति प्रतिपाद्यत इत्यर्थः । नन्वनङुदात्तग्रहणेन स्वरूपोच्चारितगुणस्याविवक्षाज्ञापनात्पथ्यादिविषये शुद्धोच्चारणेऽप्यान्तरतम्यादनुनासिक एवोच्चारणीये शुद्धोच्चारणसामर्थ्येन तस्य बाध इत्याशयात् ।

युष्मद० । **अभ्यमादेश इति** । पक्षभेदेन लक्ष्यभेदस्यानिष्टतयाऽभ्यमित्येव तत्र पदच्छेदः कार्य इत्यर्थः । भ्यसोभ्यमिति सूत्रस्थं यथेच्छसि तथाऽस्तिवति भाष्यं तु केवलयुष्मच्छब्दे रूपाविशेषमात्रपरं नतु तन्त्राश्रयेणोभयादेशप्रतिपादनपरम् । यथेच्छसीत्युक्त्योभयत्र तात्पर्यालाभात् । तत्र भ्यम् भ्यस इत्यकरणेनाभ्यमिति च्छेद एव युक्तः । यत्र भ्यमभ्यमोः फले विशेषस्तस्यानभिधानमेव बोध्यम् । **उत्तरत्र । योऽचीत्यत्र । शेषे लोप इति** । आदेशविभक्तिर्हि तत्र शेषो यथा प्रकल्प्येतेति भावः ।

योऽचि । अनादेशग्रहणं तु सर्वथाऽऽवश्यकमित्यज्ग्रहणमाश्रित्य तन्न प्रत्याख्या-

---

+ ७. २. ८५. * ७. २. ८६.

शेषे लोपः ॥ ७ । २ । ९० ॥

शेषग्रहणं शक्यमकर्तुम् । कथम् । अविशेषेण लोप+ उत्सर्गस्तस्याजादौ यत्वमपवादो हलादावात्वम् * ।

मपर्यन्तस्य ॥ ७ । २ । ९१ ॥

परिग्रहणं शक्यमकर्तुम् । मान्तस्येत्येव सिद्धम् । न सिध्यति । किं कारणम् । अन्तशब्दस्योभयार्थत्वात् । कथम् । अयमन्तशब्दोऽस्त्येव सह तन वर्तते । तद्यथा । मर्यादान्तं देवदत्तस्य क्षेत्रम् । सह मर्यादयेति गम्यते । अस्ति प्राक्तस्माद्वर्तते । तद्यथा । नद्यन्तं देवदत्तस्य क्षेत्रमिति । प्राङ्नद्या इति गम्यते । तद्यः सह तेन वर्तते तस्येदं ग्रहणं यथा विज्ञायेत । नैतदस्ति प्रयोजनम् ।

प्र०—मुत्सर्गो हलादौ त्वात्वमपवाद आदेशे तु लोप इत्यसंकरेणाऽऽत्वयत्वलोपाः सिध्यन्ति । अज्ग्रहणे क्रियमाणेऽप्यनादेशग्रहणाश्रयेणाज्ग्रहणमुत्तरत्र च शेषग्रहणं प्रत्याख्यातम् ।

शेषे । **अविशेषेणेति** । विभक्ताविति अधिकाराद्विभक्तिमात्रे लोपो विधीयमान उत्सर्गो भवति । तस्यानादेशे विभक्तौ यत्वमपवादो यत्वस्यापि हलादावात्वमिति शेषेग्रहणं पूर्वत्र चाज्ग्रहणमन्तरेण विषयविभागेन कार्यत्रयसिद्धिः । **तस्याजादाविति** । हलादावात्वविधानात्सामर्थ्यलभ्यमेतत् ।

मप०। अयमन्त इति । अन्यपदार्थविषयस्यान्तशब्दस्येदं व्याख्यानम् । क्वचिदन्तर्भूतान्तार्थोऽन्यपदार्थो बहुव्रीहेरभिधेयः । क्वचिदनन्तर्भूतान्तार्थ इत्यर्थः । **मर्यादान्तमिति** । मर्यादायाः क्षेत्रावयवत्वात्क्षेत्रेऽन्यपदार्थेऽनुप्रवेशः। **नद्यन्तमिति** । नद्याः क्षेत्रानवयवत्वादन्यपदार्थेऽनुप्रवेशाभावः। पर्यन्तशब्दस्त्वन्यपदार्थविषयः सह तेन वर्तत इति परिग्रहणं कृतम् ।

उ०—तमित्याह—**अज्ग्रहण** इति ।

शेषे । भाष्ये तस्याजादौ यत्वमित्युक्तेरचीत्यस्य कर्तव्यत्वमाभाति तदपनयायाऽऽह—**तस्यानदेश इति** । हलादाविति च । शेषस्य लोप इत्येतदर्थमपि न । संनिपातपरिभाषया टाबभावासिद्ध्या फलाभावादिति तात्पर्यम् । एतत्सूत्रत्रयोक्त एव सिद्धान्तो भाष्यकृदुक्तत्वात् । भ्यसोभ्यम् शेषे लोपस्त्यदादीनामिति सूत्रेषु त्वेकदेश्युक्तिर्वार्तिककारोक्तिव्याख्यानमात्रामित्याहुः ।

मपर्यन्तस्य । नन्वाङिव नान्तशब्दोऽभिविधिमर्यादयोस्तस्यावयववाचित्वादतो भाष्याशयमाह—**अन्यपदार्थेति** । **मर्यादाया इति** । अवयवावयविनोः समवायः संबन्ध इत्युपलक्षणस्याप्यवयवस्य कार्ययोग इत्यर्थः । सामीप्यादिनोपलक्षणस्य तु कार्ययोगाभावस्तदाह—**नद्या इति** । तद्य इत्यादि भाष्यं व्याचष्टे—**पर्यन्तशब्दस्त्विति** । शब्दशक्तिस्वभावादिति भावः । **अन्यपदार्थविषय इति** । बहुव्रीहिभूत इत्यर्थः । एवं च परि-

---

+ ७. २ ८४. * ७. २. ८१; ८६.

सर्वत्रैवान्तशब्दः सह तेन वर्तते । अथ कथं नद्यन्तं देवदत्तस्य क्षेत्रमिति । नद्याः क्षेत्रत्वे संभवो नास्तीति कृत्वा प्राङ्नद्या इति गम्यते । अवधिद्योतनार्थं तर्हि परिग्रहणं कर्तव्यम् । मान्तस्येतीयत्युच्यमाने यत्रैव मान्ते युष्मदस्मदी

प्र०—तेन युष्म् अस्म् इत्येतयोरादेशा भवन्ति । न युष् अस् इत्येतयोः । **सर्वत्रेति** । अन्तशब्दोऽवयववाचीत्यवयवेन विग्रहः । समुदायः समासार्थ इत्यवयवस्यावश्यमन्यपदार्थेऽन्तर्भावः । नद्यन्तं क्षेत्रमित्यत्र त्वन्तशब्दः समीपवाचीत्यन्यपदार्थे नद्या अनन्तर्भावः । यत्तूच्यते सर्वत्रैवान्तशब्दः सह तेन वर्तत ईति तत्संभवापेक्षं यस्यावयवत्वं सामीप्यं च संभवति तस्यावयवत्वमेवाऽऽश्रीयते । अन्तशब्दस्यावयववाचित्वेन प्रसिद्धतरत्वाद्यस्य त्ववयवत्वासंभवस्तस्य सामीप्यमेवान्तशब्देन प्रतिपाद्यते यथा नद्यन्तं क्षेत्रमिति । **अन्ये त्वाहुः** । सर्वत्रैवान्तशब्दोऽवयववाची कस्यचिन्मुख्यमवयवत्वं कस्यचित्सामीप्यादुपचरितमित्यभिप्रायेणेदं भाष्यम् । ततश्चान्तशब्दस्यावयववाचित्वान्मपर्यन्तस्याऽऽदेशलाभान्नार्थः परिग्रहणेन । **अवधिद्योतनार्थमिति** । यदि युष्मदस्मदी मान्तेऽथाप्यमान्ते सर्वथाऽऽदेशा यथा स्युरेवमर्थं परिग्रहणम् । **यत्रैवेति** । सामानाधिकरण्येन विशेषणविशेष्यभावः स्यात् । अथापि वैयधिकरण्यमाश्रीयते युष्मदस्मदोरवयवस्य मान्तस्येति तथाऽपि यत्र मान्ते युष्मदस्मदी तत्र भेदाभावादादेशा न स्युः । न च व्यपदेशिवद्भावोऽस्त्यप्रातिपदिकेनेति निषेधात्परिग्रहणे तु तदुपादानसामर्थ्याद्युष्मदस्मदवयवेऽपि युष्मदस्मच्छब्दौ वर्तेते इति सर्वत्रैवाऽऽदेशसिद्धिर्वैयधिकरण्येन वा संबन्धे परिग्रहणोपादानसामर्थ्यादप्रातिपदिकेनेति प्रतिषेधाप्रवृत्त्या मान्तयोरपि युष्मद्-

---

उ०—शब्दाभावेऽर्थसंदेहः स्यात्पर्यन्तशब्दस्तु सह तेनेत्यर्थ एवेत्यसंदिग्ध इति तात्पर्यम् । तत्फलं दर्शयति—**तेनेति** । सर्वत्रैवेति नियममुपपादयति—**अन्तशब्द इति** । तर्हि नद्यन्तमित्यत्रापि नद्याः कार्ययोगः स्यादत आह—**नद्यन्तमिति** । तर्हि नियमोक्तिरयुक्तेत्यत आह—**यत्त्विति** । **यस्यावयवत्वमिति** । यथा मर्यादान्तमित्यादौ मर्यादायाः । **तस्यावयवत्वमिति** । अवयवत्वमेवेत्यर्थः । **यस्य त्विति** । यथा नद्यन्तमित्यादौ नद्यादेः । **अन्ये त्वाहुरिति** । एवं ह्येकशक्तिकल्पनाल्लाघवं भवति । अतो ल्रान्तस्येति सूत्रे सामीप्ये वर्तत इत्यस्य सामीप्योपचरितावयव इत्यर्थः । अवयवे वर्तत इत्यस्य मुख्यावयवे वर्तत इत्यर्थ इति भावः । अवधिद्योतनार्थमित्यस्यायमर्थः—परिशब्दसमभिव्याहृतोऽन्तशब्दोऽवधिबोधक इति तस्यावधिवाचकत्वद्योतकत्वार्थमित्यर्थः । एवं च तस्य सा(मा)वधेरित्यर्थः । एवमपि सामानाधिकरण्येनान्वय इष्टसिद्धिरत आह—यदि युष्मदिति । परिग्रहणसामर्थ्याद्वैयधिकरण्यान्वय इति भावः । **अथापि वैयधिकरण्यमिति** । इदं प्रौढ्या । संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात् । **निषेधादिति** । इदमपि प्रौढ्या । निषेधस्य प्रत्ययविधिविष-

तत्रैवाऽऽदेशाः स्युः। क च मान्ते युष्मदस्मदी । युष्मान्वाचष्टे अस्मानाचष्ट इति युष्मयतेरस्मयतेश्चाप्रत्ययः* ।

प्र०—स्मदोरादेशसिद्धिः । **युष्मयतेरिति** । प्रत्ययोत्तरपदयोश्चेत्यत्रैकवचनाधिकारात्त्वमौ न भवतः । इष्ठवद्भावाट्टिलोपः । क्विपि णिलोपः । क्वौ लुप्तं न स्थानिवदिति मान्ते युष्मदस्मदी ततः कृदन्तत्वात्स्वादयः । एकदेशविकृतस्यानन्यत्वाद्युष्मदस्मदाश्रयकार्यप्रवृत्तिस्तत्र सौ त्वमहमिति भवति द्विवचने प्रथमायाश्च द्विवचने भाषायामिति मकारस्याऽऽत्वे प्राप्ते परत्वाद्युवावयोः कृतयोः पुनः प्रसङ्गविज्ञानादात्वे कृते युवामावामिति भवति । तृतीयाद्विवचने युवाभ्यामावाभ्यामिति । भिसि युष्माभिरस्माभिरिति । ङेप्रत्यये तुभ्यं मह्यम् । भ्यसि युष्मभ्यमस्मभ्यमिति शेषे लोप इति लोपः । पञ्चमीभ्यासि युष्मदस्मदिति । मपर्यन्तापेक्षे तु शेष आश्रीयमाणे मात्परस्यात्राभावाल्लोपाभावाद्युष्मदस्मदिति भवति । इह त्वामाचष्टे मामाचष्ट इति णिचि प्रत्ययोत्तरपदयोरिति त्वमयोः प्रकृत्यैकाजिति प्रकृतिभावादसति टिलोपेऽत उपधाया इति वृद्ध्या भाव्यम् । अथ त्वङ्गवृत्त इत्याश्रीयते तदो वृद्ध्यभावः । तत्र त्वद् स् मद स् इति स्थिते मपर्यन्ताभावात्त्वाहौ सावित्यस्याप्रवर्तनात् । वृद्धिपक्षे त्वादम् मादमिति भवति । तदभावे त्वदं मदमिति । केचित्तु मान्तयोर्युष्मदस्मदोरादेशा

उ०—यत्वात् । तस्मात्सामानाधिकरण्येनान्वय इत्येव भाष्यतात्पर्यम् । अवधिबोधकपर्यन्तशब्दोपादाने तु वैयधिकरण्येनैव संबन्धः । एवं च युष्मदस्मदोर्मावधेरादेश इत्यर्थ इति भावः । **एकवचनाधिकारादिति** । एकार्थवाचिनोरेव तावादेशौ न त्वनेकार्थवाचिनोरिति भावः । ननु लोपस्य स्थानिवद्भावान्मान्तत्वमनयोरसिद्धमत आह— **क्वौ लुप्तमिति** । **युवावयोः कृतयोरिति** । आख्यानकर्तृद्वित्वे वर्तमानयोरपि युष्मदस्मदोर्द्रव्यर्थवर्तितास्त्येवेति भावः । **युष्मभ्यमस्मभ्यमिति** । भ्यम् तु युष्मदस्मदोरनादेश इतिसूत्रस्थभाष्यप्रामाण्यान्नास्त्येव । मुख्ययुष्मदादिविषय एव वा । यथेच्छसीत्यनेन भाष्येण तयोः फलभेदाभावबोधनादिति भावः । वस्तुतो यथेच्छसीति भाष्यप्रामाण्येनास्य चतुर्थीबहुवचने प्रयोगाभाव एवेति तत्त्वम् । **युष्मदस्मादिति** । एवं चतुर्थीबहुवचनेऽपि युष्मभ्यमस्मभ्यामिति । वस्तुतः शेषे लोप इति सूत्रस्थशेषग्रहणप्रत्याख्यानपरभाष्यप्रामाण्याच्छेषस्य लोप इति नास्त्येवेति पञ्चमीबहुवचनेऽस्य प्रयोगाभाव एवानभिधानादिति तत्त्वम् । षष्ठीबहुवचने युष्माकमसाकम् । प्रत्ययोत्तरपदयोरिति सूत्रेऽतित्वाकमतिमाकमिति भाष्योदाहरणेन गौणेऽप्याकम्प्रवृत्तेः । **इह त्वामाचष्ट इत्यादि** । वस्तुतस्तु सावेकाच इतिसूत्रस्थभाष्यप्रामाण्येनैकवचनान्तप्रकृतिकण्यन्तप्रकृतिककिबन्तानामनभिधानस्य तत्रैव सूत्रेऽस्माभिरुक्तत्वेनेदं चिन्त्यम् । **केचित्त्विति** । परिग्रहणाभावे तत्रैवाऽऽदेशा इत्यस्य तत्रैवानिष्ट आदेशा इत्यर्थः ।

---

* ६. ४ १५५; ५१; १. १. ५८.

प्रत्ययोत्तरपदयोश्च ॥ ७। २। ९८॥

किमर्थमिदमुच्यते न त्वमावेकवचने [७. २. ९७] इत्येव सिद्धम्। न सिध्यति। किं कारणम्। एकवचनाभावात्। एकवचन इत्युच्यते न चात्रैकवचनं पश्यामः+। प्रत्ययलक्षणेन*। न लुमताऽङ्गस्य [१. १. ६३] इति प्रत्ययलक्षणस्य प्रतिषेधः। एवं तर्हीदमिह संप्रधार्यम्। लुक्क्रियतामादेशावितिं किमत्र कर्तव्यम्। परत्वादादेशौ। नित्यो लुक्। कृतयोरप्यादेशयोः प्राप्नोत्यकृतयोरपि। अन्तरङ्गावादेशौ। एवं तर्हि सिद्धे सति यत्प्रत्ययोत्तरपदयोस्त्वमौ शास्ति तज्ज्ञापयत्याचार्योऽन्तरङ्गानपि विधीन्बाधित्वा बहिरङ्गो लुग्भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। गोमान्प्रियोऽस्य गोमत्प्रियः यवम-

---

प्र०—त्रेच्छन्ति। मपर्यन्तग्रहणं हि यत्र परिशिष्टसद्भावस्तत्राऽऽदेशार्थमिति। परिशिष्टाभावे न भाव्यमादेशैरिति ब्रुवन्ति।

प्रत्ययो०। अन्तरङ्गा इति। नित्यादप्यन्तरङ्गो बलीयांस्तथा चोक्तं परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसंनिपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति। **गोमत्प्रिय इति**। अत्रान्तरङ्गा एकपदाश्रयत्वात्सुलोपादयः स्युः पदद्वयाश्रयत्वाद्बहिरङ्गो लुगिति गोमान्प्रिय इति स्यात्। अस्मिंस्तु ज्ञापके सत्यन्तरङ्गाण्यपि कार्याणि

उ०—तत्सत्त्वे तु तत्र नैवाऽऽदेशा इत्येतन्मते भाष्याक्षरार्थः। अत एवावधिद्योतनार्थमित्युपक्रम उक्तम्। अग्रेऽपि देशस्य कालस्य वा सत्त्वे हि तयोरवधित्वव्यवहारो लोकप्रसिद्धः। किंच पूर्वव्याख्यायां परिग्रहणसामर्थ्यान्मणिमन्त्रादिन्यायेन वैयधिकरण्यान्वयो नतु वाच्यवृत्त्या। मम तु परिग्रहणसत्त्वेऽसंभवान्न सामानाधिकरण्येनान्वयः किंतु वैयधिकरण्येनेति। एवमेव व्याख्यानं भाष्यसंमतम्। अत एव द्विपर्यन्तानामित्यादौ न दोष इति तेषामाशयः। अङ्गुष्ठपर्यन्तं कुष्ठमित्याद्यसाध्वेव। अङ्गुष्ठान्तमित्येव तूचितम्।

प्रत्ययोत्तरपदयोश्च। भाष्ये—**एकवचन इत्येव सिद्धमिति**। यद्यपीदमर्थग्रहणमित्युत्तरत्रैव भाष्ये स्फुटं तथाऽपि विभक्ताविति्यधिकारात्सिद्धमित्याशयः। **एकवचनाभावादिति**। एकवचनग्रहणं प्रत्ययोपलक्षणम्। एकार्थयोर्युष्मदस्मदोर्विभक्तेरेकवचनस्यैव संभवेन भाष्य एकवचनमित्युक्तम्। विभक्ताविति्यधिकारफलं तु त्वं डित्थः पुत्रो यस्य स युष्मद्डित्थपुत्र इति त्रिपदबहुव्रीहावादेशाभाव इति दिक्। **अन्तरङ्गा इति** प्रतीकपाठः। ननु नित्यान्तरङ्गयोर्बाध्यबाधकत्वे विनिगमनाविरहोऽत आह—**नित्यादपीति**। विरुद्धयोर्द्वयोः शास्त्रयोः संनिपात एकलक्ष्ये प्रवृत्तौ यत्पराद्यन्यतमत्तद्भवति। तेषां परनित्यादीनां मध्ये मिथः परनित्याद्योर्युगपत्प्रसङ्ग उपात्तक्रमेण

+ २. ४. ७१. * १. १. ६२.

त्प्रियः गोमानिवाचरति गोमत्यते यवमत्यते अन्तरङ्गानपि नुमादीन्बहिरङ्गो लुग्बाधत इति× । नैतदस्ति ज्ञापकम् । अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम् । येऽन्य एकवचनादेशाः प्राप्नुवन्ति तद्बाधनार्थमेतत्स्यात् । तद्यथा । तव पुत्रस्त्वत्पुत्रः मम पुत्रो मत्पुत्रः । तुभ्यं हितं त्वद्धितम् मह्यं हितं मद्धितमिति* । यत्तर्हि मपर्यन्तग्रहणमनुवर्तयति+ । यद्यत्रान्य एकवचनादेशाः स्युर्मपर्यन्तानुवृत्तिरनार्थिका स्यात् ।

प्र०-बाधित्वा लुक् भवति । ततो न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधान्नुमदीर्घाभावे गोमत्प्रिय इति सिध्यति । सुपो धातुप्रातिपदिकयोरित्यस्यैव बाधकत्वमनेन ज्ञाप्यते। तस्यैवेह संभवात् । केचित्तु सामान्यापेक्षया ज्ञापकत्वाश्रयाल्लुलुङ्मात्रस्य बलवत्त्वाश्रयेण व्यवहारदर्शनाल्लुलुङ्मात्रं बाधकं ज्ञाप्यत इत्याहुः । **येऽन्य इति** । **एकवचनाधिकारादेकवचननिमित्तानामादेशान्तराणां** त्वमौ बाधकौ स्यातां नतु ज्ञापकाविति**यर्थः** । **यत्तर्हीति** । केचिद् व्याचक्षते । यद्यादेशान्तराणां त्वमौ बाधकौ स्यातां तदा मपर्यन्तग्रहणानुवृत्तिमन्तरेणोत्सर्गसमानदेशत्वादपवादानां मपर्यन्तस्य त्वमौ सिद्धाविति किं तदनुवृत्त्या । अनुवृत्त्या तु ज्ञाप्यते प्रागेव लुकि कृते विभक्त्यभावादसत्स्वादेशान्तरेषु त्वमौ विधीयेते इति । एतच्चायुक्तम् । नाय नियोग उत्सर्गसमानदेशोऽपवाद इति । श्रम्बहुजकजां भिन्नदेशानामप्यपवादत्वदर्शनात् । ततश्चासत्यां मपर्यन्तानुवृत्तावादेशान्तराणामपि बाधकौ त्वमौ सर्वादेशौ स्याताम् । अनेकालत्वात् ।

उ०-यत्परं तद्बलवदिति तदर्थः । विरोधिसंनिपात इत्यनेन भिन्नविषयागमादेशयोर्नापवादत्वमिति सूचितमिति केचित् । तन्न । नुम्नुटोर्बाध्यबाधकत्वानापत्तेः । **व्यवहारदर्शनादिति** । एङ्ह्रस्वात्संबुद्धेरित्यादौ भाष्यकृत इत्यादिः । अत एव सर्नीस्रंस इत्यादौ नलोपाभावः । पञ्चखट्व इत्यादौ चैकादेशात्प्रागेव टापो लुक् । अन्यथा कृतैकादेशस्य लुक्यकारश्रवणं न स्यात् । नच प्रत्ययग्रहणस्य प्रातिपदिकप्रकृतिकाचारक्विपि चारितार्थ्यात्कथं संपूर्णसूत्रस्य ज्ञापकत्वमुच्यते । एतद्भाष्यप्रामाण्येन नुड्विधायकभाष्यप्रामाण्येन चैताभ्यामाचारक्विपोऽभावात् । एतद्भाष्यप्राभाण्यादेव चैकार्थयोः प्रातिपदिकप्रकृतिकणिचोऽप्यनभिधानं बोध्यम् । इतोऽपि त्वादं मादमित्यादिरूपकल्पना प्रत्युक्ता । **एकवचनाधिकारादेकवचननिमित्तानामिति** । एकवचनरूपविभक्तिनिमित्तानामित्यर्थः । इदं व्यर्थम् । अधिकृतस्यार्थपरत्वादसंगतं च । **श्रम्बहुजकचामिति** । वस्तुतस्तेषु मित्स्वपुरस्तादग्रहणप्राकृटेर्ग्रहणैस्तस्य बाधेऽप्यन्यत्र तत्त्यागे किं मानमिति चिन्त्यम् । यद्यप्यसंभव एव बाधकत्वमिति वार्तिकमत उत्सर्गसमानदेशा अपवादा इति न्यायो भाष्यमते तु सत्यपि संभवे बाधकत्वस्वीकारस्तथाऽपि भाष्यमते वाचनिक्येवैषा ज्ञापकोपन्यासस्तु वार्तिकरीत्येति बोध्यम् । ज्ञापिते त्वस्मिन्नेतद्विषये तवादीनामप्राप्त्या

× ७. २. ७०; २. ४. ७१. * ७. २. ९६; ९५. + ७. २. ९१.

त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणम् ॥ १ ॥

त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणं द्रष्टव्यम्। त्रिचतुरोः स्त्रियां तिसृचतसृ [७. २. ९९]। यद्यपि समासः पुंसि नपुंसके वा वर्तते त्रिचतुरौ च स्त्रियां वर्तेते भवत्येव तिसृचतसृभावः। प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणस्य प्रियतिसा प्रियतिस्रौ प्रियतिस्रः। प्रियचतसा प्रियचतस्रौ प्रियचतस्रः। प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणकुलस्य प्रियतिसृ प्रियतिसृणी प्रिय-

---

प्र०—इति सप्रयोजना मपर्यन्तानुवृत्तिः। तस्मादन्यथा व्याख्यायते। तवममादय आदेशाः स्थानिप्रक्लृप्त्यर्थमिहानुवर्तन्ते। तत्र तवादीनां प्रसङ्गे सिद्धयोस्त्वमयोर्मपर्यन्तानुवृत्तिस्त्वया कृतं त्वत्कृतमित्याद्यर्था भवन्ती लुको बाधकत्वं ज्ञापयति। ततश्च तवाद्यनुवृत्तिसहिता मपर्यन्तानुवृत्तिर्ज्ञापनाय भवति। केवला हि मपर्यन्तानुवृत्तिर्लोपाय स्यात्। गरीयसी हि तवाद्यनुवृत्त्या स्थानिप्रतीतिः। ततो ज्ञापनाय प्रभवेत्तस्मात्तवाद्यनुवृत्तिसहिता समर्पन्तानुवृत्तिर्यथोक्तप्रकारेण यथोक्तार्थज्ञापनायालम्। त्रिचतुरिति। स्त्रियां द्विवचन एकवचन इति येऽर्था निर्दिष्टास्ते श्रूयमाणानामेव शब्दानां विशेषणं न त्वङ्गस्येत्यर्थः। प्राप्तविशेषणसंबन्धौस्त्रिचतुर्युष्मदस्मद्भिरङ्गं विशेष्यते। तत्र पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य ग्रहणं भवतीति केवलानां तदन्तस्य चाऽऽदेशप्रवृत्तिः। द्विवचनैकवचने च पारिभाषिके न गृह्येते किं तर्हि द्वयोर्वचनमभिधानं द्विवचनमेकस्य वचनमेकवचनमित्यर्थनिर्देशः। प्रियतिसेति। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्यकृत एव तिसृभावे लुकि कृते समासाद्या विभक्तिस्तस्यां तिसृभावः। स च निर्दिश्यमानस्याऽऽदेशा भवन्तीति त्रिशब्दस्यैव भवति। प्रियतिस्राविति। अचि र ऋत इति रादेशः। प्रियतिसृ इति। कथं पुनरत्र तिसृभावो यावता नित्यत्वात्स्वमोर्नपुंसकादिति लुकि कृते न

उ०—तदपवादत्वाभावेन मपर्यन्तस्यैवाऽऽदेशार्थं तदनुवृत्तिश्चरितार्था। अनेन च न्यायेनान्तरङ्गनिमित्तविनाशकलुकस्तत्प्रयोजकसमासादीनां च प्राबल्यं बोध्यत इति दिक्। भाष्ये यद्यन्यान्य इत्यादि स्युरित्यस्य प्राप्नुयुरित्यर्थः। तद्बाधनार्थं चैतत्स्यात्तदेति शेषः। तस्मादन्यथेत्यादि। इदं चिन्त्यमेव। अतिगुरुत्वात्। ज्ञापितेऽपि तवाद्यनुवृत्तेः सार्थक्यस्योपपादयितुमशक्यत्वाच्च। श्रूयमाणानामेवेति। भाष्ये शब्दशब्देन श्रूयमाणशब्दो लक्ष्यत इति भावः। प्राप्तेति। गुणः कृतात्मसंस्कार इति न्यायादिति भावः। नन्वेकवचन इत्येव सिद्ध इत्युपक्रमस्थभाष्यादेकवचनादिशब्दानां प्रत्ययपरत्वप्रतीतेर्युष्मदादिष्वर्थग्रहणमप्रसिद्धमत आह—द्विवचनैकेत्यादि। उपक्रमस्थभाष्यं तूपलक्षणपरतया व्याख्यातमेव। ननु प्रियतिसेत्यादावन्तर्वर्तिनीं विभक्तिमाश्रित्य तिसृभाव इति तन्निरूपितमङ्गं स्त्रियामेवेत्यङ्गविशेषणत्वेऽपि क्षत्यभावोऽत आह—अन्तरङ्गानपीति। नन्वङ्गस्य सर्वस्य तिस्रादेशः प्राप्नोतीत्यत आह—स चेति। रादेश इति। गुणं बाधित्वेति शेषः। नित्यत्वादिति। अन्त-

तिसृणि । प्रियचतसृ प्रियचतसृणी प्रियचतसृणि । यदा हि समासः स्त्रियां वर्तते त्रिचतुरौ च पुंसि नपुंसके वा तदा मा भूतामिति । प्रियास्रयो ब्राह्मणा अस्या ब्राह्मण्याः प्रियास्रिः प्रियस्री प्रियस्रयः । प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः । प्रियाणि त्रीणि ब्राह्मणकुलान्यस्या ब्राह्मण्या प्रियास्रिः प्रियस्री प्रियस्रयः । प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः ।

युवावौ द्विवचने [७. २. ९२] । यद्यपि समास एकार्थो वा भवति बह्वर्थो वा भवति द्व्यर्थे च युष्मदस्मदी भवत एव युवावौ । किमविशेषेण । नेत्याह । यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसि [७. २. ९३-९६] इत्येतान्विधीन्वर्जयित्वा । अतिक्रान्तो युवामतित्वम् अत्यहम् । अतिक्रन्तौ युवामतियुवाम् अत्यावाम् । अतिक्रान्ता युवामतियूयम् अतिवयम् । अतिक्रान्तं युवामतियुवाम् अत्यावाम् । अतिक्रान्तौ युवामतियुवाम् अत्वायाम् । अतिक्रान्तान्युवामतियुवान् अत्यावान् । अतियुवया अत्यावया अतियुवाभ्याम् अत्यावाभ्याम् अतियुवाभिः अत्यावाभिः । अतितुभ्यम् अतिमह्यम् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवभ्यम् अत्यावभ्यम् । अतियुवत् अत्यावत् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवत् अत्यावत् । अतितव अतिमम अतियुवयोः अत्यावयोः अतियुवाकम् अत्यावाकम् । अतियुवयि अत्यावयि अतियुवयोः अत्यावयोः अतियुवासु अत्यावासु ।

त्वमावेकवचने [७. २. ९७] । यद्यपि समासो द्व्यर्थो भवति बह्वर्थो वैकार्थे च युष्मदस्मदी भवत एव त्वमौ । किमविशेषेण नेत्याह । तानेव विधीन्वर्जयित्वा । अतिक्रान्तस्त्वामतित्वम् अत्यहम् । अतिक्रान्तौ त्वामतित्वाम् अतिमाम् । अतिक्रान्तास्त्वामतियूयम् अतिवयम् । अतिक्रान्तं त्वामतित्वाम् अतिमाम् । अतिक्रान्तौ त्वामतित्वाम् अतिमाम् । अतिक्रान्तांस्त्वामतित्वान् अतिमान् अतित्वया अतिमया अतित्वाभ्याम् अतिमाभ्याम् अतित्वाभिः

प्र०-लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधेन भाव्यम् । उच्यते । इकोऽचि विभक्ताविति त्राज्ग्रहणं ज्ञापकं क्वचिल्लुमता लुप्तेऽपि प्रत्ययलक्षणस्य । तथा च हे त्रपो इति संबुद्धिगुणो भवति । क्वचित्प्रियस्रीति पाठः । स प्रत्ययलक्षणप्रतिषेधाश्रयः । इतीति । एते विधयः

उ०-रङ्गानपीति न्यायाच्चेत्यपि बोध्यम् । भाष्ये-प्रियतिसृणीति । अत्र परत्वात्तिस्रादेशे प्रकृतिविशेषापेक्षरादेशापेक्षयाऽन्तरङ्गत्वेन पुनःप्रसङ्गविज्ञानाज्जुम् । न तिस्रिति निषेधेनाऽऽमविषये रादेशो नेति सामान्यतो ज्ञाप्यते भाष्योदाहरणाद्धिति बोध्यम् । एतद्वर्जनं च न वचनेन किंतु युष्मद्येवेत्याह--एते विधय इति । त्वाहादीनाम्-

अतिमाभिः। अतितुभ्यम् अतिमह्यम् आतित्वाभ्याम् अतिमाभ्याम् आतित्वभ्यम् अतिमभ्यम्। आतित्वत् अतिमत् अतित्वाभ्याम् अतिमाभ्याम् अतित्वत् अतिमत्। अतितव अतिमम अतित्वयोः अतिमयोः अतित्वाकम् अतिमाकम्। अतित्वयि अतिमयि अतित्वयोः अतिमयोः अतित्वासु अतिमासु।

यद्येवं यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसीत्येतेभ्यो विधिभ्यः परत्वात्त्वमावेकवचन इति प्राप्नोति सावकाशा ह्येते विधय इदानीं भवन्ति। कोऽवकाशः। अनेकार्थे युष्मदस्मदी। त्वमावेकवचन इत्यस्यावकाशः। अन्यानि वचनानि। एकार्थयोर्युष्मदस्मदोरेतेषु वचनेषूभयं प्राप्नोति। परत्वात्त्वमावेकवचन इति प्राप्नोति। नैष दोषः। शेष इति* वर्तते। कश्च शेषः। जसादिभिरव्याप्तं यदेकवचनं तस्मिन्शेषे। अशेषत्वान्न भविष्यति। अथवा त्वमावेकवचन इत्यत्र यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसीत्येतदनुवर्तिष्यते।

त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ७। २। ९९ ॥

तिसृभावे संज्ञायां कन्युपसंख्यानम् ॥ १ ॥

प्र०—परत्वाद्युवावयौर्बाधकाः। **शेष इति वर्तत इति**। अन्यथाऽतिक्रान्तो युष्मानतित्वमत्यहम्। अतिक्रान्ताय युष्मानतितुभ्यमतिमह्यम्। अतिक्रान्तस्य युष्मानतितवातिमम। इत्यनेकार्थत्वे युष्मदस्मदोः समासे सावकाशास्त्वाहादयोऽसमासे समासेऽपि युष्मदस्मदोरेकार्थत्वे परत्वात्त्वमाभ्यां बाधनान्न प्राप्नुवन्ति। त्वमहं तुभ्यं मह्यं तव ममेति। शेषग्रहणानुवृत्तौ तु यत्र यूयादयो न भवितारस्तत्र त्वमौ भवतो नतु यूयादिविषये। तच्च शेषग्रहणं लोपग्रहणसंबन्धानुवृत्त्या यूयादिभिर्न संबध्यते। त्वमावेकवचन इत्यत्र तु लोपग्रहणं निवृत्तं शेषग्रहणमनुवर्तत इति न कश्चिद्दोषः। **अथवेति**। वाक्यभेदेन त्वमयोर्विषये यूयादयो विधीयन्ते।

उ०—वकाशो बहुवर्थे युष्मदस्मदी। युवावयोरवकाशो युवामावामिति। अतियुवाकमतित्वाकमित्यादावत एव भाष्यप्रयोगात्सुटे इव नुटोऽप्याकमा निवृत्तिर्यथा भवति तथोक्तमाकमसूत्रे। ननु शेषपदानुवृत्तौ यूयवयौ जसीत्यादावपि तत्संबन्धः स्यादत आह—**तच्चेति**। भाष्ये—**जसादिभिरव्याप्तं यदेकवचनमिति**। जसादिनिमित्तादौ शेरव्याप्तो य एकार्थो युष्मदादिरित्यर्थः। यद्वैकार्थयुष्मदादिप्रकृतिकविभक्तिरित्यर्थः। शेषग्रहणस्य मध्ये विच्छिन्नत्वादाह—**अथवेति**। नन्वेकवाक्यतायां जसादिविषय एवोभयं स्यादत आह—**वाक्यभेदेनेति**। पुनर्विधानाच्च तद्विषये त्वमयोर्बाधः। वस्तुतः पूर्वविप्रतिषेधः कल्प्य इत्येतद्भाष्यतात्पर्यम्।

---

* ७. २. ९०.

तिसृभावे संज्ञायां कन्युपसंख्यानं कर्तव्यम् । तिसृका नाम ग्रामः ।

चतसर्याद्युदात्तनिपातनं च ॥ २ ॥

चतसर्याद्युदात्तनिपातनं कर्तव्यम् । त्रिचतुरोः स्त्रियां तिसृचतसृ । किं प्रयोजनम् । चत्तस्रः पश्य शसि स्वरो* मा भूदिति । किंचान्यत् ।

उपदेशिवद्वचनं च ॥ ३ ॥

उपदेशिवद्भावश्च वक्तव्यः । किं प्रयोजनम् ।

स्वरसिद्ध्यर्थम् ॥ ४ ॥

उपदेशावस्थायामेवाद्युदात्तनिपातने कृते विभक्तिस्वरेण+ बाधनं यथा स्यात् । चतसृणामिति । स तर्ह्युपदेशिवद्भावो वक्तव्यः । न वक्तव्यः ।

उक्तं वा ॥ ५ ॥

प्र०- **त्रिच०** । **तिसृकेति** । तिस्र एव तिसृका । स्वार्थे कन्प्रत्ययः । ह्रस्वत्वे कुत्सितत्वे वा विवक्षिते संज्ञायां कनिति वा । तत्र विभक्तेर्लुकि कृते विभक्तौ विधीयमानस्तिसृभावो न प्राप्नोतीति वचनम् । तत्र केचिद्बहुवचनान्तस्तिसृकाशब्दः संज्ञेत्याहुः । अपरे त्वेकवचनान्त इति । ग्रामस्य ह्येकस्य तिसृकेति संज्ञेति नास्ति बहुवचनप्रसङ्गः । **चतस्र इति** । चतुरः शसीत्यनेन स्थानिषद्भावादन्तोदात्तत्वं प्राप्नोति । तत उदात्तयणो हल्पूर्वादिति शस उदात्तत्वप्रसङ्गः । **चतसृणामिति** । उपदेशावस्थायामाद्युदात्ते चतस्रादेशे कृते षट्त्रिचतुर्भ्यो हलादिरिति सति शिष्टस्वरः प्रवर्तते । यद्येवं चतस्रः पश्येत्यत्रापि चतुरः शसीति सति शिष्टत्वात्प्राप्नोति । नैष दोषः । आन्तरतम्यादाद्युदात्तत्वे सिद्धे पुनराद्युदात्तत्वं निपात्यमानं चतुरः शसीत्यनेन विधीयमानं स्थानिवद्भावात्प्राप्तमन्तोदात्तत्वं बाधते । तत्र बाधितत्वात्पुनःप्रसङ्गाभावात्कुतः सति शिष्टत्वम् । **उक्तमिति** । चतुरः शसीत्यत्र । हलादिग्रहणं चतस्रः पश्येत्येतद्व्यावृत्त्यर्थमेव क्रियते । यदि च निपातनस्वरेण विभक्तिस्वरो बाध्येत तदा हलादिग्रहणमन्तरेणापि विभक्तेः स्वरो न भविष्यतीति किं हलादिग्रहणेन । तत्क्रियमाणं निपातनस्वरस्य विभक्तिस्वरो बाधक इति ज्ञापयति। अथवा हलादिग्रहणेनाऽऽद्यु-

---

उ०- **त्रिचतुरोः** । **विभक्तेर्लुकीति** । अन्तरङ्गानपीति न्यायादिति भावः । **शस उदात्तत्वेति** । आद्युदात्तं च पदमिष्यते । **आन्तरतम्यादिति** । चतेरुरन्नन्तत्वेन चतुःशब्दस्याऽऽद्युदात्तत्वादिति भावः । **पुनःप्रसङ्गाभावादिति** । आद्युदात्तनिपातनसामर्थ्यात्स्वाश्रये प्राप्तान्तोदात्तत्वबाधाद्विभक्तिस्वरस्तु बाधक एवेत्याद्युदात्तनिपातनोपदेशिवद्भाववचनाभ्यां कल्प्यत इति तत्त्वम् । क्रोक्तं तदाह—**चतुरः शसीत्यत्रेति** । षट्त्रीतिसूत्रस्थहलादिग्रहणसामर्थ्यमुपपादयति—**हलादिग्रहणमिति** । निपातनमेव न कर्तव्यमिति पाठः । इयमेव व्याख्या ' आद्युदात्तनिपातने हि ' इति भाष्य-

---

* ६. १. १६७. + ६. १. १७९.

किमुक्तम्। विभक्तिस्वरभावश्च हलादिग्रहणादाद्युदात्तनिपातने हि हलादिग्रहणानर्थक्यमिति×।

अचि र ऋतः ॥ ७। २। १०० ॥

अचि रादेशे जस्युपसंख्यानं गुणपरत्वात् ॥ १ ॥

अचि रादेशे जस्युपसंख्यानं कर्तव्यम्। तिस्रस्तिष्ठन्ति। चतस्रस्तिष्ठन्ति। किं पुनः कारणं न सिध्यति। गुणपरत्वात्। परत्वाद्गुणः प्राप्नोति+। तत्तर्हि वक्तव्यम्।

न वाऽनवकाशत्वाद्रस्य ॥ २ ॥

न वा वक्तव्यम्। किं कारणम्। अनवकाशत्वाद्रस्य। अनवकाशो रादेशो गुणं बाधिष्यते। सावकाशो रादेशः। कोऽवकाशः। तिस्रः पश्य। चतस्रः पश्य। नैषोऽस्त्यवकाशः। अत्रापि पूर्वसवर्णदीर्घः प्राप्नोति+। स यथैव पूर्वसवर्णं बाधत एवं गुणमपि बाधिष्यते। गुणोऽप्यनवकाशः। सावकाशो

प्र०—दात्तनिपातनमेव न कर्तव्यमिति प्रतिपाद्यते। यदि चतस्रः पश्येत्यत्र चतुरः शसीत्यनेनान्तोदात्तत्वं स्यात्तत उदात्तयणो हल्पूर्वादिति स्यादेव विभक्तेराद्युदात्तत्वमिति तद्व्यावृत्तये हलादिग्रहणमनर्थकं स्यात्तस्माद्धलादिग्रहणाच्चतस्रः पश्येत्यत्र चतुरः शसीत्यस्याप्रवृत्तिरध्यवसीयते। ततश्चाऽऽद्युदात्तस्य चतुःशब्दस्याऽऽद्युदात्त एवाऽऽन्तर्यात्च्वतस्रादेशो भवति। चतुःशब्दो नरः संख्याया इति वा चतेरुरन्निति निपातत्वाद्वाऽऽद्युदात्तः। चतसृणामित्यत्र तु षट्त्रिचतुर्भ्य इति विभक्तेरुदात्तत्वं भवति।

अचि०। अचि **रादेश इति**। मध्येऽपवादा इति पूर्वसवर्णदीर्घस्य ऋत उदित्युत्त्वस्य च बाधः प्राप्नोति न तु जसि च ऋतो ङिसर्वनामस्थानयोरिति गुणस्येति भावः। **नवेति**। मध्येऽपवादा इति परिभाषानाश्रयेणोच्यते विध्यन्तरपूर्वकत्वादस्य सर्वापवादत्वमित्यर्थः। **गुणोऽप्यनवकाश इति**। सोऽपि विध्यन्तर-

---

उ०—स्वरससिद्धेति बोध्यम्। **हलादिग्रहणादिति**। वस्तुतः परत्वाद्रादेशे तस्य स्थानिवत्त्वात्तकाराकारस्य न चतुरः शसीत्यनेनोदात्तत्वम्। स्वविधौ स्थानिवत्त्वाभावाच्च न ऋकारस्येति व्यर्थमेवाऽऽद्युदात्तनिपातनमिति पूर्वमुक्तम्। **विभक्तेरुदात्तत्वमिति**। स्थानिवद्भावेन सति शिष्टत्वादिति भावः।

अचिर०। ननु विध्यन्तरानाक्रान्तविषयाभावात्सर्वापदोऽयमिति किं वचनेनेत्यत आह—**मध्य इति**। वार्तिके जसीत्युपलक्षणं प्रियतिस्रावित्याद्यर्थमप्युपसंख्यानावश्यकत्वात्। ततश्च पूर्वबाक्येन सावकाशं रादेशं सर्वनामस्थानगुणो जसि गुणश्च परत्वाद्बाधेतेत्युपसंख्यानं कर्तव्यमित्यर्थः। **सर्वापवादत्वमिति**। बाध्यसामा-

---

× ६. १. १६७.* + ७. ३. १०९; ११०. + ६. १. १०२.

गुणः । कोऽवकाशः । हे कर्तः । नैष सर्वनामस्थाने गुणः । कस्तर्हि । संबुद्धिगुणः* । अयं तर्हि । हे मातः । एषोऽपि संबुद्धिगुण एव । नात्र संबुद्धिगुणः प्राप्नोति । किं कारणम् । अम्बार्थनद्योर्ह्रस्वः [७. ३. १०७] इति ह्रस्वत्वेन भवितव्यम् । भवेद्दीर्घाणां ह्रस्ववचनसामर्थ्यान्न स्याद्ध्रस्वानां तु खलु ह्रस्वत्वं क्रियतां संबुद्धिगुण इति परत्वात्संबुद्धिगुणेन भवितव्यम् । अथापि

प्र०—पूर्वकः । कर्तारावित्यत्र पूर्वसवर्णदीर्घः प्राप्नोति । कर्तार इत्यत्र जसि चेति गुणः सिद्धः । कर्तारमित्यत्राप्यमि पूर्व इति प्राप्नोति । तत्र द्वयोर्विध्यन्तरापवादयोरपवादविप्रतिषेधात्परत्वाद्गुणप्रसङ्गः । इतरोऽन्यविधिपूर्वकत्वाभावं गुणस्य दर्शयति—**सावकाश इति** । हे **कर्तरिति** । संबुद्धौ ह्रस्वस्य गुण इति गुणं परत्वाद्दत्तो ङीति गुणो बाधत इति मन्यते । तत्र कर्तारावित्यादौ यद्यपि परत्वात्पूर्वसवर्णादिकं बाधित्वा गुणो भवति तथाऽपि विध्यन्तरपूर्वकेण रादेशेन बलीयसा न स्पर्धत इति भावः । **नैष इति** । एतदर्थो गुणस्य नाऽऽरम्भो लक्षणान्तरेण सिद्धत्वादित्यर्थः । हे **मातरिति** । संबुद्धिनिमित्तो गुणोऽत्र नास्ति । अम्बार्थनद्योर्ह्रस्व इति ह्रस्वेन बाधनात् । **एषोऽपीति** । गुणो ह्रस्वत्वं परत्वाद्बाधत इति भावः । **अम्बार्थेति** । अस्मिंश्च सति ऋतो ङीति गुणः प्रवर्तते । **भवेद्दीर्घाणामिति** । ननु दीर्घाणां ह्रस्वविधानं ह्रस्वस्य गुण इति गुणविधानार्थमेव स्यात् । ह्रस्वानां तु ह्रस्वविधानं गुणबाधनार्थं स्यात् । नैतदस्ति । एवं हि दीर्घाणामेव गुणं विदध्यात् । नदा ह्रस्वयोर्गुण इति प्रक्रियागौरवमेवं परिहृतं भवति । **परत्वात्संबुद्धिगुणेनेति** । गुण-

---

उ०—न्यचिन्ताश्रयणादिति भावः । इदमेवाऽऽचार्योक्तं समाधानम् । ध्वनितं चेदं तृज्वत्क्रोष्टुरिति सूत्रे भाष्ये । चोदक आह—**गुणोऽपीति** । तदाशयमाह—**सोऽपि** । सर्वनामस्थानगुणोऽपि । द्वयोः । रादेशसर्वनामस्थानगुणयोः । **इतर इति** । सिद्धान्त्येकदेशीत्यर्थः । ननु हे कर्तरित्यत्र संबुद्धिगुण एव प्राप्नोति न सर्वनामस्थानगुणोऽत आह—**संबुद्धाविति** । **विध्यन्तरपूर्वकेणेति** । उदाहरणमात्रे विध्यन्तरपूर्वकेणेत्यर्थः । गुणस्तु हे कर्तरित्यत्र न विध्यन्तरपूर्वक इति भावः । **एतदर्थ इति** । यदर्थो यस्याऽऽरम्भः स एव तस्यावकाशो युक्त इति भावः । **संबुद्धिनिमित्त इति** । एवं च सर्वनामस्थानगुण एवात्र प्राप्नोतीत्ययं तस्यावकाश इति भावः । ननु हे मातरित्यत्र ह्रस्वप्राप्तेः कथं संबुद्धिगुणोऽत आह—**गुणो ह्रस्वत्वमिति** । **अस्मिंश्च सतीति** । ह्रस्वश्च येन नाप्राप्तिन्यायेन संबुद्धिगुणस्यैव बाधको नास्येति भावः । **गुणबाधनार्थमिति** । प्रयोजनान्तराभावादिति भावः । **एवं हीति** । यदि ह्रस्वे कृते दीर्घान्तेषु गुणः स्यात्तर्हि नद्या एव गुणं विदध्यादिति

---

* ७. ३. १०८.

कथंचित्सावकाशो गुणः स्यादेवमपि न दोषः। पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इत्येवमयं रादेशो जसि गुणं* बाधते सर्वनामस्थानगुणं+ न बाधिष्यते। तस्मात्सुष्ठूच्यतेऽचि रादेशे जस्युपसंख्यानं गुणपरत्वादिति।

प्र०—स्यावकाशः। अग्ने। वायो। ह्रस्वस्यावकाशः। अम्ब अक्क। हे मातरिति परत्वाद्गुणः। एवं च सर्वनामस्थानगुणः पूर्वसवर्णापवाद एवेति। अपवादविप्रतिषेधात्तिस्रस्तिष्ठन्तीति परत्वाद्गुणप्रसङ्गः। स च न जसि चेत्यनेन किं तर्हि ऋतो ङीत्यनेन जसि चेत्यस्मात्परत्वात्। **अथापीति**। ह्रस्वस्य गुण इति यदि योगविभागः क्रियतेऽम्बार्थस्य ह्रस्वान्तस्य ह्रस्वो भवति ततो गुण इति। ततश्च हे मातरित्यत्र ह्रस्वे कृते सर्वनामस्थानगुणः क्रियते। एतच्चाभ्युपगम्योच्यते नतु योगविभागस्य किंचिदस्ति प्रयोजनम्। **सर्वनामस्थानगुणमिति**। यद्यप्यबाधिते सर्वनामस्थानगुणे जसि गुणः फलतो न बाधितस्तथाऽपि लक्षणव्यवस्थानुसारेणैतदुच्यते। नह्ययं रादेशोऽनवकाशो यत ऋतो ङिसर्वनामस्थानयोरित्येतं गुणं बाधेत जसि चेति गुणबाधनेन ऋत उदित्युत्त्वबाधनेन शसि पूर्वसवर्णबाधनेन च सावकाशत्वात्। **तस्मादिति**। जसिग्रहणं ङिसर्वनामस्थानोपलक्षणमित्याहुः। तथा च प्रियतिस्राविति रादेशो भाष्य उदाहृतः। तेन प्रियतिस्रि निधेहीत्यत्रापि रादेशो भवति। कोचित्त्वाहुः। चतसर्याद्युदात्तनिपातनमित्यत्र वार्तिके रादेशस्य ङावकरणाज्जसोऽन्यत्र गुणविषये रादेशं वार्तिककारो नेच्छतीति नोपलक्षणं जस्ग्रहणम्।

उ०—दीर्घाणां ह्रस्वविधानं गुणबाधनार्थमिति भावः। ननु जसि चेति गुणः प्राप्नोतीति ऋतो ङीत्यस्यानवकाशत्वविचारो निष्फलोऽत आह—**स च नेति**। परस्परं गुणाभ्यां स्थानिरूपनिमित्तविधाताद्विरोधोऽस्तीति भावः। **योगविभाग इति**। तत्र ह्रस्वस्येत्येको योगः। तत्राम्बार्थग्रहणं ह्रस्व इति चानुवर्तते तदयमर्थः—अम्बार्थानां ह्रस्वस्य ह्रस्वो भवतीति। एतच्च परत्वात्प्राप्तस्य ह्रस्वीयसंबुद्धिगुणस्य संबुद्धौ बाधनार्थमेवेति भावः। एवं च सर्वनामस्थानगुणो विध्यन्तराबाधेन प्रवृत्त्या सावकाश इति तात्पर्यम्। **न त्विति**। योगविभागेऽप्युपसंख्यानस्य वक्ष्यमाणरीत्याऽवश्यकर्तव्यत्वादिति भावः। **फलतो न बाधित इति**। सर्वथा गुणस्य प्राप्तत्वात्। वस्तुतोऽथापि कथंचिदिति भाष्यस्यायमर्थः। येन नाप्राप्तिन्यायेन सर्वनामस्थानगुणः पूर्वसवर्णदीर्घमेव बाधते न रादेशमित्यर्थः। एवं च बाध्यविशेषचिन्ताश्रयणेऽत्रापि तथैव दोषः। तस्माज्जस्युपसंख्यानं कर्तव्यमिति चोद्यान्तमेवेदमेकदेश्युक्तिरूपं भाष्यम्। समाधितत्त्वं तु लक्ष्यानुरोधादृतो ङीत्यत्र बाध्यविशेषचिन्ताश्रयणमत्र तु बाध्यसामान्यचिन्ताश्रयणमिति न वाऽनवकाशत्वाद्ह्रस्वेत्यनेनोक्तमेवेति सुधियो विभावयन्तु। **केचित्त्वाहुरिति**। अत्रारुचिबीजं तु तत्र शब्दपरत्वाद्रादेशाप्राप्तिरिति।

---

* ७. ३. १०९. + ७. ३. ११०.

जराया जरसन्यतरस्याम् ॥ ७ । २ । १०१ ॥

नुमोऽनङ्जरसौ भवतो विप्रतिषेधेन । नुमोऽवकाशः* । त्रपुणी जतुनी तुम्बुरुणी । अनङोऽवकाशः+ । प्रियसक्थ्ना ब्राह्मणेन । इहोभयं प्राप्नोति । दध्ना सक्थ्ना । जरसोऽवकाशः । जरसा जरसे । नुमोऽवकाशः× । कुण्डानि वनानि । इहोभयं प्राप्नोति । अतिजरांसि ब्राह्मणकुलानि । अनङ्जरसौ नुमो भवतो विप्रतिषेधेन ।

अथेह लुक्स्मान्न भवति÷ । अतिजरसं पश्येति । किं पुनः कारणं द्वितीयैकवचनमेवोदाहियते न पुनः प्रथमैकवचनमपि । अतिजरसं तिष्ठतीति । अस्त्यत्र विशेषः । नात्राकृतेऽम्भावे+ जरस्भावः प्राप्नोति । किं कारणम् । अचीत्युच्यते । यदा च जरस्भावः कृतस्तदा लुग्न भविष्यति सन्निपातलक्षणो

प्र०— **जरायाः** । **प्रियसक्थ्नेति** । नपुंसकेनाङ्गस्य विशेषणान्नुमोऽत्राप्राप्तिरनङ्विधौ त्वस्थ्यादीनां विशेषणं नपुंसकमित्यनङ् भवति । **अतिजरांसीति** । अतिजर अस् इति स्थिते यदि पूर्वं नुमागमः स्यात् । स च पूर्वाङ्गभक्तोऽङ्गमेव न व्यवदध्यात् । अवयवस्य तु जराशब्दस्य व्यवधायक इति निर्दिश्यमानस्याऽऽदेशो विधीयमानो न प्राप्नोति । अथापि स्यात्तथाऽपि सकारात्परस्य नुमः श्रवणं स्यात्तस्मात्परत्वात्पूर्वं जरस्भाव एष्टव्यः । तत्र कृते झलन्तलक्षणो नुमागमः । **अतिजरसं पश्येति** । अतिजर अम् इति स्थित एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरसि कृते स्वमोर्नपुंसकादिति स्वमोर्लुकप्राप्नोति । ननु चातिजरशब्दस्यादन्तत्वादतोऽमित्यम्भावेन लुक् बाधितः कथं प्राप्नोति । नैतदस्ति । नात्राम्भावः प्रवृत्तः परत्वान्नित्यत्वाद्वा जरसादेशेन बाधितत्वाज्जरसादेशे कृतेऽनकारान्तत्वादम्भावाप्रसङ्गाल्लुक्प्राप्तिश्चोद्यते । **न पुनरिति** । सोरपि लुड् नेष्यते । **यदा च जरस्भाव इति** । या पूर्वं लुक्प्राप्तिः

उ०— **जराया ज०** । ननु प्रियसक्थ्नेत्यत्रापि सक्थिशब्दस्य नपुंसकत्वान्नुमः प्राप्त्या कथमनङोऽवकाशोऽत आह—**नपुंसकेनेति** । नुम्जरसोर्विप्रतिषेधस्य फलं दर्शयति— **अतिजर अस् इति स्थित इति** । टाङसीति सूत्रोक्तरीत्या जरसादेशापेक्षया पूर्वविप्रतिषेधेन विभक्त्यादेशशिभावे कृत इति शेषः । अन्यथा सर्वनामस्थानपरत्वाभावेन नुमोऽप्राप्तिरेव स्यात् । स चाङ्गभक्त इति पाठ उचितः । अथापि स्यादित्यभ्युपगमवादः । **स्वमोर्लुगिति** । न चास्यामवस्थायाममप्रसङ्गः । अनदन्तत्वात् । ननु पूर्वममा बाधितस्य लुकः कथं पुनः प्रवृत्तिर्भ्रष्टावसरत्वादिति शङ्कते—**ननु चेति** । भ्रष्टावसरन्यायोऽत्र शास्त्रे नाऽऽश्रीयत इत्युत्तराशयः । **परत्वान्नित्यत्वाद्वेति** । चिन्त्यमेतत् । अपरनिमित्तकत्वेन प्रकृतिसामान्यापेक्षत्वेन विभक्त्यादेशस्यान्तरङ्गत्वात् । अत एव नुम्जरसोर्विप्रतिषेध उक्तः संगच्छते । किंचान्तरङ्गानपीति न्यायेन लुको बलवत्त्वात्तद्बाधेनामादेशप्रवृत्तिं विना

---

* ७. १. ७३. + ७. १. ७५. × ७ १. ७२. – ७. १. २३. + ७. १. २४.

विधिरनिमित्तं तद्विघातस्येति । यद्येवमतिजरसम् अतिजरसैरित्यत्र* न प्राप्नोति× अतिजरम् अतिजरैरिति भवितव्यम् । गोनर्दीय आह । इष्टमेवैतत्संगृहीतं भवति । अतिजरम् अतिजरैरिति भवितव्यं सत्यामेतस्यां परिभाषायां संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति ।

प्र०—साऽपवादेन बाध्यते । कृते तु जरस्भावे संनिपातपरिभाषयाऽजादिसंनिपातेन जरस्भावो निष्पन्नो नोत्सहतेऽजाद्यानन्तर्यं विहन्तुम् । **यद्येवमिति** । सोर्भिसश्चाकारान्तसंनिपातेनाजादिरादेशोऽकारान्तविघातिनं जरसादेशं प्रत्यनिमित्तं स्यात् । **इष्टमिति** । संनिपातपरिभाषावशात् । अतिजरसं पश्येत्यत्र तु नाकारान्तसंनिपातकृ-

---

उ०—जरसोऽप्रवृत्तेः । पुनर्लुगापादानं तु भिन्ननिमित्तकत्वान्न दोषायेति बोध्यम् । **साऽपवादेनेति** । अम्भावेनेत्यर्थः । **संनिपातपरिभाषयेति** । बाध्यत इत्यनुषङ्गः । तदुपपादयति—**अजादीति** । **अनिमित्तं स्यादिति** । इत्यत्र न प्राप्नोतीति भाष्यस्य जरसादेश इति शेषः । नचानयैव परिभाषया द्वितीयान्तेऽपि जरसभावो न स्यादत आह—**अतिजरसं पश्येति** । **नाकारान्तसंनिपातकृतामिति** । किंतु तदभावेऽप्यजादित्वमस्तीति भावः । एवं च संनिपातलक्षणविधिं विनाऽपि यस्य प्रवृत्तियोग्यता तत्र नायं न्याय इति तात्पर्यम् । केचित्त्वमि कृते संनिपातलक्षणविधिनिमित्त एव जरसादेश इति न भवत्येव द्वितीयैकवचनेऽपि जरस् । कैयटोक्तार्थे तु न मानम् । अमः पूर्वं तु सर्वतो बलवल्लुक्प्राप्त्या न जरस् । शिभाववदुक्तयुक्तेश्च । अत एव साधारण्येनैवातिजरमिति भवितव्यमिति भगवतोक्तम् । अत एव टाङसीति सूत्रेऽतिजरेणेत्येव रूपं संनिपातपरिभाषया कैयटेनोक्तमित्याहुः । एवं च तत्र लुक्प्राप्तिचोद्यमप्यर्थात्परिहृतमेवेति भगवता साक्षान्नोक्तः परिहारः । परे त्वतिजरसं पश्येत्यत्र लुक् कस्मान्न भवतीति पूर्वपक्षे परेणातिजरसं तिष्ठतीति कुतो नोदाह्रियत इति प्रश्ने पूर्वपक्षिणा क्रियमाणे विशेषोपपादने नात्राकृतेऽम्भावे जरस्प्राप्नोति कृते च जरसि न लुकः प्राप्तिः संनिपातपरिभाषयेत्युक्तिरनुचिता । तथा सति स्वपूर्वपक्षस्याप्यपगमेनास्त्यत्र विशेष इति प्रतिज्ञाहानेः । तस्मादेवं पाठ उचितोऽस्त्यत्र विशेषो नाकृतेऽम्भावे जरस् प्राप्नोति किं कारणमचीत्युच्यते यदा चाम्भावः कृतस्तदा जरस् न प्राप्नोति संनिपातेत्यादि । दृश्यते चातिचिरंतनपुस्तकेषु तथा पाठः । एवं च प्रथमैकवचनमिदं रूपमेव दुर्लभमिति भावः । एवं तर्हि द्वितीयैकवचनेऽपि जरस् प्राप्नोतीति शङ्कते—यद्येवमतिजरसमित्यादि । उक्ताशयः सिद्धान्ती इष्टापत्त्या परिहरति—इष्टमेवैतदित्यादिना । एवं च द्वितीयैकवचने लुगापत्तिः समाहिता । किंच

---

* ७. १. २४; ९. × ७. २. १०१.

त्यदादीनामः ॥ ७ । २ । १०२ ॥

त्यदादीनां द्विपर्यन्तानामकारवचनम् ॥ १ ॥

त्यदादीनां द्विपर्यन्तानामत्वं वक्तव्यम् । किं प्रयोजनम् । युष्मदस्मदन्तानां भवदन्तानां वा मा भूदिति+ तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः ।
शेषे लोपस्य लोपेन ज्ञायते प्राक्ततोऽदिति ॥ १ ॥

प्र०—तमजादित्वं भवतीति भवत्येव जरसादेशः । स त्वजादिसंनिपातनिमित्तत्वादजादेर्लुकं प्रत्यनिमित्तमिति लुगभावः ।

त्यदा०। युष्मदस्मदन्तानामिति। युष्मद्भवतु अस्मद् इति येषां गणपाठस्तदपेक्षयैतदुक्तम्। यद्यप्यस्मच्छब्द एवान्तस्तथाऽप्यत्यन्तसाहचर्याच्छास्त्रे युष्मदस्मदोर्युष्मच्छब्दो निर्दिष्टः। **भवदन्तानां वेति**। युष्मद् अस्मद्भवत्विति पाठापेक्षमेतत्। किंशब्दस्य तु कादेशेन भवितव्यमिति त्यदादीनामन्तेऽपि किमः पाठे किमन्तानामिति नोक्तम्। केचित्तु द्विशब्दात्पूर्वं किंशब्दमधीयते। तेन किसर्वनामबहुभ्योऽद्व्यादिभ्य इति किमो भेदेन ग्रहणं न कर्तव्यं भवति। तत्र भवच्छब्दस्यात्वापत्तिर्दोषो युष्मदस्मदोस्त्वात्वयत्वलोपैरत्वं बाध्यत इति दोषाभावः। **शेषे लोपस्य लोपेनेति**। यः शेषे लोपः प्रसिद्धस्तत्संबन्धिना लोपशास्त्रेणेत्यर्थः। क्वचित्तु शेषे रूपस्य लोपेनेति पाठः। तत्रायमर्थः। शेषे विषये रूपस्य लोपो विधीयते येन तेन। **ततोऽदिति**। वृत्तपूरणार्थस्तपरनिर्देशः। सूत्रे त्वतपर एवा-

---

उ०—द्वितीयैकवचने लुक् कुतो नेति प्रश्ने परेण प्रथमैकवचनमपि कुतो नोदाह्रियत इति शङ्किते पूर्वपक्षिणा तत्र विशेष उपपादिते यद्येवमिति ग्रन्थः परस्य पूर्वपक्षिणं प्रतीति स्वरसतः प्रतीयते। अतस्तस्य तदुदाहृतद्वितीयैकवचनविषयतैवोचितेति मदुक्तपाठ एवोचित इत्याहुः।

त्यदादीनामः। नन्वत्र पाठेऽस्मदन्तानामित्येव वक्तुमुचितमत आह—**यद्यपीति**। केचित्तु भवतु युष्मदस्मदिति पाठाश्रयेण भाष्यमित्याहुः। **अत्यन्तेति**। युष्मदस्मभ्यामित्यादौ। नन्वन्ते किमः पाठात् किमन्तानामिति वक्तुमुचितमत आह—**किंशब्दस्य त्विति**। नन्वेवमपि भवदन्तानामित्ययुक्तम्। अग्रे कस्याप्यभाव एवान्तशब्दप्रयोगात्। अत्र च किशब्दोऽग्रेऽस्ति भवत्पर्यन्तानामिति वक्तुं युक्तम्। अत एव वार्तिके परिशब्दोच्चारणमत आह—**केचित्त्विति**। तन्मतानुसारेण तथोक्तमिति भावः। वार्तिकानारम्भे दोषं दर्शयति—**तत्रेति**। ननु लोपस्य लोपेनेत्ययुक्तम्। लोपस्य लोपान्तराभावादत आह—**यः शेष इति**। लोपशब्देन तद्विधायि शास्त्रं लक्ष्यत इत्यर्थः। लोप इति करणे घञिति भावः। **वृत्तपूरणार्थ इति**।

+ १. १. २७; ग°.

यदयं त्यदादीनामत्वेन सिद्धे युष्मदस्मदोः शेषे लोपं शास्ति× तज्ज्ञापयत्याचार्यः प्राक्ततोऽत्वं भवतीति। न सर्वेषामिति।

अपि वोपसमस्तार्थमत्वाभावात्कृतं भवेत्।

नैतदस्ति ज्ञापकम्। उपसमस्तार्थमेतत्स्यात्। अतियूयम् अतिवयम्। उपसमस्तानां हि त्यदादीनामत्वं नेष्यते। अतितत् अतितदौ अतितदः।

टिलोपष्टाबभावार्थः कर्तव्य इति तत्स्मृतम्॥ २॥

यस्तु शेषे लोपष्टिलोपः स वक्तव्यः। किं प्रयोजनम्। टाप्प्रतिषेधार्थम्। टाब्मा भूदिति। स तर्हि टिलोपो वक्तव्यः। न वक्तव्यः।

प्र०—कारो निर्दिष्टः। **अपि वेति**। ज्ञापकत्वं विघटयति। उपसर्जनानां त्यदाद्यत्वाभावादुपसर्जनयुष्मदस्मदर्थो लोपः स्यात्। **अतियूयमिति**। त्वामतिक्रान्ता इति प्रादिसमासः। **टिलोप इति**। अत्वे सति टाप्प्रसङ्गात्तद्भावार्थः शेषे लोपष्टिलोपः सति प्रयोजने न ज्ञापकम्। अलिङ्गे युष्मदस्मदी इत्यनभ्युपगम्यैतदुच्यते। एकपदवाच्यस्याप्यर्थस्य शब्दान्तराभिव्यङ्ग्यत्वं दृश्यते। अश्वस्त्वं ग्रामामिति लिङ्गवत्त्वं कैश्चित्तयोरभ्युपगतम्। अत एव नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा इति विप्रतिषेधः पठितो न षट्स्वस्रादिभ्य इति च स्त्रीप्रत्ययनिषेधः षड्भ्यः कृतः। **स तर्हीति**। नन्वनेन सिद्धत्वाद्वचनाट्टिलोपो भविष्यति। नैतदस्ति। सर्वादेशः

उ०—चिन्त्यमेतत्। ततोऽइतीति पाठेऽपि वृत्तपूरणात्। मुखसुखार्थ इति वक्तुमुचितम्। **सूत्रे त्वतपर एवेति**। नतु वार्तिकदर्शनेन सूत्रे तपरपाठ इति भ्रमितव्यमित्यर्थः। भाव्यमानस्य सवर्णाग्राहकत्वेन तपरत्वे फलाभावादिति तात्पर्यम्। अपि वेति दर्शनादुक्तेऽर्थे हेत्वन्तरत्वभ्रमं वारयति—**विघटयतीति**। अपि वेति पादपूरणार्थमिति भावः। **उपसर्जनानामिति**। तेषां पाठादेव पर्युदासादिति भावः। भाष्ये प्रयोजनान्तरमाह—**टिलोप इति**। मपर्यन्ताच्छेषविज्ञानं शेष इति च स्थानिनोऽधिकरणत्वविवक्षया सप्तमीति भावः। नन्वहं ब्राह्मण इत्यादौ पदान्तरसमभिव्याहारादेव लिङ्गप्रतीत्युपपत्तौ किमर्थं तेषां लिङ्गवत्त्वाभ्युपगमः पदान्तरसमभिव्याहारं विनाऽप्रतीतेरयुक्तेश्चेत्यत आह—**एकपदेति**। **अश्वस्त्वमिति**। त्वं ग्रामं गतवानित्यर्थः। श्वयतेर्लुङि मध्यमपुरुषैकवचनम्। यद्यप्यश्व इत्येतदेव क्रियावाचि तथाऽपि तस्य जातिविशेषे रूढत्वात्पदान्तरसमभिव्याहारादेव तत्त्वव्यक्तिः। एवं सत्त्वभूतस्यार्थस्य लिङ्गवत्त्वाव्यभिचारादेतावेव लिङ्गाभिधायिनौ किंतु शब्दान्तरप्रयोग एव तदभिव्यक्तिर्नान्यथा। रूपस्य साधारणत्वादिति भावः। न षडिति दृष्टान्तार्थम्। भाष्ये **स तर्हि वक्तव्य इति**। टिग्रहणं कर्तव्यमित्यर्थः। तत्र तद्विनाऽपि सामर्थ्यात्त-

---

× ७. २. ९०.

अथवा शेषसप्तम्या शेषे लोपो विधीयते।

इह युष्मदस्मदोर्लोप इतीयताऽन्त्यस्य लोपः सिद्धः। सोऽयमेवं सिद्धे सति यच्छेषग्रहणं करोति तस्यैतत्प्रयोजनमवशिष्टस्य लोपो यथा स्यादिति।

लुप्तशिष्टे हि तस्याऽऽहुः कार्यसिद्धिं मनीषिणः॥ ३ ॥

प्र०—स्यादुपसर्जनस्य चात्वासिद्धिरुक्ता। **अथवेति**। उक्तमेतल्लोपमुत्सर्गं विधायानादेशे हलादावात्वमजादौ तु यत्वमपवादो विधास्यत इति शेषग्रहणं विभक्तिविशेषणार्थमनर्थकम्। तत्क्रियते लोपस्य विषयार्थं मपर्यन्ताद्योऽन्यः स शेषः स च टिरेव तस्य लोपस्य स्थानी विषयसप्तम्या निर्दिष्टः। नन्वेवं तव ममेत्यादावादेशेषु मपर्यन्ताभावानदपेक्षयाऽच्छब्दस्य शेषव्यपदेशाभावाल्लोपाभावप्रसङ्गः। **नैष दोषः**। प्रागादेशविधानादच्छब्दः शेषत्वेन परिच्छिन्न इति परिच्छेदायोपादानादतन्त्रत्वं मपर्यन्तस्य। **लुप्तशिष्टे हीति**। लुप्ते यः शिष्टस्तस्मित्कार्यस्य टाबभावस्य सिद्धिः। तवममादिषु चाऽऽदेशेष्वकार उच्चारणार्थो हलन्ता एव त्वादेशा इति न क्वचि-

---

उ०—लोपो भविष्यतीति शङ्कते—**नन्विति**। न वक्तव्य इत्यत्र भाष्ये हेतुः—**अथवेति**। यत इत्यर्थः। निपातानामनेकार्थत्वात्। वार्तिकस्थशेषसप्तम्येत्यस्य शेषार्थपर्यवसायिन्या सप्तम्येत्यर्थः। तदाह—**विषयसप्तम्येति**। **आदेशेष्विति**। परत्वादिति भावः। **प्रागादेशेति**। सांप्रतिकाभावे भूतपूर्वगतिराश्रीयत इत्यर्थः। यद्यपि युष्मभ्यमित्यत्राभ्यमपक्षे सांप्रतिकसंभवस्तथाऽपि नैकमुदाहरणं योगारम्भं प्रयोजतीति भावः। लुप्तशिष्टे हीति भाष्येण पूर्वोक्तार्थस्यैव समर्थनं तदाह—**लुप्ते य इति**। मनीषिण आचार्या यत्तस्य शेषग्रहणस्य फलमाहुरित्यन्वयः। कार्यशब्देन प्रकृतत्वाट्टाबभाव एवोच्यत इत्याह—**टाबभावस्येति**। नन्वेवं तवाद्यादेशे परत्वादङ्गत्वाच्च पररूपात्पूर्वं टिलोपे टाबापत्तिरस्त्येवेत्यत आह—**तवममादिषु चेति**। त्वाहौ साविति गुरुनिर्देशस्तु श्वेतवहोक्थशसितिवन्नार्थसाधक इति भावः। नचैवं प्यन्तात्किपि युष्म इति प्रातिपदिकस्य तवाद्यादेशे शेषे लोपस्यान्त्यलोपत्वे वकारादिलोपे त्वं तवेत्यादि मपर्यन्तसूत्रकैयटोक्तरूपासिद्धिः। तं तेत्याद्यापत्तिश्चेति वाच्यम्। **मपर्यन्तसूत्रशेषकैयटोक्तकेचिन्मते** दोषाभावादत्रत्यकैयटात्तदेव ग्रन्थकृतोऽभिमतमिति लक्ष्यते। **वस्तुतः** संनिपातपरिभाषयाऽपि टाब्वारयितुं शक्यः। न च न यासयोरिति लिङ्गाट्टाबुविषये न सेति वाच्यम्। त्यदाद्यत्वविषयेऽनित्यत्वमात्रकल्पनेऽपि टाब्विषये सर्वथाऽप्रवृत्तिकल्पने मानाभावात्। अत एव बुद्धावित्यादौ टाब्व्यावृत्तिः संनिपातपरिभाषया भाष्ये कुन्मेजन्तसूत्र उक्ता। इदमेवाऽऽहुरित्यत्र भाष्येऽरुचिबीजमित्याहुः। अस्मादेव कैयटग्रन्थात्तदेव मतं कैयटाभिप्रेतमिति लक्ष्यत इति। ननु केषांचिन्मते

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न सर्वेषां त्यदादीनामत्वं भवतीति यदयं किमः कः [७. २. १०३] इति कादेशं शास्ति । इतरथा हि किमोऽद्भवतीत्येव ब्रूयात् । सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति न च किमोऽत्वेन सिध्यति। अत्वे हि सत्यन्त्यस्य प्रसज्येत । सिद्धमन्त्यस्य पर्वणैव तत्राऽऽरम्भसाथ्यादिकारस्य भविष्यति । कुतो नु खल्वेतदनन्त्यार्थ आरम्भे सतीकारस्य भविष्यति न पुनः ककारस्य स्यात् । यत्तर्हि किमो ग्रहणं करोति । इतरथा हि कादद्भवतीत्येव ब्रूयात् । एवमपि ककारमात्रात्परस्य प्राप्नोति । त्यदादीनामिति वर्तते न चान्यत्किमस्त्यदादिषु ककारवदस्ति । एवमप्यनैकान्तिकं ज्ञापकम् । एतावत्तु ज्ञाप्यते न सर्वेषां त्यदादीनामत्त्वं भवतीति तत्र कुत एतद्द्विपर्यन्तानां भविष्यति न पुनर्युष्मदस्मदन्तानां वा स्याद्भवदन्तानां वा । किंचावश्यं खल्वप्युत्तरार्थं किमो ग्रहणं कर्तव्यम् । कु तिहोः क्वाति [१०४; १०५] इति । कादेशः खल्वप्यवश्यं साकच्कार्थो वक्तव्यः कः कौ क इत्ये-

---

प्र०—वृाप्रसङ्गः । **यदयमिति** । किंसर्वनामबहुभ्य इति किंशब्दस्य भेदेनोपादानाद्द्विशब्दात्परः किंशब्दो गणे पठ्यत इति निर्णयः । यदि च द्विशब्दात्परेषामत्वं स्यात्किमः कं न विदध्यात् । किम इत्येव ब्रूयात् । पूर्वसूत्रादकारस्यानुवृत्त्या पूर्वेणान्त्यस्यात्वे कृत इकारस्य तु किम इत्यनेन द्वयोरकारयोः पररूपेण क इत्यादेः सिद्धत्वात् । **न पुनः ककारस्येति** । अनन्त्यस्य विकारेऽन्त्यसदेशस्येति तु परिभाषा प्रयोजनाभावात्प्रत्याख्याता । **कादद्भवतीति** । ककारेऽकार उच्चारणार्थः । **कादित्येतावत्सूत्रं क्रियतेऽकारस्तु** पूर्वसूत्रादनुवर्तते स चाऽऽदेः परस्येतीकारस्य भवति मकारस्य तु पूर्वेण । **ककारमात्रादिति** । कृकवाकुरित्यादावपि । **न चान्यदिति** । यद्यपि सर्वाणि त्यदादीन्यकचा ककारवन्ति तथाऽपि तेषां कात्परोऽकार एवेति नास्ति विशेषः । द्विकिशब्दस्य तु त्यदाद्यत्वं भवत्येव । **एवमपीति** । विशेषस्य निश्चेतुमशक्यत्वात्प्रमाणाभावात् । **साकच्कार्थ इति** । सर्वस्य

उ०—द्वेः पूर्वं किमः पाठात्कथं ज्ञापकत्वमत आह—**किंसर्वनामेति** । अन्यथाऽदूव्यादिभ्य इति पर्युदासाभावात्किंशब्दो न सूत्रे पठनीयः स्यादिति भावः । **किम इत्येवेति** । भाष्ये तु किमोऽदित्यधिकारसिद्धोऽर्थो दर्शितः । **किम इत्यनेनेति** । अत्वे कृत इत्यनुषङ्गः । **प्रयोजनाभावादिति** । यद्यप्यदमुयडित्यादिप्रयोजनानि सन्त्येव तथाऽपि तदवाश्रित्येयमेकदेशयुक्तिः । प्रकारान्तरेणास्य ज्ञापकस्य खण्डनाच्च सिद्धान्तिनोऽपि तदनादरः । भाष्ये—**यत्तर्हि किम इति** । पूर्वं किम इत्येव सूत्रं कार्यं विशिष्टविधिरिदं ज्ञापकमित्युक्तम् । इदानीं तु किम इत्यंशोऽपि ज्ञापकमित्युच्यत इति विशेषः । ननु किंशब्दे कशब्दोऽप्रसिद्धोऽत आह—**ककारेऽकार इति** । क

वमर्थम् । तस्माद्द्विपर्यन्तानामत्त्वं वक्तव्यम् ।

त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः ।
शेषे लोपस्य लोपेन ज्ञायते प्राक्ततोऽदिति ॥ १ ॥
अपि वोपसमस्तार्थमत्वाभावात्कृतं भवेत् ।
टिलोपष्टाबभावार्थः कर्तव्य इति तत्स्मृतम् ॥ २ ॥
अथवा शेषसप्तम्या शेषे लोपो विधीयते ।
लुप्तशिष्टे हि तस्याऽऽहुः कार्यसिद्धिं मनीषिणः ॥ ३ ॥

क्काति ॥ ७ । २ । १०५ ॥

किमर्थं क्कादेश उच्यते न कु तिहात्स्वित्येवोच्येत*। का रूपसिद्धिः क्क । यणादेशेन सिद्धम् । न सिध्यति । ओर्गुणः प्रसज्येत+ ।

तदोः सः सावनन्त्ययोः ॥ ७ । २ । १०६ ॥

किमर्थमनन्त्ययोरित्युच्यते । अन्त्ययोर्मा भूदिति । नैतदस्ति प्रयोजनम् ।

प्र०—साकच्कस्य कादेशो यथा स्यादित्येवमर्थं किमः क इति कर्तव्यम् । तेनाज्ञातार्थविवक्षायां क इत्येव भवति न तु कक इति भवति । ननु निर्दिश्यमानस्याऽऽदेशा भवन्तीति साकच्कस्य कादेशो न प्राप्नोति । नच शक्यं वक्तुं किमः क इति वचनसामर्थ्याद्भवतीति । किम इति स्थानिनिर्देशस्योत्तरार्थत्वात् । एवं तर्हि तन्त्राश्रयणात्साकच्कस्यापि भवतीत्यदोषः ।

क्काति । **किमर्थमिति** । कुभावे कृतेऽङ्गवृत्त इति वचनादोर्गुणो न भवति । यणादेशस्त्वनाङ्गत्वाद्भविष्यतीति भावः । **न सिध्यतीति** । निष्ठितत्वस्य दुर्ज्ञानत्वात् ।

तदोः । **किमर्थमिति** । विशेषणविशेष्यभावे कामचारात्त्यदादीनां च द्विप-

---

उ०—**इत्येवेति** । प्रकरणादिवशाच्चार्थविशेषावगतिरिति भावः । **तन्त्राश्रयणादिति** । केचित्त्विम इत्येव सूत्रं कार्यं त्यदादीनामित्यनुवर्तनाच्च नातिप्रसङ्गः । सामर्थ्याच्च द्विपर्यन्तानामित्यस्यात्र त्यागः । नानर्थक इति निषेधान्नालोऽन्त्यविधिः । अकारप्रश्लेषेणानेकाल्त्वाद्वा सर्वादेशः । इमावित्यादौ तु नाङ्गकार्यं इति निषेधात् । कु तिहोः क्कातीत्यत्रापि उ तिहोः, अतीत्येव पाठ्यम् । अङ्गवृत्तपरिभाषया क्वेत्यत्र गुणो न । एवं सिद्धे किमः क इति सूत्रकरणान्निर्दिश्यमानपरिभाषाबाध इति तत्र उ तिहोरित्याद्युकारस्यान्त्यादेशत्वापत्तेः । तदर्थं नानर्थक इति वचनारम्भे तु विपरीतं गौरवम् । अङ्गवृत्तपरिभाषाया लक्ष्यसिद्ध्यर्थत्वाभावाच्च । तस्मात्कैयटोक्तमेव सम्यक् । अनित्यत्वेन वा तत्परिभाषाऽप्रवृत्तिर्बोध्या ।

क्काति । ननु वार्णादाङ्गपरिभाषया यणं बाधित्वौर्गुणः स्यादत आह—**कुभाव इति** ।

तदोः सः सौ । नन्वन्त्यव्यावृत्त्यर्थमनन्त्ययोरिति स्यादत आह—**विशेषणेति** ।

---

* ७. २. १०४ + ६ ४. १४६.

अत्वमन्त्ययोर्बाधकं भविष्यति×। अनवकाशा विधयो बाधका भवन्ति सावकाशं चात्वम्। कोऽवकाशः। द्विशब्दः। सत्वमपि सावकाशम्। कोऽवकाशः। अनन्त्यः। कथं पुनः सत्यन्त्येऽनन्त्यस्य सत्वं स्यात्। भवेद्यस्तकारदकाराभ्यामङ्गं विशेषयेत्तस्यानन्त्ययोर्न स्याद्वयं तु खल्वङ्गेन तकारदकारौ विशेषयिष्यामः। एवमप्युभयोः सावकाशयोः परत्वात्सत्वं प्राप्नोति। किंच स्याद्यद्यन्त्ययोः सत्वं स्यात्। इह हे स इत्येङ्ह्रस्वादिति÷ संबुद्धिलोपो न स्यात्।

प्र०—र्यन्तानां मध्ये तकारान्तस्य कस्यचिदसंभवात्त्यदादिभिर्विशेषितयोस्तदोः सत्वं विधीयमानमनन्त्ययोः सावकाशमन्त्ययोरत्वेन बाधिष्यत इति प्रश्नः। **अन्त्ययोरिति**। परत्वात्प्राप्नोति तकारस्यान्त्यस्यासंभवेऽपि सूत्रे द्वयोरुपादानादन्त्ययोरित्युक्तम्। **नैतदस्तीति**। पूर्वविप्रतिषेधमाश्रित्य चोदयति—**द्विशब्द इति**। उदाहरणमात्रमेतत्। अन्यत्र सोः सर्व एव त्यदादयोऽवकाशाः। **सत्वमपीति**। उभयोः सावकाशयोः परत्वात्सत्वप्रसङ्गः। **कथं पुनरिति**। आचार्यदेशीयः शिष्यबुद्धिपरिज्ञानाय पृच्छति। समुदायावयवसंनिधावुभयोरनुग्रहायावयवेन समुदायो विशेष्यते। एवं हि समुदायस्यापि कार्येण संबन्धः प्रतिपादितो भवति। अलोऽन्त्यस्येति वचनादवयवस्यापि। **भवेदिति**। व्याप्तिन्यायाश्रयणात्तकारान्तासंभवाच्च त्यदादिभिस्तदौ विशेष्येते। **एवमपीति**। सिद्धान्तवादी। अथवा सत्वमपीति चोदकस्य ग्रन्थः स च पूर्वविप्रतिषेधं मन्यते। **कथं पुनरिति**। चोदकमाचार्यो बुद्धिपरीक्षार्थं पर्यनुयुङ्क्ते। भवेदिति चोदकः। एवमपीत्याचार्यः। अथवा कथं पुनरित्यस्यायमर्थः। अनन्त्यस्यैव कथं सत्वं लभ्यते यावताऽन्त्यस्यापि परत्वात्प्राप्नोति। चोदकस्त्वगृहीताभिप्राय आह—**भवेदिति**। आचार्यः स्वाभिप्रायमाह—**एवमपीति**। **किंच स्यादिति**। अन्त्यस्यापि दस्य सत्वे हलङ्यादिलोपेन स इत्यादीनि सिध्यन्तीति मत्वा प्रश्नः। **लोपो न स्यादिति**। सत्वे सति ह्रस्वान्तत्वाभावात्। ननु त्यदाद्यत्वेऽपि कृते संनिपातपरि-

---

उ०—हेत्वन्तरमाह—**त्यदादीनां चेति**। **बाधिष्यत इति**। पूर्वविप्रतिषेधाश्रयेणेति भावः। **परत्वात्सत्वप्रसङ्ग इति**। पूर्वविप्रतिषेधाश्रयणं तु गुर्विति भावः। ननु तदोरित्येतदङ्गविशेषणमिति पूर्वपक्षिसिद्धान्तिनोर्द्वयोरप्यसंमतामिति कस्येदं वाक्यमत आह—**आचार्यदेशीय इति**। तदोरित्यस्याङ्गविशेषणत्वमेव युक्तमिति तदाशयमाह—**समुदायावयवेति**। चोदकीयमित्यादेराशयमाह—**व्याप्तिन्यायेति**। अथवेत्यादिपक्षद्वयेऽपि कथं पुनरित्यादिग्रन्थः सिद्धान्तिन एवेति विशेषः। तृतीये वक्ष्यमाणमाशयं हृदि निधाय सिद्धान्ती पर्यनुयुङ्क्त इति द्वितीयाद्विशेषः। **अन्त्यस्यापि**। अपिनाऽनन्त्यस्यापि। **संनिपातेति**। प्रत्ययलक्षणेन तु न संनिपातः। तस्या-

---

× ७. २. १०२. ÷ ६. १. ६९.

इह च या सा अत इति* टाञ्न स्यात् । तस्मादनन्त्ययोरिति वक्तव्यम् । न वक्तव्यम् । एवं वक्ष्यामि । तदोः सः सौ । ततोऽदसः× । अदसश्च दकारस्य सो भवतीति । इदमिदानीं किमर्थम् । नियमार्थम् । अदस एव दकारस्य नान्यस्य दकारस्येति । यदि नियमः क्रियते द्वीयतेरप्रत्ययो द्व इति प्राप्नोति स्व इति चेष्यते । यथालक्षणमप्रयुक्ते ।

अदस औ सुलोपश्च ॥ ७ । २ । १०७ ॥

अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ।

अदस एव सोर्भवेदौत्वं+ किमर्थं सुलोपो विधीयते।

ह्रस्वाल्लुप्येत संबुद्धिः

इह हेऽसावित्येङ्ह्रस्वात्संबुद्धेः [६. १. ६९] इति लोपः प्रसज्येत ।

न हलः

हलो लोपः संबुद्धिलोपः । तद्ग्रहणं कर्तव्यम् । न कर्तव्यम् ।

प्रकृतं हि ततः ॥ १ ॥

प्र०—भाषया संबुद्धिलोपाप्रसङ्गः । अनित्यत्वादस्याः परिभाषाया नायं दोषः । **इह चेति** । न यासयोरिति लिङ्ग आश्रीयमाणेऽनेकार्थः कल्पनीयः स्यात् । **ततोऽदस इति** । तत्र तदोः सः साविति वर्तते । तकारोऽसंभवात्त्यज्यते । **द्वीयतेरिति** । द्वाविच्छतीति द्वीयति । ततः क्विप् । अकारयकाराप्रक्तलोपाः । ततः सावित्यकारस्य त्यदाद्यत्वे सति स्व इति भवति । तदभावे तु द्व इति प्राप्नोति । **यथालक्षणमिति** । उपसर्जनत्वान्नात्र त्यदादिकार्येण भाव्यमिति द्वीरित्येव भवति । अथवा प्रयुक्तानामन्वाख्यानारम्भाद्द्विशब्दस्य च क्यजन्तस्य क्विपि प्रयोगाभावान्न केनचिल्लक्षणेन प्रवर्तितव्यम् ।

अदसः । **अदस इति** । अदसः परस्य सोरेवौत्वं विधीयतां तत्र त्यदाद्यत्वे वृद्धिरेचीति वृद्धौ चासाविति सिध्यति । **ह्रस्वादिति** । यदि त्यदाद्यत्वं क्रियते तदा ह्रस्वान्तत्वात्संबुद्धिलोपप्रसङ्गः । तस्मादौत्वसुलोपौ विधीयेते । **न हल**

उ०—शास्त्रीयत्वादिति भावः । **अनेकार्थ इति** । अत्र विषये सत्वं बाधित्वाऽत्वं संनिपातपरिभाषाया अनित्यत्वं चेत्यर्थः । **उपसर्जनत्वादिति** । स्व इति चेष्यत इत्युक्तिः पूर्वपक्ष्येकदेशिन इति न तद्ग्रलेनोपसर्जनेऽप्यत्वादिप्रवृत्तिरिति भ्रमः कार्यः । **सर्वादिसूत्रत्यदादीनाम** इति सूत्रस्थभाष्यविरोधादिति भावः । **अथवेति** । अप्रयुक्ते प्रवृत्त्यभावो हि लक्षणस्वभाव इति भावः ।

अदस औ । **सोरेवेति** । अदस औ इत्येव सूत्रं कार्यं पूर्वतोऽनुवृत्तस्य

---

* ४. १. ४. × ७. २. १०७. + ७. २. १०२; ६. १. ६८.

प्रकृतं हल्ग्रहणम्। क्व प्रकृतम्। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् [६. १. ६८] इति। तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। ह्रस्वादित्येषा पञ्चमी हलिति प्रथमायाः षष्ठीं प्रकल्पायिष्यति तस्मादित्युत्तरस्य [१. १. ६७] इति।

आप एत्त्वं भवेत्तस्मिन्

इह हेऽसौ ब्राह्मणि आङि चापः संबुद्धौ च [७. ३. १०५; १०६] इत्येत्त्वं प्रसज्येत।

न झलीत्यनुवर्तनात्।

झलीति तत्रानुवर्तते। क्व प्रकृतम्। सुपि च बहुवचने झल्येत् [७. ३. १०२; १०३] इति।

प्रत्ययस्थाच्च कादित्त्वम्

इह च असकौ ब्राह्मणीति प्रत्ययस्थात्कात्पूर्वस्य [७. ३. ४४] इतीत्त्वं प्रसज्येत। नैष दोषः। प्रश्लिष्टनिर्देशोऽयम्। आ आपू आबिति। इहापि तर्हि न प्राप्नोति। कारिके हारिके इति।

शीभावश्च प्रसज्यते ॥ २ ॥

प्र०—इति। नायं दोषो यस्मादसौ हलो लोपो विधीयते तेनौकारस्य न भविष्यति। हे अस्ताविति। अत्वे टापि च सति वार्णादाङ्गं बलीय इति वृद्धिरेचीति वृद्धिरेकादेशं बाधित्वाऽऽङि चाऽऽप इत्येत्त्वं प्राप्नोति। प्रश्लिष्टनिर्देशोऽयमिति। आकाररूपो यः श्रूयत आप्तत्रेत्त्वं भवतीह तु वृद्धौ कृतायामौकाररूपम्। कारिके इति। औङ आप इति शीभाव आद्गुणे च कृत एकारः श्रूयत इतीत्त्वं न प्राप्नोति। संबुद्धौ वा कारिके इति रूपम्। ननु चात्रान्तरङ्गत्वात्प्राक्सुबुत्पत्तेरित्त्वं भविष्यति। असकावित्यत्र तु प्राक्सुबुत्पत्तेष्टाब्नास्ति। एवं तर्हि टापि कृत एकादेशात्पूर्वं वार्णादाङ्गं बलीय इतीत्त्वं प्राप्नोतीत्याकाररूप एवाऽऽबिति किं प्रश्लेषनिर्देशेन। तस्मात्सामर्थ्याद्यथा वार्णादाङ्गमिति बाधित्वैकादेशो भवत्येवं कारिके इत्यत्राप्यन्तरङ्गेत्त्वात्पूर्वं विभक्तितन्निमित्तकार्यप्रसङ्गः। शीभावश्चेति। औङ इति वच-

---

उ०—सावित्यस्यादस इति पञ्चम्या षष्ठी कल्प्येति भावः। आङि चाप इत्येत्त्वमिति। तत्रानुवर्तमाने संबुद्धौ चेत्येत्त्वमित्यर्थः। इति रूपमिति। एवं च प्रश्लेषो वक्तुमशक्य इति भावः। नन्विति। एवं च कारिके इत्यादावित्त्वाप्राप्तिदोषो न प्रश्लेषेऽपीति भावः। तस्मात्सामर्थ्यादिति। प्रश्लिष्टनिर्देशसामर्थ्यादित्यर्थः। अन्तरङ्गत्वात्पूर्वमिति पाठः। अन्तरङ्गादपीत्त्वात्पूर्वमित्यर्थः। तस्माद्दोषवान्प्रश्लेष इति भावः।

इह च शीभावश्च प्राप्नोति । असौ ब्राह्मणी । आप उत्तरस्यौङः शी भवतीति* शीभावः प्राप्नोति । तस्मात्सोर्लोपो वक्तव्यः ।

सावौत्वप्रतिषेधः साकच्काद्वा सादुत्वं च ॥ १ ॥

सावौत्वप्रतिषेधः साकच्काद्वा वक्तव्यः । साच्च परस्योत्वं वक्तव्यम् । असकौ असुकः ।

उत्तरपदभूतानामादेश उपदेशिवद्वचनम् ॥ २ ॥

उत्तरपदभूतानां त्यदादीनामादेश उपदेशिवद्भावो वक्तव्यः । परमाहम् परमायम् परमानेन । किं प्रयोजनम् ।

अनादिष्टार्थम् ॥ ३ ॥

अकृत एकादेश आदेशा यथा स्युरिति । किं पुनः कारणमेकादेशस्तावद्भवति न पुनरादेशाः । न परत्वादादेशैर्भवितव्यम् ।

बहिरङ्गलक्षणत्वात् ॥ ४ ॥

बहिरङ्गा आदेशाः । अन्तरङ्ग एकादेशः । असिद्धं बहिरङ्गमन्तरङ्गे ।

स तर्ह्युपदेशिवद्भावो वक्तव्यः । न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति यदयमेन्द्रस्य परस्य [७. ३. २२] इति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । इन्द्रे द्वावचौ । तत्रैकेन यस्येति+ लोपेनापहियतेऽपर एकादेशेन । अनच्क इन्द्रः संवृत्तः । तत्र को वृद्धेः प्रसङ्गः । पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति ततो नेन्द्रस्य परस्येति प्रतिषेधं शास्ति ।

अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ।
ह्रस्वाल्लुप्येत संबुद्धिर्न हलः प्रकृतं हि तत् ॥ १ ॥

प्र०—नादौकारस्य यदा ङिदादेशानुमानं वर्णमात्रनिर्देशो वा डकारस्तूच्चारणार्थस्तदा शीभावप्रसङ्गः । यदा पूर्वसूत्रेण निर्देशस्तदा प्रथमाद्वितीयाद्विवचनयोरेव शीभावेन भाव्यमिति दोषाभावः । इत्त्वमपि प्रश्लेषनिर्देशेन शक्यं परिहर्तुम् । न च कारिके इत्यत्र दोषः समानकालप्राप्तिकमेव ह्येकादेशमित्त्वं प्रतीक्षते नतु भिन्नकालप्राप्तिकम् । **साकच्कादिति** । साकच्काद्यः सुर्विहितस्तस्मिन्नित्यर्थः । प्रतिषेधसंनियोगेन सात्परस्याकारस्योत्वं भवति । **बहिरङ्गा आदेशा इति** । समासाद्या विभ-

उ०—किंचैवं प्राप्तजीविक इत्यसिद्ध्याऽपि तत्र प्रश्लेषो वक्तुमशक्यः । भाष्ये—**इह च शीभाव इति** । चस्त्वर्थे । **तदा शीभावेति** । औत्वं तु पुंसि चरितार्थम् । इत्त्वमपीत्यादिग्रन्थस्तु चिन्त्यः । उक्तयुक्तेः ।

---

* ७. १. १८. + ६. ४. १४८.

आप एत्त्वं भवेत्तस्मिन्न झलीत्यनुवर्तनात् ।
प्रत्ययस्थाच्च कादित्त्वं शीभावश्च प्रसज्यते ॥ २ ॥

मृजेर्वृद्धिः ॥ ७ । २ । ११४ ॥

मृजेर्वृद्धिविधौ क्किप्रतिषेधः ॥ १ ॥

मृजेर्वृद्धिविधौ क्क्यन्तस्य प्रतिषेधो वक्तव्यः । कंसपरिमृड्भ्याम् कंसपरिमृड्भिः ।

धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात्सिद्धम् ॥ १ ॥

अथवा धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धम् । धातुप्रत्यये कार्यं भवतीत्येषा परिभाषा कर्तव्या । कान्येतस्याः परिभाषायाः प्रयोजनानि ।

प्रयोजनं सृजिदृशिमस्जिनशिहन्तिगिरत्यर्थम् ॥ २ ॥

सृजि । रज्जुसृड्भ्याम् रज्जुसृड्भिः× । सृजि । दृशि । देवदृग्भ्याम् देवदृग्भिः× । दृशि । मस्जि । उदकमग्भ्याम् उदकमग्भिः+ । मस्जि । नाशि । प्रनड्भ्याम् प्रनड्भिः+ । नाशि । हन्ति । वार्त्रघ्नः भ्रौणघ्नः* । हन्ति । गिरति । देवगिरौ देवगिरः÷ ।

यदि स्वरूपग्रहण इत्युच्यते प्रसृब्भ्याम् प्रसृब्भिः अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् [६. १. ५९] इत्यम्प्राप्नोति । एवं तर्हीयं परिभाषा कर्तव्या

प्र०—क्तिरुत्पद्यते तदपेक्षत्वात्ततोऽन्तरङ्गत्वादेकादेशे कृते तस्याऽऽदिवद्भावादादेशेषु क्रियमाणेषु परमहं परमयमित्यादिरनिष्टप्रसङ्गः ।

मृजेः । **कंसपरिमृड्भ्यामिति** । विभक्तिमाश्रित्य वृद्धिः प्राप्नोति ङ्कितीति चेति प्रतिषेधः ङ्किन्निमित्ताया एव वृद्धेरित्यत्र न प्रवर्तते । **रज्जुसृड्भ्यामिति** । भ्यांप्रत्ययो झलादिराकिद्भवतीत्यागमप्रसङ्गः । **प्रणड्भ्यामिति** । नशेर्वैति कुत्वमप्यत्र न भवतीति केचिदाहुः । तदयुक्तम् । पदत्वनिबन्धनत्वादस्य प्रत्ययानपेक्षणात् । मस्जिनशोर्झलीति मुमागमस्तु प्रत्ययापेक्षत्वादधातुप्रत्यये न भवति । **वार्त्रघ्न इति** । हनस्तो चिण्णलोरिति तत्वं न भवति । कुमति चेति णत्वं कुव्यवाये हादेशेषु प्रतिषेध इति न भवति । **देवगिराविति** । अचि विभाषेति लत्वं न भवति । **अम्प्राप्नोतीति** । तद्विधौ धातोः स्वरूपेणानुपादानात् ।

उ०— **मृजेर्वृद्धिः** । नन्वत्र प्रत्ययलक्षणेन क्कित्परत्वान्निषेधः स्यादत आह—**विभक्तिमाश्रित्येति** । **प्रत्ययानपेक्षणादिति** । इयं च परिभाषा धर्मिग्राहकमानेन सप्तम्यन्तपदेन यत्र प्रत्ययस्य निमित्तत्वं तत्रानियमप्रसक्तौ नियमार्थैवेति भावः । अत एवाप्रशानिति निषेधः सार्थक इति दिक् । अत एव भाष्ये क्वचित्कुत्वसहितः पाठो दृश्यते । **प्रत्ययापेक्षत्वादिति** । आङ्गत्वादिति भावः।

× ६. १. ५८ + ७. १. ६०. * ७. ३. ३२. ÷ ८. २. २१.

धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीति । सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं भ्रौणहत्ये तत्वं शास्ति* ।

अचो ञ्णिति ॥ ७ । २ । ११५ ॥

अज्ग्रहणं किमर्थम्+ ।

वृद्धावज्ग्रहणं गोर्थम् ॥ १ ॥

वृद्धावज्ग्रहणं क्रियते गोतो वृद्धिर्यथा स्यात् । गौरिति । नैतदस्ति प्रयोजनम् । णित्करणसामर्थ्यादेवात्र वृद्धिर्भविष्यति× । अथ योगविभागः किमर्थो न ञ्णित्यत उपधाया इत्येवोच्येत÷ । का रूपसिद्धिः चायकः लावकः कारकः गुणे+ कृतेऽयवो रपरत्वे चात उपधाया इत्येव सिद्धम् ।

योगविभागः सख्यव्यञ्जनाद्यर्थः ॥ २ ॥

योगविभागः क्रियते सख्यर्थो व्यञ्जनाद्यर्थश्च । सख्यर्थस्तावत् × । सखायौ

प्र०- **अचो** । **अज्ग्रहणमिति** । अन्तरेणाज्ग्रहणमिक्परिभाषोपस्थानादिगन्तस्य वृद्धिः सिध्यति । अकारस्य तु चिकीर्षक इत्यादावतो लोप इति लोपेन भाव्यम् । आकारस्य तु विशेषो नास्ति । संध्यक्षराणामात्वेन भाव्यमिति प्रश्नः । **गोर्थमिति** । असत्यज्ग्रहण इक्परिभाषोपस्थानाद्गौरित्यत्र वृद्धिर्न स्यात् । **अथ योगविभाग इति** । यद्यपि गौरित्युक्तेनोदाहरणेन योगविभागस्य प्रयोजनं ज्ञाप्यते तथाऽप्यनेकप्रयोजनोपन्यासाय प्रश्नप्रतिवचने । **सखायाविति** । सखि औ इति स्थिते वृद्धेरग्प्रसङ्गः । णित्त्वं तु सखाय इत्यत्र जसि गुणेऽयादेशे च कृतेऽत उपधाया वृद्ध्यर्थं स्यात् । सखाय इत्येतत्तु प्रसङ्गेनोदाहृतम् । णित्त्वावकाशदर्शनार्थं

उ०- **अचो ञ्णिति** । ननु स्थानिनिर्देशार्थमकारादिसंग्रहार्थं चाज्ग्रहणं स्यादत आह— **अन्तरेणेति** । **लोपेनेति** । ण्यल्लोपाविति वचनादिति भावः । भाष्ये--**गोर्थमिति** । प्रापयतीति ट्रेरितिसूत्रस्थभाष्यप्रामाण्यादत्रत्यं भाष्यं दोषोपलक्षणं बोध्यमित्याहुः । **असतीति** । अज्ग्रहणे तु निर्दिष्टस्थानिकत्वादिक्परिभाषानुपस्थिरिति न दोषः । ननु णित्त्वसामर्थ्यादनुपधाया अपि वृद्धिः स्यादत आह—**णित्त्वं त्विति** । **हनस्त इति** । अङ्गवैकल्येऽपि शास्त्रप्रवृत्तौ तत्वमपि स्यादिति तदभावायाज्ग्रहणम् । ननु हनस्त इत्यत्राचिण्णलोरिति पर्युदासेन धातोः स्वरूपग्रहण इति परिभाषया च धातुविहितप्रत्यय एव तत्वमित्यङ्गद्वयविकलं तत्वं वृद्धिस्त्वेकाङ्गविकलेति णित्त्वसामर्थ्याद्वृद्धिरेव भरिष्यति न तत्वमिति चेन्न । यत्तु सोर्णित्करणमित्यादिग्रन्थस्य पूर्वपक्ष्येकदेशिसिद्धान्त्येकदेशिनोरुक्तिप्रत्युक्तिपरत्वेनादोषात्सोर्णित्वस्य विशेषविधाने हि मानं

---

* ६. ४. १७४. + १ १. ३. × ७. १. १०. – ७. २. ११६. + ७. ३. ८४. × ७. १. ९२.

सखायः। व्यञ्जनाद्यर्थः। जैत्रम् यौत्रम् च्यौत्रम्। योगविभागे चेदानीं सखिव्यञ्जनाद्यर्थे क्रियमाणेऽज्ग्रहणमपि कर्तव्यं भवति। किं प्रयोजनम्। गोर्थम्। ननु चोक्तं णित्करणसामर्थ्यादेवात्र वृद्धिर्भविष्यतीति। अस्त्यन्यण्णित्करणस्य प्रयोजनम्। किं। गावौ गावः। अवादेशे कृतेऽत्र उपधाया इति वृद्धिर्यथा स्यात्। यत्तु सौ णित्करणं तदनवकाशं तस्यानवकाशत्वादेव वृद्धिर्भविष्यति। यथैव खल्वपि णित्करणसामर्थ्यादनिकोऽपि वृद्धिः प्रार्थ्यत एवं तत्वमपि प्राप्नोति। तत्वमपि हि ञ्णितीत्युच्यते*। तस्मादज्ग्रहणं कर्तव्यम्।

तद्धितेष्वचामादेः ॥ ७। २। ११७ ॥

अज्ग्रहणं कर्तव्यम्। ननु च क्रियत एव। द्वितीयं कर्तव्यं यथाऽचामादिग्रहणमाज्विशेषणं विज्ञायेत। अचामादेरच इति। अथाक्रियमाणेऽज्ग्रहणे कस्याचामादिग्रहणं विशेषणं स्यात्। इग्विशेषणमित्याह। अचामादेरिक इति×। तत्र को दोषः। इहैव स्यात्। ऐतिकायनः औपगवः। इह न स्यात्। गार्ग्यः वात्स्य इति। तत्तर्ह्यज्ग्रहणं कर्तव्यम्। न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। अचो ञ्णिति [११५] इति। यदि तदनुवर्ततेऽत उपधायाः [११६]

प्र०—वा। **व्यञ्जनाद्यर्थ इति**। व्यञ्जनादिर्यः प्रत्ययस्तत्र वृद्ध्यर्थः। **जैत्रमिति**। जियुभ्यामौणादिकः ष्ट्रण्। **च्यौत्रमिति**। जनिदाच्युस्निति त्रण्। **तत्त्वमिति**। हनस्तोऽचिण्णलोरिति हन्तेरुच्यमानं गोरपि स्यात्। नैष दोषः प्रापदित्यज्ग्रहणं क्रियते।

तद्धिते०। अज्ग्रहणं कर्तव्यमिति। अचामिति निर्धारणषष्ठ्यन्तेन सामानाधिकरण्येनाऽऽदेर्विशेषयितुमशक्यत्वादिकपरिभाषोपस्थानादिक एवाचो वृद्धिप्रसङ्गः। **अथाक्रियमाण इति**। निर्धारणं तुल्यजातीयस्य भवति। यथा कृष्णा गवां संपन्नक्षीरितमेत्युक्ते गौरेव प्रतीयते। तथा चाचामादिरजेव प्रत्येष्यत इति भावः। **इग्विशेषणमिति**। तुल्यजातीयनिर्धारणेऽपीक इत्यस्योपस्थानं न वार्यते। अज्ग्र-

---

उ०—न पश्यामः। ध्वनितं चेदं सर्वं यद्यपि गौरित्युक्तेनोदाहरणेनेत्यादिकैयटग्रन्थेनेति दिक्।

तद्धितेष्व०। अचां मध्य आदेरिको वृद्धिरित्यर्थः स्यादित्याह—**अचामिति**। बहुवचनान्निर्धारणषष्ठीत्वनिर्णयः। **सामानाधिकरण्येनेति**। अज्रूपस्याऽऽदेरितीत्यर्थः। **इक इति**। निर्धारणस्य तुल्यजातीयत्वादेवाच इत्यस्य लाभेऽपि तदुपस्थानं न वार्यते। इक इत्यनेनाचो विशेषणसंभवादिति भावः। नन्वेवमज्ग्र-

---

* ७. ३. ३२. × १. १. ३.

अचश्चेत्यज्मात्रस्योपधाया वृद्धिः प्रसज्येत । छेदक इति । अकारेण तपरेणाचं विशेषयिष्यामः। अचोऽत इति । इहेदानीमच इत्येवानुवर्ततेऽत इति निवृत्तम् । अथवा मण्डूकगतयोऽधिकाराः । यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः । अथवैकयोगः करिष्यते । अचो ञ्णित्यत उपाधायाः । ततस्तद्धितेष्वचामादेरिति । न चैकयोगेऽनुवृत्तिर्भवति ।

तद्धितेष्वचामादिवृद्धावन्त्योपधलक्षणप्रतिषेधः ॥ १ ॥

तद्धितेष्वचामादिवृद्धावन्त्योपधलक्षणाया वृद्धेः* प्रतिषेधो वक्तव्यः। क्रौष्ट्रः जागत इति । ननु चाचामादिवृद्धिरन्त्योपधलक्षणां वृद्धिं बाधिष्यते । कथम-

---

प्र०—हणे तु क्रियमाणे निर्दिष्टस्थानिकत्वादिकपरिभाषानुपस्थानम् । यथाऽचो ञ्णितीत्यत्र। **अज्मात्रस्येति** । नन्वदग्रहणसामर्थ्यादज्मात्रस्य न भविष्यति । तत्सामर्थ्यात्तर्हि निवृत्तिरेवाज्ग्रहणस्य स्यान्नियमार्थं वाऽदग्रहणं स्यात् । अकारस्यैव ह्रस्वस्य नान्यस्येति । दीर्घस्य त्वीहक इत्यादावुपधायाः स्यादेव । **अकारेणेति** । विशेषणस्याजन्तरनिवृत्तिः प्रयोजनम् । **अर्थवैकयोग इति** । एको भवतिरध्याह्रियते तेन तुल्यकालत्वाद्विधानस्य स्वकार्ये व्यापारादन्यत्रोपस्थानाभावः । **क्रौष्ट्र इति** । क्रोष्टृशब्दात्तुजन्तात्तस्येदमित्यण् । **जागत इति** । जगच्छब्दादण् । **ननु चाचामादिवृद्धिरिति** । अङ्गं कार्यि मन्यते तत्र तक्रकौण्डिन्यन्यायावतारः । इतरस्तु स्थानिभेदं मत्वाऽऽह—**कथमन्यस्येति** । आमलकीज

उ०—हणेऽपीक्परिभाषोपस्थानं स्यादत आह—**अज्ग्रहणे त्विति** । **विशेषणस्येति** । ननु नियमार्थत्वम । विधिनियमसंभव इति न्यायादित्यर्थः । नन्वर्थस्यानेकत्वाद्वाक्यभेद एव युक्तोऽत आह—**एको भवतिरिति** । प्रतिपत्तिवाक्यमेकं प्रक्रियावाक्यं तु भिद्यत एवेत्यर्थः । एकवाक्यत्वे कथमनुवृत्त्यभावोऽत आह—**तेनेति** । यदाऽत इत्येतत्स्वकार्ये व्याप्रियते तदैवान्यशेषत्वमयुक्तमित्यर्थः । **क्रौष्ट्र इतीति** । = (नियतविषयत्वं घृ इत्यादीनामिवास्याप्याश्रित्य तृज्वत्क्रौष्टुरित्यादिसूत्रत्रयप्रत्याख्यानादत्र न दोषः । एतत्सिद्ध्यर्थमेव हि तत्प्रत्याख्यानम् । अन्ये तु क्रोष्ट्रया अयमिति विग्रहः । पुंवत्त्वं तु न । संज्ञात्वेनाभाषितपुंस्कत्वात् । अस्य च वा नामधेयस्येति वा वृद्धत्वात्क्रोष्ट्रीया इत्यपि पक्षे । अत्र च यस्येति लोपात्परत्वादीकारस्य वृद्धिप्राप्तिरित्याहुः) । क्रोष्टृ इति तृजन्तमेव ऋषिनाम । वा नामधेयस्येति पक्षे वृद्धत्वात्क्रोष्ट्रीया इत्यपि बोध्यम् । आदिवृद्धेरवकाशमजानऊशङ्कते भाष्ये—**ननु चाचामिति** । ननु कार्यिभेदात्कथं बाध्यबाधकभावोऽत आह—**अङ्गमिति** । कार्यिभेदेऽपि नुम्नुटोरिव बाधकत्वसंभवाच्चिन्त्यमिदम् । **स्थानिभेदमिति** । अङ्गाव-

---

* ७. २. ११५; ११६.

= धनुश्चिह्नान्तर्गतो ग्रन्थः ख. ग. पुस्तकयोर्नास्ति ।

न्यस्योच्यमानाऽन्यस्यं बाधिका स्यात्। असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यात्।

लोकविज्ञानात्सिद्धम् ॥ २ ॥

सत्यपि संभवे बाधनं भवति। तद्यथा। ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति। एवमिहापि सत्यपि संभवेऽचामादिवृद्धिरन्त्योपधलक्षणां वृद्धिं बाधिष्यते। विषम उपन्यासः। नाप्राप्ते दधिदाने तक्रदानमारभ्यते तत्प्राप्त आरभ्यमाणं बाधकं भविष्यति। इह पुनरप्राप्तायामन्त्योपधलक्षणायां वृद्धावचामादिवृद्धिरारभ्यते। सुश्रुत् सौश्रुत इति।

पुष्करसद्ग्रहणाद्वा ॥ ३ ॥

प्र०—इत्यादावन्यस्यापि स्वरो विधीयमानोऽन्यस्वरं बाधत एवेत्याशङ्क्याऽऽह—**असति खल्वपीति**। **लोकविज्ञानादिति**। अङ्गं कार्यि तदेवावयवद्वारेण संस्क्रियते ततश्चैकस्य कार्यद्वयं न प्रवर्तते कौण्डिन्य इव दधि तक्रं च। **नाप्राप्त इति**। सामान्यविशेषभावो बाधहेतुः। **पुष्करसद्ग्रहणाद्वेति**। वाशब्दस्तर्ह्यर्थे। पूर्वस्य हेतोरनवस्थितत्वात्। ननु च ठगर्थः पुष्करसदः पाठः स्यात्। पुष्करसदा चरति पौष्करसादिक इति ञ्णित्यत उपधाया इति वृद्धेर्विधानाठक्यप्रसङ्गात्। एवं तर्हि ठगतोऽनभिधानान्न भवति। यद्वा प्रतिपदविहित इञ्येव पुष्करसद् उभयपदवृद्धि-

---

उ०—यवानां कार्यित्वादिति भावः। **अन्यस्यापि स्वर इति**। 'अन्त्यात्पूर्व बह्वचः' इति 'दीर्घकाशतुषभ्राष्ट्रवटं जे' इतिपूर्वपदाद्युदात्तत्वं बाधत इत्यर्थः। शेषनिघातशास्त्रबलात्तत्रासंभवोऽस्तीत्युत्तराशयः। दृष्टान्त एकस्योद्देश्यत्वं दार्ष्टान्तिके तु भिन्नस्येति वैषम्यं परिहरति—**अङ्गं कार्यीति**। **पूर्वस्य हेतोरिति**। **लोकविज्ञानादित्यस्य**। परे तु नेदं वार्तिकं किंतु कस्यचिदेकदेशिनोऽवकाशमपश्यत उक्तिः। **पुष्करसद्ग्रहणाद्वेति** वार्तिके विप्रतिषेधो वक्तव्य इति वचनापेक्षो विकल्पार्थो वाशब्दः। अत एव भाष्येऽथवेत्येव व्याचष्ट इत्याहुः। (परे तु ननु चेति। परत्वादिति भावः। एकस्य द्विकार्ययोगो वाऽसंभवो वा विप्रतिषेधो न चात्र तथेत्याशयेनेतर आह—**कथमन्यस्येत्यादिना**। परोऽपवादवद्विप्रतिषेधोऽपि संभवे कार्यिभेदेऽपीत्याह—**लोकविज्ञानादिति**। अपवादविषय एव तथा ननु विप्रतिषेधविषयेऽपीति पर आह—**विषम इति**। कैयटरीत्या व्याख्याने तूभयोः सावकाशत्वेन बाधकत्वसंभावनाया एवासत्त्वेन संपूर्णभाष्यस्य भ्रान्तप्रलापत्वापत्तिरि ÷ त्याहुः)। **यद्वा प्रतिपदेति**। बाह्वा-

---

÷ धनुश्चिह्नान्तर्गतो ग्रन्थः ख. ग. पुस्तकयोर्नास्ति।

अथवा यदयमनुशतिकादिषु× पुष्करसच्छब्दं पठति तज्ज्ञापयत्याचार्योऽचामादिवृद्धावन्त्योपधलक्षणा वृद्धिर्न भवतीति।

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्। पादश्च समाप्तः।

प्र०—नान्यत्र केचिदाहुः। लोकविज्ञानात्सिद्धमिति वार्तिककारस्य विप्रतिषेधो विवक्षितो यथा झलचोर्नुम्विधावुगित्प्रतिषेधात्सिद्धमिति। अन्त्योपधालक्षाणाया वृद्धेरवकाशः गौः पाचक इति। अस्यावकाशः सौश्रुत इति। क्रौष्ट्रो जागत इत्यत्रोभयप्रसङ्गे परत्वादादिवृद्धिर्भवति सकृद्गतपरिभाषाऽऽश्रीयते नतु पुनःप्रसङ्गविज्ञानम्। एवं च पुष्करसद्ग्रहणाद्वेति विकल्पार्थ एव वाशब्दो बाधकत्वसामान्याभिप्रायेण च शास्त्रविज्ञानमेव लौकिकविज्ञानमुक्तम्। अथ यत्राऽऽदिवृद्धिः प्रतिषिध्यते तत्रान्त्योपधालक्षक्षणा कस्मान्न भवति। व्यसोर्भावो वैयसवमिति। इगन्ताच्चेत्यण्। व्यापदि भवं वैयापदमिति। अत्राप्येचौ परत्वाद्बाधकाविति सर्वेष्टसिद्धिः।

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमाध्यायस्य द्वितीयपादे द्वितीयमाह्निकम्। पादश्च द्वितीयः।

उ०—दिषु पुष्करसच्छब्दः पठ्यते। तस्यैवानुशतिकादिषु ग्रहणं न्याय्यं झटिति प्रतीतेरिति भावः। इदं च ज्ञापकमचामादिवृद्धिविषयेऽन्त्योपधालक्षणा वृद्धिर्नेति। तेन वैयसवमित्यादौ न दोष इति बोध्यम्। **यथा झलचोरिति**। श्रेयांसीत्यादौ झल्लक्षणे नुमि कृत उगिल्लक्षणस्य प्राप्तस्य प्रतिषेधो वक्तव्य इति चोदिते विप्रतिषेधात्सिद्धमिति तत्रोक्तं तथेहापीत्यर्थः। नन्वेवं लोकविधानात्सिद्धमित्यसमञ्जसमत आह—**बाधकत्वसामान्येति**। यथा तक्रदानं बाधकमेवं परशास्त्रमपीति सादृश्यादेवमुक्तमित्यर्थः। इदं न युक्तम्। एकस्य द्विकार्ययोगाभावादसंभवाभावात्तत्र तावेव हि विप्रतिषेधसूत्रप्रवृत्तौ बीजमितीको गुणेति सूत्रे भाष्ये स्पष्टम्। अङ्गं कार्यीति तु चिन्त्यमेव। अत उपधाया अचामादेरित्युभयत्राप्यङ्गस्येत्यस्यावयवषष्ठीत्वात्। **कस्मान्नेति**। बाधकाभावे बाध्यप्रवृत्तेरुचितत्वादिति भावः। **अत्रापीति**। न केवलमादिवृद्धेः प्रतिषेध एव न व्याभ्यामित्यनेन किं तर्ह्यैचोर्विधानमपि। तौ च परत्वाद्बाधकौ। वास्तवसमाधिस्तूक्त एवेतीष्टसिद्धिः।

इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमस्याध्यास्य द्वितीये पादे द्वितीयमान्हिकं पादश्च।

× ७. ३ २०, ग°.

दैविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ ७ । ३ । १ ॥

देविकादिषु तदादिग्रहणम् ॥ १ ॥

देविकादिषु तदादिग्रहणं कर्तव्यम् । देविकाद्यादीनामिति वक्तव्यम् । इहापि यथा स्यात् । दाविकाकूलाः शालयः । शांशपास्थला देवाः। किं पुनः कारणं न सिध्यति ।

अन्यत्र तद्ग्रहणात्तदन्तग्रहणाद्वा ॥ २ ॥

अन्यत्र हि तस्य वा ग्रहणं भवति तदन्तस्य वा न चेदं तत्रापि तदन्तम् ।

आद्यज्विशेषणत्वात्सिद्धम् ॥ ३ ॥

आद्यज्विशेषणं देविकादयः । नैवं विज्ञायते देविकादीनामङ्गानामचामादेराकारो भवतीति । कथं तर्हि । ञ्णित्यङ्गस्याचामादेराकारो भवति स चेद्देविकादीनामाद्यज्भवतीति ।

अन्तरतमनिवर्तकत्वाद्वा ॥ ४ ॥

अथवा नानेनानन्तरतमा वृद्धिर्निर्वर्त्यते । किं तर्हि । अन्तरतमाऽनेन निवर्त्यते । सिद्धाऽत्र वृद्धिस्तद्धितेष्वचामादेः [७. २. ११७] इत्येव तत्रानेनान्त-

---

प्र०— **देविका०** । **देविकादिष्विति** । विशेषणविशेष्यभावे कामचारगाद्यदाऽङ्गेन देविकादीनि विशेष्यन्ते तदा तेषामङ्गगमन्ते न संभवतीति तदन्तविध्यभावादङ्गानि देविकादीन्याश्रीयन्ते । यदा तु देविकादिभिरङ्गं विशेष्यते तदा तदन्तविधिना देविकाद्यन्तमङ्गं गृह्यते नतु कथंचित्तदादिविधिसंभव इति तदादिग्रहणं कर्तव्यम् । तत्र केवलानां देविकादीनां तदादीनां चाऽऽकारो भवतीति वक्तव्यम् । अन्यथा केवलानां न स्यात् । दाविकमुदकं शांशपश्चमस इति । न च व्यपदेशिवद्भावोऽस्ति । अप्रातिपदिकेनेति प्रतिषेधात् । यदि तु प्रत्ययविधिविषय एवायं निषेधस्तदा केवलानां व्यपदेशिवद्भावात्सिध्यति । **आद्यज्विशेषणमिति** । अङ्गस्य देविकादिभिः संबन्धाभावः । **अन्तरमनिवर्तकत्वाद्वेति** । ञ्णिति कितीति वर्तते । तत्र स्थानेऽन्तरतम इति वचनादैकारो वृद्धिसंज्ञः प्राप्त आदिति वचनेन निवर्त्यते नत्वपूर्व

उ०— **देविकाशिंशपा०** । **अङ्गानीति** । अङ्गरूपाणीत्यर्थः । **यदि तु प्रत्ययेति** । पूर्वादिनिः, सपूर्वाच्चेति ज्ञापकस्य तुल्यजातीयविषयत्वादिति भावः । तदा तदादिग्रहणमेव कर्तव्यम् । ननु पूर्वोक्तपक्षद्वयातिरिक्तः कोऽयं प्रकारोऽत आह—**अङ्गस्येति** । **विशेष्यत्वेन विशेषणत्वेन च संबन्धाभाव इत्यर्थः** । संबन्धप्रकारो भाष्ये ञ्णित्यङ्गस्येति । भाष्य आन्तरतम्यनिवर्तकत्वाद्वेति प्रचुरः पाठः । तत्र स्वार्थे ष्यञित्याहुः । **न त्वपूर्व इति** । अपूर्वविध्यपेक्षया परिभाषात्वस्य लघुत्वादिति भावः । तदेव विश-

रतमा वृद्धिर्निवर्त्यते । परिहारान्तरमेवेदं मत्वा पठितं कथं चेदं परिहारान्तरं स्यात् । यदि नाऽऽद्यज्विशेषणं देविकादयः । अवश्यं चैतदेवं विज्ञेयमाद्यज्विशेषणं देविकादय इति । यदि नाऽऽद्यज्विशेषणं देविकादयः स्युरिहापि प्राप्नोति सुदेविकायां भवः सौदेविक इति । अथात्राप्याद्यज्विशेषणत्वादित्येव सिद्धं परिहारान्तरं न भवति । न ब्रूमो यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति । किं तर्हि । यत्र क्रियमाणे न दोषस्तत्र कर्तव्यम् । क्व च क्रियमाणे न दोषः । संज्ञाविधौ* । वृद्धिरादैज्देविकादीनामाकार इति । सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं देविकादिषु तदादिग्रहणमन्यत्र तद्ग्रहणात्तदन्तग्रहणाद्वेति । परिहृतमेतदाद्यज्विशेषणत्वात्सिद्धमिति ।

प्र०—आकारो विधीयते । अनेन हि स्थानेऽन्तरतम इति नियमं बाधित्वा नियमान्तरं क्रियते । देविकादीनामाकारो वृद्धिर्नान्या । **परिहारान्तरमिति** । परिभाषेयम् । देविकादीनां वृद्धिर्विधीयमानाऽऽकार एव भवतीति केवलानां तदादीनां च वृद्धिर्देविकादीनां भवतीति तत्रैव परिभाषाप्रवृत्तिः । सुदेविकायां तु या वृद्धिर्न सा देविकादिशब्दस्य किंतु तदन्तस्येति परिभाषानुपस्थानादौकार एव भवति । यथोद्देशं परिभाषाऽऽश्रीयते न कार्यकाला । अन्यथाऽङ्गप्रकरणे देविकादीनामादित्यस्योपस्थानादव्याप्त्यतिव्याप्त्योः पूर्ववदन्यतरप्रसङ्गः स्यात । इह तु प्रदेशे सूत्रे क्रियमाणे विधिरेवाऽऽकारस्य भवत्यर्थात्त्वैकारस्य निवृत्तिरिति नायं परिहार उपपद्यते । अन्तरतमनिवर्तकत्वाद्वेति । **सूत्रं तर्हीति** । अष्टाध्यायीलक्षणं सूत्रं संनिवेशान्तराश्रयणे भिद्यते । अथवाऽस्यैव सूत्रस्य स्थानभेदाद्भेदो भवति । **आद्यज्विशेषणत्वादिति** ।

उ०—दयति—**अनेन हीति** । अत्र देविकादीनामचामादेर्वृद्धिप्रसङ्गस्तत्राऽऽकार एवेत्यर्थ इति भावः । ननु यत्रैव पठ्यते तदाऽङ्गस्य विशेषणत्वे दाविकाकूलेऽव्याप्तिः । विशेष्यत्वे सौदेविकेऽतिव्याप्तिः । आद्यविशेषणत्वे कथं परिहारान्तरत्वमत आह—**परिभाषेयमिति** । परिभाषाप्रकरण इदं पाठ्यम् । तत्र चाङ्गासंनिधानान्न दोष इति भावः । तदाह—**देविकादीनामिति** । **अर्थात्त्विति** । एवं च निवृत्तेर्वाक्यार्थत्वाभावात्परिहारान्तरोक्तिरसंगतेति भावः । यदि नाऽऽद्यज्विशेषणमिति भाष्यस्यायमर्थः । नाऽऽद्यज्विशेषणं देविकादय इह च पाठ इत्यसंगतम् । यत इह पाठे न परिभाषात्वं विधिसाहचर्येण विधित्वस्यैव युक्तत्वात् । तत्र चाऽऽद्यज्विशेषणत्वमेव युक्तमित्याह—अवश्यं चैतदिति । **यदि नाऽऽद्याजिति** । इह पाठ इति शेषः । ननु प्रकरणान्तरपाठेऽपि देविकेत्यादिसूत्रस्य न कश्चिद्भेदोऽत आह—**अष्टाध्यायीति** । **अत्रै-**

---

* १. १. १.

न्यग्रोधे च केवलग्रहणात् ॥ ५ ॥

न्यग्रोधे* च केवलग्रहणान्मन्यामह आद्यज्विशेषणं देविकादय इति । तस्य हि केवलग्रहणस्यैतत्प्रयोजनमिह मा भून्न्याग्रोधमूलाः शालय इति । यदि चाऽऽद्यज्विशेषणं देविकादयस्ततः केवलग्रहणमर्थवद्भवति । तदेतत्कथं कृत्वा ज्ञापकं भवति । यदि न्यग्रोधशब्दोऽव्युत्पन्नं प्रातिपदिकं भवति । अथ हि न्यग्रोहतीति न्यग्रोधस्ततो नियमार्थं पदान्त इति कृत्वा+ न ज्ञापकं भवति।

वहीनरस्येद्वचनम् ॥ ६ ॥

वहीनरस्येत्त्वं वक्तव्यम् । वहीनरस्यापत्यं वैहीनरिः ।

प्र०—द्वितीयः परिहारो दूषितः पूर्वस्तु स्थित एव । अत्रैवार्थे लिङ्गदर्शनम् । **न्यग्रोधे चेति** । केवलग्रहणमिह प्रकरणे गृह्यमाणमाद्यज्विशेषणमिति ज्ञापयति । अन्यथा तदनर्थकं स्यात् । नच तदन्तविधिनिरासार्थमङ्गेन न्यग्रोधस्य विशेषणात्तदन्तविधेरप्रसङ्गात् । **तदेतदिति** । अव्युत्पत्तिपक्षे न्यग्रोधस्य च केलस्येति वृद्धिनिषेधस्यैचश्च विधायकमिति केवलग्रहणं ज्ञापनार्थं भवति । व्युत्पत्तिपक्षे तु न श्वाभ्यामिति सिद्धे केवलस्यैव न्यग्रोधशब्दस्य यथा स्यात् । न्याग्रोधमूलाः शालय इत्यादौ मा भूदिति नियमार्थं केवलग्रहणं न ज्ञापकं भवति । नहि न्यग्रोधस्येत्येतावताऽभिमतनियमासिद्धिः । नन्वङ्गस्यैव न्यग्रोधस्य नाङ्गादेरित्येवमिष्टो नियमः सिध्यत्येव । नैतदस्ति । अनिष्टोऽपि नियमः स्यात् । न्यग्रोधस्यैव निशब्दात्परस्य वृद्धिप्रतिषेध इति । तथा च नैयायिको नैयासिक इत्यादौ न स्यात्तस्मात्केवलग्रहणमभिमतनियमसाधनाय । श्वादेरित्ययं तु निषेध उक्तार्थे ज्ञापको भवति । **वहीनरस्येति** । वहोऽस्यास्तीति वही स चासा नरश्चेति कर्मधारयसमासोऽन्येषामपि दृश्यत इति दीर्घः । तस्यापत्यमत इञ् । तत्राऽऽदिवृद्धेरपवाद इकारो विधीयते । इकारस्य वृद्धिर्भवत्येव । नच तस्यां प्राप्तायामित्त्वं विधीयते यतः साऽपि

उ०—**वार्थे**। आद्यज्विशेषणत्वरूपेऽर्थे । यथास्थितपाठेऽप्यत्र वृद्धिरित्यनुवर्त्य वृद्धिशब्देनाऽऽकारविधानाद्दाविकीभार्य इत्यादौ पुंवत्त्वनिषेधो भवत्येवेति ध्येयम् । **अङ्गेन न्यग्रोधस्येति** । एवं च न्यग्रोधरूपाङ्गस्य विधीयमानस्तदादेर्नैव प्राप्नोति नापि तदन्त इति केवलग्रहणमनर्थकमस्यार्थस्य ज्ञापकम् । इष्टानुरोधाच्च तदन्तविधेर्न ज्ञापकमिति भावः । **विधायकमिति** । अपदान्तत्वान्न श्वाभ्यामित्यस्याप्राप्तेरिति भावः । विनाऽपि केवलग्रहणमिष्टनियममाशङ्क्ते—**नन्वङ्गस्येत्यादिना** । व्युत्पत्तिपक्षेऽपि लिङ्गं दर्शयति—**श्वादेरिति** । द्वारादिषु श्वञ्शब्दपाठाद्द्वारादीनां चेत्यनेन प्राप्तस्य निषेधोऽयम् । श्वाभस्रिरित्युदाहरणम् । ननु वृद्धिबाधेनेत्त्वे कथं पुनर्वृद्धिः स्यादत आह—**न च**

---

* ७. ३. ५. + ७. ३. ३.

---

१ क. त्राऽऽकारवृ ।

कुणरवाडवस्त्वाह । नैष वहीनरः।कस्तर्हि । विहीनर एषः। विहीनो नरः कामभोगाभ्यां विहीनरः । विहीनरस्यापत्यं वैहीनरिः ।

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥ ७ । ३ । ३ ॥

य्वाभ्यां परस्यावृद्धित्वम्

य्वाभ्यां परस्यावृद्धित्वं सिद्धम् । कुतः ।

अपवादौ वृद्धेर्हि तौ ।

अपवादौ हि वृद्धेस्तावैचावुच्येते ।

नित्यावैचौ तयोर्वृद्धिः

अथवा नित्यावैचौ । कृतायामपि वृद्धौ प्राप्नुतोऽकृतायामपि । नित्यत्वादैचोः कृतयोर्यद्यपि वृद्धिस्तयोरेव ।

प्र०—बाध्येत । **विहीनो नर इति** । पृषोदरादित्वान्नलोपः ।

न य्वाभ्याम् । य्वाभ्यां पदान्ताभ्यां पूर्वावैजित्येव सूत्रं कार्यं नार्थो **वृद्धि**निषेधेन । **अपवादाविति** । एकस्मिन्नङ्गविशेषे विधीयमानावैचौ सामान्यविहितायां वृद्धेर्बाधकौ । सत्यपि संभवे सामान्यविशेषविषयत्वेन बाध्यबाधकभावदर्शनात् । इदानीं विषयभेदादसत्यप्यैजवृध्योर्बाध्यबाधकत्वे प्रतिविधातुमाह—**यद्यपीति** । अभ्युपगमवादेनोच्यते । नहि वृद्धौ सत्यां सर्वेष्टसिद्धिः । वैयाकरणभार्य इत्यत्र **वृद्धि**निमित्तस्येति पुंवद्भावप्रतिषेधप्रसङ्गात् । तस्माच्छब्दान्तरप्राप्त्या वृद्धिमनित्यां बाधित्वा

उ०—**तस्यामिति** । इकारस्थानिकवृद्धावित्यर्थः । भ्रष्टावसरन्यायस्तु फलाभावादत्र शास्त्रे नाऽऽश्रीयत इति भावः । केचित्तु वहीनरस्यैत्वमिति वार्तिकं पठन्ति तेषां तु न किंचित्कष्टम् । **विहीन इति** । अत्र पक्षे वहीनरशब्दान्न प्रत्ययोऽनभिधानादिति बोध्यम् । वहीनरस्यैव वाऽनभिधानं बोध्यम् ।

न य्वाभ्याम् । ननु य्वाभ्यां परस्य वृद्धिस्ताभ्यां पूर्वावैचाविति **विषयभेदात्कथं** बाध्यबाधकभावोऽत आह—**एकस्मिन्नङ्गे**इति । नन्वपवादत्वमुक्त्वा कथं नित्यत्वाश्रयबाधकत्वेन पक्षान्तरकथनमत आह—**इदानीमिति** । विषयभेदान्नापवादत्वम् । अङ्गं तु न कार्यं । तस्य कार्यविशेषणविशेषणत्वादिति भावः । इदमप्यसंभव एव बाधकत्वमिति वार्तिकमते । **अभ्युपगमेति** । इदं च यद्यपीत्यादिसंदिग्धवचनेन भाष्यकृताऽपि ध्वनितम् । **वैयाकरणभार्य इति** । न चात्र पुंवत्त्वनिषेधाप्रवृत्तौ मानाभावः । **तद्धितानामेव** वृद्धिसंज्ञेति पक्षेऽत्र पुंवत्त्वप्रतिषेधाप्राप्तिरूपदोषानुपन्यासेन निषेधाप्रवृत्तेरिष्टत्वानुमानादित्याहुः । **तस्मादिति** । ऐज्विधानसामर्थ्याच्च न तयोर्वृद्धिः । अन्यथा प्रयत्नलाघवायैङावेव विदध्यादिति भावः । केचिदैजमात्रस्य **वृद्धिसंज्ञेति** पक्षे **तावङ्गार्य इव** वैयाकरणभार्ये पुंवत्त्वनिषेधानापादनेन निषेधप्रवृत्तिरेवेष्टा। अत्र सूत्रे पूर्वसूत्र आदंश इवैजंशेऽपि

किमर्थं नेति शिष्यते ॥ १ ॥

अथ किमर्थं प्रतिषेध उच्यते।

ऐचोर्विषयार्थं प्रतिषेधसंनियुक्तवचनम् ॥ १ ॥

ऐचोर्विषयार्थं प्रतिषेधसंनियोगेनैचावुच्येते।

यत्र य्वाभ्यां परा वृद्धिस्तत्राध्यश्वेर्यथा न तौ।

अथ य्वाभ्यां परस्यावृद्धित्वमुच्यते तत्रैचौ यथा स्याताम्। इह मा भूताम्। आध्यश्विः दाध्यश्विः माध्वश्विरिति। नैदस्ति प्रयोजनम्।

अचामादेर्य्वाभ्यां हि तौ

अचामादिनाऽत्र य्वौ विशेषयिष्यामः। अचामादेर्यौ य्वाविति।

कथं द्व्याशीतिके न तौ ॥ २ ॥

प्र०—नित्यावैचौ भविष्यतः। बाधितत्वाच्च पुनर्वृद्धिर्न भविष्यतीत्यभ्युपेयम्। **ऐचोर्विषयार्थमिति**। याभ्यां य्वाभ्यां परस्य वृद्धिः प्राप्ता निषिध्यते ताभ्यां पूर्वावैचौ यथा स्यातामन्याभ्यां मा भूतामित्येवमर्थं प्रतिषेधविधानम्। **आध्यश्वेर्यथा न तावि**ति। स्यातामिति वाक्यशेषः। अध्यारूढोऽश्वमिति प्रादिसमासः। अत इञ्। असत्यपि निषेधविधाने दोषं परिहर्तुमाह—**अचामादेरिति**। अचामादेरचः स्थाने यौ य्वौ ताभ्यां पूर्वौ भवत इत्याश्रीयमाण आध्यश्विरित्यादावैचोरप्रसङ्गः। **द्व्याशीतिक इति**। द्वे अशीती भूत इति तद्धितार्थे समासः। ततष्ठञ्। अध्यर्धपूर्वद्विगोरित्यत्राऽऽर्हादित्यधिकारात्लुलुक् न भवति। अत्राचामादेरचो यकारस्य विधानात्ततः पूर्वं ऐकारः प्राप्नोति। **ताविति**। द्विवचनं व्याशीतिकस्योपलक्षणत्वादु-

---

उ०—वृद्धिपदसंबन्धेन तद्धितानामेव संज्ञेति पक्षेऽपि निषेधप्रवृत्तिर्भवत्येवेति नोक्तभाष्यविरोधः। किंचैवं सति वृद्धिनिमित्तस्येति सूत्रे शब्दव्यापाराश्रयणस्याऽऽवश्यकत्वेन तावद्भार्ये दोषवारणाय व्यधिकरणबहुव्रीहिपर्यन्तं भाष्यकृतो धावनमफलं स्यादित्याहुः। **बाधितत्वाच्चेति**। इदं चिन्त्यम्। भ्रष्टावसरन्यायस्य भाष्ये क्वाप्यनाश्रयणात्। × उक्तरीत्योपपत्तेश्चात्रापवादत्वमेव युक्तं विषयैक्य एवापवादत्वमिति तु न युक्तमचिरादेशस्य नुडपवादत्वशङ्कापरभाष्यविरोधात्। न तिस्रिति ज्ञापकेन नुड्विषये गादेशाभावकल्पनेन समाहितमित्येतत्। नित्यावैचावित्युक्तिस्त्वेकदेशिन इति बोध्यम्। असंभव एवापवादत्वमिति वार्तिकमतेन वा तदुक्तम्। अपवादविषये हि प्रकल्प्यापवादविषयमित्यादिना तथाऽभ्युपगमो नान्यत्रेति केचित्। भाष्ये—**अथ किमर्थमिति**। एवं सति किमर्थं प्रतिषेध इत्यर्थः। **विषयार्थमिति**। ऐचोर्विशिष्टविषयनिर्देशार्थमित्यर्थः। एतदुत्तरं नैतदस्ति प्रयोजनमित्यादिभाष्यमेकदेश्युक्तिरित्युत्तरसूत्रे कैयटे स्फुटम्। **रचः स्थान इति**। अनुवादे परिभाषाणामनुपस्थितिरितीको गुणेत्यादौ विधीयत इत्यध्याहारलब्धमिति भावः। **द्व्याशीतिकस्योपलक्षण-**

× उक्तेत्यादितदुक्तमित्यन्तो ग्रन्थः ख. पुस्तकस्थः।

---

१ क. चनमाध्यश्वेरुप।

द्व्याशीतिक इत्यत्र कस्मान्न तौ भवतः ।

यत्र वृद्धिरचामादेस्तत्रैचावत्र घोर्हि सा ।

यत्राचामादेरित्येवं÷ वृद्धिस्तत्रैचावुच्येते । अत्र घोरित्येवं वृद्धिः । किमिदं घोरिति । उत्तरपदस्येति+ । उत्तरपदाधिकारेऽप्यवश्यमैजागमोऽनुवर्त्यः । पूर्व-व्यलिन्दे भवः पूर्वत्रैयलिन्द इत्येवमर्थम्× । नैष दोषः । उत्तरपदेनात्राचामादिं विशेषयिष्यामोऽचामादिना य्वौ । उत्तरपदस्याचामादेर्यौ य्वाविति ।

अथ कस्मात्पदान्ताभ्याम्

अथ किमर्थं पदान्ताभ्यामित्युच्यते ।

यथेणो न भवेद्यणः ॥ ३ ॥

इणो यणादेशो मा भूत् । यतश्छात्रा याता इति ।

प्र०–पात्तम् । यद्यपि य्वोरचामादिना विशेषणाभावेऽप्यत्र दोषस्तथाऽपि विशेषणे सर्वं न सिध्यतीति प्रतिपादनायेदमुच्यते । एतत्परिहरति—**यत्रेति** । आचामादेरिति या वृद्धिः प्राप्नोति तदपवादावैचौ विधीयेते । अत्र तु संख्यायाः संवत्सरसंख्यस्येति वृद्धिर्विधीयते । अचामादेरिति वर्तते । तन्त्रेण च ते द्वे अचामादेरित्येतदाश्री-यते । तत्रैकं स्वरूपपरम् । तेनाचामादेरित्येवं या वृद्धिस्तस्यां प्राप्तायां तदपवा-दावचामादेः स्थाने य्वाभ्यां पूर्वावैचौ भवत इत्यर्थः संपद्यते । **उत्तरपदाधिका-रेऽपीति** । तथा च व्याशीतिके दोषः । **पूर्वत्रैयलिन्द इति** । प्राचां ग्रामनगरा-णामित्युत्तरपदवृद्धिः प्राप्ता प्रतिषिध्यते । **नैष दोष इति** । व्याशीतिक इत्यत्र । तदेवं नेति प्रत्याख्यातम् । **याता इति** । अचामादेरचः स्थाने भवत्ययं यकार

उ०–**त्वादिति** । स्वङ्गक इत्यादौ स्वङ्गशब्दादवृद्धादपीति वुञि सुसर्वार्धाज्जनपदस्योत्त-रपदवृद्धौ दोष इति भावः । आध्यश्वेरुपलक्षणत्वादिति पाठे तद्वदिदमप्युपलक्ष-णमिति कथंचिद्व्याख्येयम् । **अत्र** । व्याशीतिके । **विशेषणे सर्वमिति** । नतु पक्षान्तर इष्टं सिध्यतीति भावेनेत्यर्थः । कथं पुनरयमर्थः सूत्राक्षरैर्लभ्यतेऽत आह—**तन्त्रेण च ते इति** । निषेधसत्त्वे तु येन नाप्राप्तिन्यायेन तद्धितेष्वचामादेरित्यस्यैव स निषेध इति तत्संनियोगशिष्ट ऐजागमोऽपि तत्रैवेति व्याशीतिके न दोषः । आवृत्तिश्च नाऽऽश्रयणीयेति बोध्यम् । पूर्वत्रैयलिन्दार्थमुत्तरपदाधिकार ऐजाद्यनुवृत्तौ व्याशीतिके दोषस्तं परिहरति भाष्ये **नैष दोष इति** । तदाह—**व्याशीतिक इति** । निषेध-सत्त्वेऽपि प्राचां ग्रामनगराणामित्यत्रैतदनुवर्त्य वाक्यभेदेन व्याख्यानात्पूर्वत्रैयलिन्दे न दोषः । संख्यायाः संवत्सरेत्यादौ तु नानुवृत्तिर्मानाभावादिष्टानुरोधाच्च । केचित्तूत्त-रपदसंबधिभ्यां परस्य न वृद्धिरित्यर्थादनुवृत्तावपि न दोष इत्याहुः । अत्र नेत्यस्य

÷ ७. २. ११७–११८. + ७. ३. १५; १०. × ७. ३. १४.

---

१ क. देतच्चेति ।

इह वैयाकरणः सौवश्व इति शाकलं प्राप्नोति× य्वोश्च स्थानिवद्भावादायावौ प्राप्नुतः+।

शाकलायावादेशेषु चोक्तम् ॥ २ ॥

किमुक्तम्। शाकले तावदुक्तं सिन्नित्यसमासयोः शाकलप्रतिषेध इति*। आयावोः किमुक्तम्। अचः पूर्वविज्ञानादैचोः सिद्धमिति÷।

य्वाभ्यां परस्यावृद्धित्वमपवादौ वृद्धेर्हि तौ।
नित्यावैचौ तयोर्वृद्धिः किमर्थं नेति शिष्यते ॥ १ ॥
यत्र य्वाभ्यां परा वृद्धिस्तत्राध्यश्वैर्यथा न तौ।
अचामादेर्य्वाभ्यां हि तौ कथं द्व्याशीतिके न तौ ॥ २ ॥
यत्र वृद्धिरचामादेस्तत्रैचावत्र घोर्हि सा।
अथ कस्मात्पदान्ताभ्यां यथेणो न भवेद्यणः ॥ ३ ॥

द्वारादीनां च ॥ ७। ३। ४ ॥

अथ परस्यावृद्धिरित्यनुवर्तत उताहो न। किंचातः। यद्यनुवर्तते सौवं

प्र०—इत्यैच्प्राप्नोति। ननु चान्तरङ्गत्वात्पूर्वमेव यणा भाव्यम्। इहापि व्याकरणं स्वश्व इति पूर्वमेव यण्भवति। ततो यथा भूतपूर्वगत्याऽत्राचामादेर्यणो भवतस्तथा यणादेशो भवतीत्यदोषः। **अचः पूर्वविज्ञानादिति**। योऽनादिष्टादचः पूर्वस्तस्य विधौ स्थानिवद्भाव इत्यर्थः।

द्वारा०। पूर्वसूत्रे वृद्धिनिषेधः प्रतिपत्तिलाघवाय कृतो नह्येकेनाचामादेरित्यनेनोभयं विशेषयितुं शक्यं नाप्यप्रतिषिध्यमाना वृद्धिरचामादेरित्यनेन शक्या विशेषयितुमिति यथान्यासं प्रतिषेधमाश्रित्य विचार्यते—**परस्येति**। **यदीति**। यत्रैव

उ०—प्रत्याख्यानमेकदेशिनोऽतिगुरुयत्नसाध्यत्वादिति बोध्यम्। **ननु चेति**। एवं च ञ्णदादिनिरूपिताङ्गस्याचामादेरचः स्थाने य्वौ न भवत इति भावः। **अचामादेरिति**। ञ्णदादिनिरूपिताङ्गसंबन्ध्यचामादेरित्यर्थः। **तथा यणादेश इति**। तथा याता इत्यादावपि तन्निरूपिताङ्गसंबन्ध्यचामादेरचः स्थाने यणादेशो भवतीत्यर्थः। अत्र भूतपूर्वगत्येति चिन्त्यम्। यदि प्रत्ययोत्पत्त्यनन्तरं यणादेशः स्यात्तदा तत्स्थानिकः स्यादित्येवं काल्पनिकं तदिति वक्तुमुचितम्। भाष्ये **शाकलं प्राप्नोतीति**। ततश्च नित्यं यण् दुर्लभ इति भावः।

द्वारादीनां च। ननु पूर्वसूत्रे निषेधस्य प्रत्याख्यानात्तदनुवृत्त्यादिविचारोऽयुक्त इत्यत आह—**पूर्वसूत्र इति**। तन्त्राद्याश्रयणे च न मानमिति भावः। तन्त्राद्याश्रयणेऽपि न निर्वाह इत्याह—**नापीति**। अचामादेरित्येवं यत्र वृद्धिः प्राप्ता तत्र तदपवादावैचावित्यन्वयस्तु न लभ्यत

× ६. १. १२७. + ६. १. ७७; ७८. * ६. १. १२७. ÷ १. १. ५७.

मांसम् टिलोपे* कृत ऐजागमो न प्राप्नोति। अथ निवृत्तं स्वाध्यायशब्दो द्वारादिषु पठ्यते तत्र यावन्तो यणः सर्वेभ्यः पूर्वं ऐजागमः प्राप्नोति। यथेच्छसि तथाऽस्तु। अस्तु तावदनुवर्तते। कथं शौवं मांसम्। आनुपूर्व्या सिद्धमेतत्। नात्राकृत ऐजागमे टिलोपः प्राप्नोति। किं कारणम्। प्रकृत्यैकाच् [६. ४. १६३] इति प्रकृतिभावेन भवितव्यम्। तदेतदानुपूर्व्या सिद्धं भवति। अथवा पुनरस्तु निवृत्तम्। ननु चोक्तं स्वाध्यायशब्दो द्वारादिषु पठ्यते तत्र यावन्तो यणः सर्वेभ्यः पूर्वं ऐजागमः प्राप्नोतीति। कः पुनरर्हति स्वाध्यायशब्दं द्वारादिषु पठितुम्। एवं किल पठ्येत स्वमध्ययनं स्वाध्याय इति। तच्च न। सुष्ठु वाऽध्य-

---

प्र०—वृद्धिप्रतिषेधस्तवैवेज्भ्यां भाव्यं नान्यत्र। **शौवमिति**। शुनो विकार इति प्राणिरजतादिभ्योऽञित्यत्र। श्वन्शब्दस्य तु पाठस्तदाद्यर्थः स्याच्छौवहानमिति। **यावन्तो यण इति**। अपदान्तार्थत्वादस्य सर्वेभ्यो यण्भ्यः पूर्वावैचौ प्राप्नुतः। प्रतिषेधे तु विधीयमाने याभ्यां ग्वाभ्या परस्य वृद्धिप्रतिषेधस्ताभ्यां पूर्वावैचाविति नास्ति सर्वेभ्यः प्रसङ्गः। **प्रकृत्यैकाजिति**। इष्टेमेयःसु प्रकृतिभावः। तथा च ज्ञा देवताऽस्य ज्ञ इत्यत्र न भवति। इह त्वविशेषेण प्रकृतिभावमाश्रित्यैतदुक्तं परिहारदिक्प्रदर्शनार्थम्। अत्र हि परत्वाट्टिलोप बाधित्वा वृद्धिः प्राप्ता प्रतिषिध्यत इति भवत्यैजागम इत्ययमत्र परिहारः। **सुष्ठु वाऽध्ययनमिति**। अन्येषामपि दृश्यत इति

उ०—इति भावः। ननु शुन इदमित्याणि प्रकृतिभावाट्टिलोपो दुर्लभोऽत आह—**अञ्नित्ति**। नन्वेवं स्वञ्शब्दपाठो व्यर्थोऽत आह—**तदाद्यर्थ इति**। **परत्वादिति**। टिलोपस्य शब्दान्तरप्राप्त्याऽनित्यत्वमित्याशय.। परे तु दुष्टपक्षेण समाधानं कुर्वता भाष्यकृताऽनुवृत्तिपक्षस्यासंगततैवोक्ता। कैयटोक्तं तु न युक्तं कृताकृतप्रसङ्गित्वेन टिलोपस्य नित्यत्वात्। किंच ज्ञो देवताऽस्येत्यत्रापि परत्वाद्वृद्धौ सकृद्गतिन्यायेन लोपाप्राप्त्या ज्ञ इत्यस्यासिद्धिः। किंच स्त्रीपुंसाभ्यामित्यत्राञप्रत्ययो नुगागमश्च कार्य इत्याशङ्क्य टिलोपः स्यात्। नच नुग्विधानसामर्थ्यम्। स्त्रैणे यं विधिं प्रतीति न्यायेन तद्विधानसामर्थ्यात्तद्भावेऽपि पौंस्ने दोष इत्युक्तम्। त्वद्रीत्या स्त्रैणे नुक्येव टिलोपप्राप्तिः। अन्यथा वृद्ध्या बाधात्तदसंगतिः स्पष्टैव। किंच सोमाट्ट्यणित्येव सकृद्गतिन्यायेन सिद्धे कस्येदितीत्त्वविधानेन वृद्धेर्लोपस्य बलवत्त्वबोधनेन परत्वादित्यस्यासंगतेश्च **यौ चङीति** सूत्रे नाग्लोपीति सूत्रस्थप्रत्याहारग्रहणेन वृद्धेर्लोपो बलीयानिति सामान्यत एव ज्ञापकस्य वक्ष्यमाणत्वाच्च। एवं च श्रायं हविरित्यादि लोके चिन्त्यमेव। वृद्ध्यपवादत्वादैचोर्न वृद्धिनिषेधोपयोगोऽत्रेति बोध्यम्। भाष्ये **तच्च नेति**। स्वशब्दस्य द्वारादिषु पाठादिति भावः। **सुष्ठु वाऽध्ययनमिति**। तत्र च न ग्वाभ्यामिति सिद्ध-

---

* ४. ३. १५४; ६. ४. १४४.

यनं स्वाध्यायः शोभनं वाऽध्ययनं स्वाध्यायः*। अथापि स्वमध्ययनं स्वाध्याय एवमपि न दोषः। अचामादेरिति+ वर्तते।

श्वादेरिञि ॥ ७। ३। ८ ॥

अयं श्वन्शब्दो द्वारादिषु× पठ्यते तत्र कः प्रसङ्गो यत्तदादेः स्यात्। नैव प्राप्नोति नार्थः प्रतिषेधेन। तदादिविधिना प्राप्नोति। नैव तदादिविधिरस्ति। अत उत्तरं पठति।

प्रतिषेधे श्वादिग्रहणं ज्ञापकमन्यत्र श्वन्ग्रहणे तदादिग्रहणस्य शौवहानाद्यर्थम् ॥ १ ॥

प्रतिषेधे श्वादिग्रहणं क्रियते ज्ञापकार्थम्। किं ज्ञाप्यम्। एतज्ज्ञापयत्याचार्योऽन्यत्र श्वन्ग्रहणे तदादिविधिर्भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। शौवहानाद्यर्थम्। शौवहानं* नाम नगरम्। शौवादंष्ट्रो+ मणिरिति।

प्र०—दीर्घः। आङ् वा मध्ये प्रक्षेप्तव्यः। **अचामादेरिति वर्तत इति**। तत्रैवं संबन्धोऽचामादेरनन्तरौ यौ य्वौ ताभ्यां पूर्वावचौ भवत इति। तेन स्वाध्यायशब्दे वकारात्पूर्व ऐज्भवति नतु यकाराभ्यामित्यर्थः। यद्यपि स्वोऽध्यायः स्वाध्याय इत्यस्यामपि व्युत्पत्तौ स्वाध्यायशब्दो न पठितव्यः स्वशब्दस्येह पाठात्तदादिविधेश्चेष्टत्वात्तथाऽपि पाठेऽपि दोषो नास्तीति प्रदर्शनाय भाष्यकारेण पाठमभ्युपगम्य परिहारोऽभिहितः।

श्वादेः। **तदादिविधिनेति**। आद्यञ्जिशेषणत्वाद्द्वारादीनां तदादिविधिरस्ति। इतरस्त्वगृहीताभिप्राय आह—**न वै तदादिविधिरस्तीति**। श्वन्ग्रहणस्योपलक्षणार्थत्वादेतत्प्रकरणनिर्दिष्टैर्वैकादिभिर्द्वारादिभिश्चाऽऽदेरचो विशेषणात्तदादिविधिर्भवतीति ज्ञाप्यते। **शौवहानमिति**। जिहतेऽस्मिन्निति ल्युट्। शुनां हानमिति षष्ठीसमासः। श्वहानमस्मिन्नस्तीति तदस्मिन्नस्तीति देशे तन्नाम्नीत्यण्। वृद्धिनिषेधः। ऐजागमश्च द्वारादित्वात्। **शौवादंष्ट्र इति**। शुनो दंष्ट्रा श्वादंष्ट्रा। शुनो दन्तदंष्ट्रेति

उ०—मिति तात्पर्यम्। नन्वेवं स्वध्याय इति स्यादत आह—**अन्येषामपीति**। कथं पुनस्तवतुवृत्तौ दोषपरिहारोऽत आह—**तत्रैवमिति**। अनन्तरशब्दोऽव्यवहितसमीपवाची। **तदादिविधेश्चेति**। अत एव स्वग्रामे भवः सौवग्रामिक इति सिध्यति। **पाठमभ्युपगम्येति**। वस्तुतस्तु स्वग्रामस्वाध्याययोः पाठः स्वशब्दादेश्चेदेतयोरेवेति नियमार्थः। तेन स्वार्थिकाः स्वाभाविकं स्वाराज्यमित्यादिसिद्धमिति भाष्याशयः।

श्वादेः। **आद्यञ्जिति**। अङ्गस्याचामादेर्न वृद्धिर्भवति स चेदाद्योऽज्द्वारादीनामवयव इत्यर्थ इति भावः। द्वाराद्वीनां यकारवकारविशेषणत्वादपि सिध्यतीति बोध्यम्।

---

* ७. ३. ३, + ७. २. ११७. × ७. ३. ४. * ४. २. ६७; ७. ३. ४. + ६. ३. १३७; ४. ३, ५३; ७. ३. ४.

इकारादिग्रहणं च श्वागणिकाद्यर्थम् ॥२॥

इकारादिग्रहणं च कर्तव्यम् । किं प्रयोजनम् । श्वागणिकाद्यर्थम् । श्वगणेन चरति श्वागणिकः* ।

तदन्तस्य चान्यत्र प्रतिषेधः ॥ ३ ॥

तदन्तस्य चान्यत्र प्रतिषेधो वक्तव्यः । श्वाभस्त्रेः स्वं श्वाभस्त्रम्+ ।

उत्तरपदस्य ॥ ७ । ३ । १० ॥

किमर्थमिदमुच्यते । अवयवाद्तोः [७. ३. ११] इति वक्ष्यति तदुत्तरपदस्य यथा स्यादचामादेर्मा भूत् । नैतदस्ति प्रयोजनम् । अवयवादिति पञ्चमी तत्रान्तरेणाप्युत्तरपदग्रहणमुत्तरपदस्यैव भविष्यति× । उत्तरार्थं तर्हि सुसर्वार्धाज्जनपदस्य [१२] इति सुसर्वार्धादिति पञ्चमी । दिशोऽमद्राणाम् [१३] । दिश इति पञ्चमी । प्राचां ग्रामनगराणाम् [१४] । दिश इत्येव । संख्यायाः संवत्सरसंख्यस्य च [१५] । संख्याया इति पञ्चमी । वर्षस्याभविष्यति [१६] । संख्याया इत्येव । परिमाणान्तस्यासंज्ञाशाणयोः [१७] । इति । संख्याया इत्येव । इदं तर्हि प्रयोजनं जे प्रोष्ठपदानाम् [१८] । उत्तरपदस्य

प्र०—दीर्घः । तत्र भव इत्यण् । संज्ञापूर्वको विधिरनित्य इति वृद्धाच्छो न भवति । **इकारादिग्रहणमिति** । श्वादेरितीति सूत्रं कर्तव्यम् । तत्र यस्मिन्विधिस्तदादावल्ग्रहण इति तदादिविधिर्भवति । **श्वागणिक इति** । श्वगणाट्ठञ् चेति ठञ् । **तदन्तस्येति** । इञन्तस्य । **श्वाभस्त्रमिति** । इञश्चेत्यण् । बाह्यतद्धितनिमित्तो वृद्धिप्रतिषेध ऐजागमश्च बहिरङ्गत्वादशक्य इञाश्रयेण निषेधेन निवारयितुमिति वचनारम्भः ।

उत्तर० । **किमर्थमिति** । तस्मादित्युत्तरस्येति वचनादुत्तरपदस्यैव वृद्धिर्भविष्यतीति प्रश्नः । आचार्यस्तु शिष्यबुद्धिपरीक्षार्थमाह—**अवयवाद्तोरिति** । **जे प्रोष्ठ-**

उ०—**संज्ञापूर्वक इति** । प्रत्ययसंज्ञाविशिष्टस्यैव च्छस्य विधानादिति भावः । यत्तु स्वं रूपमिति संज्ञापूर्वकत्वमिति । तन्न । अतिप्रसङ्गात् । ओरोदिति वक्तव्य ओर्गुण इत्यस्य ज्ञापकत्वोच्छेदापत्तेश्च । ज्ञापितेऽपि चारितार्थ्याभावादित्याहुः । अपरे तु शुनो दन्तेति भाष्ये न क्वापि दृश्यते । अन्येषामपि दृश्यत इत्यस्याभियुक्तोक्तः प्रपञ्चः सः । ततश्च श्वदंष्ट्राशब्दादेव प्रत्यये तदनन्तरं तेन दीर्घः । संज्ञापूर्वकस्यानित्यत्वं च न क्वापि भाष्य आश्रितमित्याहुः । **बहिरङ्गत्वादिति** । प्रत्यासत्तिन्यायानाश्रयणबोधकं वचनाभिति बोध्यम् ।

उत्तरपदस्य । **तस्मादितीति** । अवयवाद्तोरित्यादौ । **भाष्ये** । परिमाणान्तस्येत्यत्र । **संख्याया इत्येवेति** । नन्वत्र संख्याया इत्यस्य संबन्धेऽसमासे निष्कादिभ्य

---

* ४. ४. ११. + ४. २. ११२. × १. १. ६७.

यथा स्यात्पूर्वपदस्य मा भूत्। प्रोष्ठपदासु जातः प्रोष्ठपादो× ब्राह्मणः।

तद्धितेष्वचामादिवृद्धेरुत्तरपदवृद्धिर्विप्रतिषेधेन द्व्याशीतिकाद्यर्थम् ॥१॥

तद्धितेष्वचामादिवृद्धेरुत्तरपदवृद्धिर्भवति विप्रतिषेधेन। किं प्रयोजनम्। द्व्याशीतिकाद्यर्थम्। अचामादिवृद्धेरवकाशः। ऐतिकायनः औपगवः÷। उत्तरपदवृद्धेरवकाशः। द्विषाष्टिकः त्रिषाष्टिकः+। इहोभयं प्राप्नोति। द्व्याशीतिकः त्र्याशीतिकः। उत्तरपदवृद्धिर्भवति विप्रतिषेधेन। कः पुनरत्र विशेषोऽचामादिवृद्धौ वा सत्यामुत्तरपदवृद्धौ वा। अयमस्ति विशेषः। यद्यत्राचामादिवृद्धिः स्यादैजागमः प्रसज्येत×।

प्राचां ग्रामनगराणाम् ॥ ७। ३। १४ ॥

नगरग्रहणं किमर्थं न प्राचां ग्रामाणामित्येव सिद्धम्। न सिध्यति। अन्यो

प्र०–पदानामिति। पञ्चमीनिर्देशाभावादुत्तरपदस्य न स्यात्। वचनं त्वनाद्यर्थं विज्ञायमानं पूर्वपदस्यापि वृद्धिं विदध्यात्। नियमार्थं वा स्यात्। जातार्थ एव प्रोष्ठपदानां वृद्धिः। प्रोष्ठपदानामेव वा जातार्थ इति। **प्रोष्ठपाद इति**। प्रोष्ठपदाभिर्युक्तः काल इत्यणो लुबविशेष इति लुपि कृते संधिवेलादिसूत्रेण जातार्थेऽण्। अत्राङ्गस्याचामादेर्वृद्धिर्मा भूदित्येवमर्थं उत्तरपदाधिकारः। उत्तरपदवृद्धौ सर्वं चेत्यत्रोत्तरपदाधिकारविहितवृद्धिपरिग्रहार्थश्च। **द्विषाष्टिक इति**। नन्वत्राप्यचामादेर्वृद्धिः प्राप्नोतीति कथमयमवकाशः। अथात्र येन नाप्राप्तिन्यायेनाऽऽदिवृद्धिर्बाध्यते तदा द्व्याशीतिके विप्रतिषेधानुपपत्तिः। उत्सर्गापवादयोरतुल्यबलत्वादिति वार्तिककारस्य विप्रतिषेधोपन्यासो न युक्त इति चिन्त्यमेतत्। **यद्यत्रेति**। सा च प्रतिषिध्येत। ततस्तत्प्रतिषेधसंनियुक्त ऐजागमः स्यादित्यर्थः। उत्तरपदवृद्धेस्तु यथाऽत्र प्रतिषेधो न भवति तथा न व्याख्यामित्यत्र प्रतिपादितम्।

प्राचाम्। **नगरग्रहणमिति**। यद्यपि समुदायवचनोऽपि ग्रामशब्दोऽस्ति भूतग्राम

उ०–इति सूत्रस्थपरमनैष्किकमिति भाष्योदाहरणविरोध इति चेन्न। अनुवृत्तस्य वाक्यभेदेन संबन्धात्तेन परिमाणान्तस्येत्यस्यान्यत्र क्वचित्कत्वं तेन परमनैष्किकसिद्धिरनतिप्रसङ्गश्चेत्यदोषात्। संख्याया इत्येतद्वाक्यसाहचर्याच्चास्याप्युत्तरपद एव प्रवृत्तिरित्याशयात्। ननु पूर्वपदस्य सामान्यसूत्रेण सिद्धत्वाद्वचनं व्यर्थं स्यादत आह— **वचनं त्विति**। स्वयं फलान्तरमप्याह—**उत्तरपदवृद्धाविति**। **चिन्त्यमेतदिति**। उत्तरपदवृद्धेरपवादत्वं न युक्तम्। विषयभेदात्। ह्रद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्यादौ पूर्वपदस्येत्युक्तेरन्यत्रोत्तरपदवृद्धिविषये पूर्वपदे वृद्ध्यभावबोधनादस्यावकाशः। द्व्याशीतिक उत्तरपदसंबन्ध्यच एवोभयप्राप्तेर्विप्रतिषेधोपपत्तिः। फलविशेषपर्यवसायिनोर्द्वयोः संभवस्याभावाद्विप्रतिषेधमूलमसंभवोक्तिरत्राप्यस्तीत्यन्ये। **प्रतिपादितामिति**। अनन्तरत्वादचामादिवृद्धेरेव स निषेध इति तत्संनियोगशिष्ट ऐजागमः स्यादिति भावः।

प्राचां ग्रा०। ननु ग्रामः समूहो नगरं देशविशेष इत्यर्थभेदात्तदावश्यक-

---

× ४. २. ३; ४; ४. ३. ९६ ÷७. २. ११५; ११८. +७. ३. १५. × ७. ३. ३.

ग्रामोऽन्यन्नगरम् । कथं ज्ञायते । एवं हि कश्चित्कंचित्पृच्छति । कुतो भवानागच्छति ग्रामात् । स आह । न ग्रामान्नगरादिति । ननु च भो य एव ग्रास्तन्नगरम् । कथं ज्ञायते । लोकतः । ये हि ग्रामे विधयो नेष्यन्ते साधीयस्ते नगरे न क्रियन्ते । तद्यथा । अभक्ष्यो ग्राम्यकुक्कुटोऽभक्ष्यो ग्राम्यशूकर इत्युक्ते सुतरां नागरोऽपि न भक्ष्यते । तथा ग्रामे नाध्येयमिति साधीयो नगरे नाधीयते । तस्माद्य एव ग्रामस्तन्नगरम् । कथं यदुक्तमेवं हि कश्चित्कंचित्पृच्छति कुतो भवानागच्छति ग्रामात् स आह न ग्रामान्नगरादिति । संस्त्यायविशेषमसावाचष्टे । संस्त्यायविशेषा ह्येते ग्रामो घोषो नगरं संवाह इति । एवं तर्हि सिद्धे सति यद्ग्रामग्रहणे नगरग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्यत्र ग्रामग्रहणे नगरग्रहणं न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । विशिष्टलिङ्गो नदी देशोऽग्रामाः [२. ४. ७] इत्यत्र नगरप्रतिषेधश्चोदितः स न वक्तव्यो भवति । यद्येतज्ज्ञाप्यत उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् [४. २. १०९] इत्यत्र नगरग्रहणं कर्तव्यम् । वाहीकग्रामेभ्यश्च [४. २. ११७] नगरग्रहणं कर्त-

---

प्र०—इन्द्रियग्राम इति तथाऽपि जननिकायनिवासार्थत्वेनातिप्रसिद्धः । अभक्ष्यो ग्राम्यकुक्कुटः । ग्रामे नाध्येयमिति तदर्थस्यैव ग्रहणमिति मत्वा प्रश्नः । **अन्यो हि ग्राम इति** । विशेषेण विशेषान्तरस्यासंग्रहणान्नगरग्रहणम् । **साधीयस्त इति** । नगरस्याशुचितरत्वात् । **संस्त्यायविशेषमिति** । सामान्यशब्दस्यापि प्रकरणवशाद्विशेषावस्थानं दृश्यते । संस्त्यायावगमने निर्ज्ञाते विशेषपरिज्ञानाय कुत आगच्छतीति प्रष्टव्ये ग्रामशब्दोच्चारणाद्विशेषवाची ग्रामशब्दोऽनेन प्रयुक्त इति प्रतीयते । संस्त्यायो निवासः । ब्राह्मणकर्षकपुरुषप्रधानो देशो ग्रामः । गोमहिष्यादियुक्तो घोषः । प्राकारपरिखान्वितं श्रेणीधर्मयुक्तं संस्थानं नगरम् । प्राकारपरिखायुक्तस्तु श्रेणिधर्मान्वितो देशः संवाहः । न च नगरशब्दसनिधाने गोबलीवर्दन्यायेन विशिष्टग्रामग्रहणाय संवाहादिनिवृत्तये नगरग्रहणम् । संवाहादिनिवृत्तेरनिष्टत्वात् । **उदीच्यग्रामाच्चेति** । ग्रामनगरमित्यादावत्रर्थम । **वाहीकग्रामेभ्यश्चेति** । शाकलिक इत्यादयर्थम् । **दिक्शब्दा इति** । पूर्व-

---

उ०—मत आह—**यद्यपीति** । निकायः समूहः । वस्तुतः समूहवचनस्य निवासवचनस्य च ग्रहणेऽपि नगरग्रहणवैयर्थ्यस्य दुर्वारत्वेन यद्यपीत्यादिग्रन्थो वस्तुतत्वनिरूपणपर एव । नत्वेतं विना प्रश्नानुपपत्तिरिति बोध्यम् । भाष्ये **आगत इति** । **ग्रामादिति** । कुतो भवान् ग्रामादागत इति पृच्छतीत्यन्वयः । कुतो भवानागच्छति ग्रामादिति क्वचित्पाठः । **सामान्यशब्दस्यापीति** । एवं च ग्रामशब्दो जननिवाससामान्ये तद्विशेषे चेति भावः । अत एव भाष्ये य एव ग्रामस्तन्नगरमिति संस्त्यायविशेषा ह्येते ग्रामो घोषो नगरं संवाह इति चोक्तम् । श्रेणी संघविशेषः । तद्धर्मः संभूयोपादानाशनम् । **प्राकारेति** । प्राकारपरिखाभ्यामयुक्त इत्यर्थः । **शाकलिक इति** । शाकलं नाम वाह्लिकेषु नगरम् ।

व्यम्। दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु [६. २. १०३] नगरग्रहणं कर्तव्यम्। इदं चतुर्थं ज्ञापकार्थम्। तत्रातिनिर्बन्धो न लाभः। तस्माद्यस्मिन्नेव ग्रामग्रहणे नगरग्रहणं नेष्यते तस्य प्रतिषेधो वक्तव्यः।

संख्यायाः संवत्सरसंख्यस्य च ॥ ७। ३। १५ ॥

संवत्सरग्रहणमनर्थकं परिमाणान्तस्येति कृतत्वात् ॥ १ ॥

संवत्सरग्रहणमनर्थकम्। किं कारणम्। परिमाणान्तस्येति कृतत्वात्। परिमाणान्तस्यासंज्ञाशाणयोः [७. ३. १७] इत्येव सिद्धम्।

ज्ञापकं तु कालपरिमाणानां वृद्धिप्रतिषेधस्य ॥ २ ॥

एवं तर्हि ज्ञापयत्याचार्यः कालपरिमाणानां वृद्धिर्न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। द्वैरात्रिकः त्रैरात्रिकः अत्र वृद्धिर्न भवति। नैतदस्ति प्रयोजनम्। नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धावसत्यां वा। इदं तर्हि। द्वैसमिकः त्रैसमिकः। इदं चापि प्रयोजनं द्वैरात्रिकः त्रैरात्रिकः। ननु चोक्तं नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धावसत्यां वेति। अयमस्ति विशेषः। यद्यत्रोत्तरपदवृद्धिः स्यादचामादेर्वृद्धिर्न स्यात्।

अपर आह। ज्ञापकं तु कालपरिमाणानां परिमाणग्रहणस्य। एवं तर्हि ज्ञापयत्याचार्यः कालपरिमाणानां परिमाणग्रहणेन ग्रहणं न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि

प्र०—पाटलिपुत्रमित्यादौ पूर्वपदान्तोदात्तार्थम्। **अतिनिर्बन्ध इति**। अतिगौरवम्। **न लाभ इति**। लाघवम्।

संख्यायाः। **संवत्सरग्रहणमिति**। कालः क्रियापरिच्छेदहेतुत्वात्परिमाणं तद्विशेषवाची संवत्सरशब्द इति भावः। **द्वैरात्रिक इति**। द्वे रात्री अधीष्ट इति तद्धितार्थे समासे रात्र्यहःसंवत्सराच्चेति वा स्वविधानात्पक्षे ठञ्। **द्वैसमिक इति**। अधीष्टादिषु समायाः खः, द्विगोर्वेति पक्षे ठञ्। **अचामादेर्वृद्धिर्न स्यादिति**। सत्यपि संभवे बाधनं भवतीति न्यायात्। **अपर आहेति**। पूर्वं विशेषविषयं ज्ञापनमाश्रितमिदानीं तु सामान्यविषयमिति भेदः। **द्विवर्षेति**। द्वे वर्षे भूता

उ०—लाभपदार्थमाह—**लाघवमिति**। एवं चात्र नगरग्रहणं प्रत्याख्यातम्।

संख्यायाः। **काल इति**। परिमाणान्तस्येत्यत्र परिच्छेदकमात्रं परिमाणशब्देन गृह्यते नतु सर्वतो मानमेव शाणप्रतिषेधादिति भावः। **सत्यपि संभव इति**। हद्भगसिन्ध्वन्त इति पूर्वोक्तज्ञापकादिति वक्तुमुचितम्। **इति भेद इति**। असंख्या-

[४. १. २२] द्विवर्षा त्रिवर्षा । परिमाणपर्युदासेन पर्युदासो न भवति ।

प्रवाहणस्य ढे ॥ ७ । ३ । २८ ॥

परस्य वृद्धिर्नेत्यनुवर्तत उताहो न+ । किंचातः । यद्यनुवर्तते प्रवाहणेयी* भार्याऽस्येति प्रवाहणेयीभार्यः वृद्धिनिमित्तस्येति× पुंवद्भावप्रतिषेधो न प्राप्नोति । अथ निवृत्तं न दोषो भवति । यथा न दोषस्तथाऽस्तु । अथवा पुनरस्त्वनुवर्तते । ननु चोक्तं प्रवाहणेयी भार्याऽस्य प्रवाहणेयीभार्यः वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो न प्राप्नोतीति । नैष दोषः । मा भूदेवम् । जातेरित्येवं÷ भविष्यति ।

यथातथयथापुरयोः पर्यायेण ॥ ७ । ३ । ३१ ॥

अयं योगः शक्योऽवक्तुम् । कथमयाथातथ्यम् आयथातथ्यम् अयाथापुर्यम् आयथापुर्यम् । यदा तावत्पूर्वपदस्य वृद्धिस्तदैवं विग्रहः करिष्यते । न

प्र०—तमधीष्ट इति ठञ । तस्य वर्षाल्लुक् चेति पक्षे लुक् । द्विगोरिति ङीप्प्राप्तोऽपरिमाणेति प्रतिषिद्धः ।

प्रवाह० । पूर्वस्य तु वेति वर्तते । तत्र यदा पूर्वपदस्य वृद्धिर्नास्ति तदोत्तरपदस्य वृद्धिभावाभावयोः श्रुतौ विशेषाभावाद्विशेषान्तरजिज्ञासया प्रश्नः । **परस्येति प्रवाहणेयीति** । शुभ्रादिभ्यश्चेति ढक् । ननु वृद्धेर्निमित्तं यास्मिञ्ञकारादिः स वृद्धिनिमित्त इत्याश्रितम । ततोऽसत्यामपि वृद्धौ वृद्धिनिमित्तव्यपदेशसद्भावात्पुंवद्भावप्रतिषेधो भविष्यति । नैतदस्ति । ञणकानां वृद्धिमुत्पादयतामेव वृद्धिं प्रति निमित्तत्वं नान्यदा । यथा स्नुक्रमोरनात्मनेपदनिमित्त इत्यत्र सत्येवाऽऽत्मनेपदे स्नुक्रमोरात्मनेपदनिमित्तत्वाद्दिडभावो नासति । **जातेरिति** । गोत्रं च चरणैः सहेति जातिवाचित्वात् । अनुवृत्तेरेवं प्रयोजनाभावः ।

यथा० । **न यथातथेति** । यथातथेत्ययं निपातोऽविपरीतार्थवृत्तिरिति केचिदाहुः

उ०—पूर्वपदे परिमाणान्तस्येत्यस्याप्यप्रवृत्तेः । संज्ञाविषये त्वनभिधानं बोध्यम् । अन्यथा तद्विषये संवत्सरग्रहणस्य चारितार्थ्येन ज्ञापकं भज्येत ।

प्रवाहणस्य ढे । भाष्ये **परस्य वृद्धिर्नेति** । उत्तरपदाधिकारात्प्राप्तिः । **वृद्धिमुत्पादयतामिति** । फलोपहित एव निमित्तशब्दो मुख्य इति भावः । **जातीति** अनन्तरापत्येऽपि गोत्रत्वारोपेण प्रत्ययात्प्रवाहणेयी सर्वथा जातिरेवेति बोध्यम् **प्रयोजनाभाव इति** । हरदत्तस्तु तत्संबन्धाज्जातेश्चेत्यनित्यम् । तेनौपसंख्यानिकर न निषेध इत्याह ।

यथा तथ० । एतौ पदार्थानतिवृत्तावव्ययीभावौ । तथाभावमनतिक्रान्तः यथातथम्—सत्यम् । पुरा यथा भूतं यद्वस्तु तदद्यापि तथाभावमनतिक्रान्तं यथ

+ ७. ३. २७. * ४. १ १२३ × ६ ३ ३९ ÷ ६. ३ ४१.

यथातथा अयथातथा। अयथातथाभाव आयथातथ्यम्। यदोत्तरपदस्य वृद्धिस्तदैवं विग्रहः करिष्यते। यथातथाभावो याथातथ्यम्। न याथातथ्यमयाथातथ्यम्।

हनस्तोऽचिण्णलोः ॥ ७। ३। ३२ ॥

हन्तेस्तकारे ताद्धिते प्रतिषेधः ॥ १ ॥

हन्तेस्तकारे ताद्धिते प्रतिषेधो वक्तव्यः। वार्त्रघ्नम् भ्रौणघ्नम्+।

उक्तं वा ॥ २ ॥

किमुक्तम्। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धमिति×।

आतो युक्चिण्कृतोः ॥ ७। ३। ३३ ॥

क्डिद्ग्रहणं किमर्थम्। इह मा भूत्। ददौ दधौ। नैतदस्ति प्रयोजनम्। अचिण्णलोरिति* वर्तते। यद्यचिण्णलोरिति वर्तते अदायि आधायीत्यत्र न प्राप्नोति। वचनाच्चिणि भविष्यति। अचिण्णलोरिति वर्तते। एवमपि चौडिः बालाकिरित्यत्र÷ प्राप्नोति। लोपो×ऽत्र बाधको भविष्यति। इदमिह संप्रधार्यम्। लोपः क्रियतां युगिति किमत्र कर्तव्यम्। परत्वाद्युक्। एवं तर्ह्याचा-

---

प्र०—अन्ये तु यथातथाशब्दयोः सुप्सुपेति समास एतदर्थ इत्याहुः। ततो नञिति समासे कृते ब्राह्मणादिषु दर्शनात्यत्र। स्वरेऽपि नास्ति विशेषः। आयथातथ्यमित्यस्य त्रित्वादाद्युदात्तत्वादयाथातथ्यमित्यस्याप्यव्ययपूर्वपदप्रकृतिस्वरत्वात्। प्रत्ययान्तरार्थं त्वेतन्न भवत्यनभिधानादेताभ्यां प्रत्ययान्तराभावात्।

आतो यु०। **ददाविति**। उत्तमस्य णलो णित्त्वाभावपक्षे सावकाशमात्त्वं णित्त्वे परत्वाद्युग्बाधेत। **अदाधीति**। सूत्रे चिणो निमित्तत्वेनोपादानादचिण्णलोरित्यनुवर्तनाच्च विधिनिषेधयोः पर्यायः स्यात्। **वचनादिति**। आतो युक्चिणि चेति चिणः साक्षादुपादानान्निषेधो न भविष्यति। चिणि विधिः प्रत्यक्षशिष्टत्वादसंदिग्धो निषेधस्तु णलर्थ एवानुवर्तते। अथ चिणर्थोऽपीति संदिग्ध इत्यसंदिग्धो विधिरेव प्रवर्तते। **अचामादेरिति** वर्तत इति। नन्वेवं दरिद्रायके

उ०—पुरम्। अत एव सूत्रे ह्रस्वनिर्देश इति कैश्चित्। एतच्च यथातथाभाव इति भाष्येण विरुध्यते। तस्मात्सूत्रेऽपि दीर्घपाठ एवोचित इति परे। **अयं निपात इति**। विशिष्टो निपात इत्यर्थः। अविपरीतार्थः सत्यरूपोऽर्थः। **एतदर्थः**। एतद्वृत्तिविषय इत्यर्थः। सत्यरूपार्थ इत्यर्थो वा।

आतो युक्। ननु निरवकाशत्वाण्णल औत्वं बाधकं स्यादत आह—**उत्तमस्येति**। इदमुपलक्षणं भूतपूर्वगत्यौत्वस्य दरिद्रातेरालोपे प्रवृत्त्या चारितार्थ्यात्। विषयभेदेनापवादत्वाभाव इति तु नेत्युक्तम्। **पर्यायः स्यादिति**। एवं च न प्राप्नोतीति भाष्यस्य पक्षे न प्राप्नोतीत्यर्थ इति भावः। **असंदिग्धो विधिरेवेति**। तदुक्तं भाष्ये वचनाच्चिणि

+ ६. ४. १३५. × ७. ३. ११४. * ७. ३. ३२. ÷ ४. १. ९६. × ६. ४. १४८.

मादेरिति× वर्तते । यत्राचामादिराकारस्तत्र युगिति । एवमपि ज्ञा देवताऽस्य स्थालीपाकस्य ज्ञः÷ स्थालीपाकः अत्र प्राप्नोति । तस्मात्कृद्ग्रहणं कर्तव्यम् ।

नोदात्तोपदेशस्य मान्तस्यानाचमेः ॥ ७ । ३ । ३४ ॥

अत्यल्पमिदमुच्यतेऽनाचमेरिति । अवमिकमिचमीनामिति वक्तव्यम् । वामः कामः आचामः ।

शाच्छासाह्वाव्यावेपां युक् ॥ ७ । ३ । ३७ ॥

णिच्प्रकरणे धून्प्रीञोर्नुग्वचनम् ॥ १ ॥

णिच्प्रकरणे धून्प्रीञोर्नुग्वक्तव्यः । धूनयति प्रीणयति ।

पातेर्लुग्वचनम् ॥ २ ॥

पालयति ।

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ॥ ७ । ३ । ४४ ॥

स्थग्रहणं किमर्थम् । इदं विचारयिष्यत इत्त्वे कग्रहणं संघातग्रहणं वा

प्र०—युड् न प्राप्नोति । एवं तर्हि दोषान्तरोपन्यासादयं दोषो नोक्तस्तदाह—**एवमपीति** । आदिवद्भावादत्र प्रसङ्गो यथा दाय इत्यादौ ।

नोदा० । **काम इति** । आयादय आर्धधातुके वेति यदा णिङ् नास्ति तदा घत्रि वृद्धिनिषेधस्य पर्युदासः । विश्रामशब्दस्त्वसाधुरेव । उद्यमोपरमौ संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावात् ।

शाच्छा० । **पातेर्लुगिति** । यद्यपि पाल रक्षण इत्यस्य पालयतीति सिध्यति तथाऽपि पातेः पुङ्निवृत्तये लुगागमविधानम् । लुग्विकरणत्वात्तस्य युकोऽप्रसङ्गः ।

प्रत्यय० । **स्थग्रहणमिति** । कादिति वर्णग्रहणं नच वर्णमात्रं ककारः प्रत्ययोऽस्तीति सामर्थ्यात्प्रत्ययावयवे प्रत्ययशब्दो वर्तिष्यत इति प्रश्नः । इतरः पक्षान्तरे प्रयोजनमाख्यातुमाह—**इदमिति** । वक्ष्यमाणस्य बुद्ध्या प्रत्यक्षीकृत्य परा-

---

उ०—भविष्यत्यच्चिण्णलोरिति वर्तत इति । इदं प्रत्यक्षं तदानुमानिकमित्यर्थः । **आदिवद्भावादिति** । आद्यन्तवदेकस्मिन्नित्यनेनाचामादित्वमिति भावः ।

नोदात्तो० । ननु कमेर्णिङि वृद्धौ णिलोपे कामः सिद्धोऽत्र आह—**आयादय इति** । **उद्यमोपरमेति** । तयोरनुदात्तोपदेशत्वादिति भावः । **वृद्ध्यभावादिति** । घत्रर्थे के साधुरित्यन्ये ।

शाच्छा० । **पुङ्निवृत्तय इति** । अर्तिह्रीतिप्राप्तपुङ्निवृत्तय इत्यर्थः । **नन्वनेन** प्राप्तपुङ्निवृत्तय इति वक्तुं युक्तमत आह—**लुग्विकरणत्वादिति** ।

प्रत्ययस्थात् । ननु वक्ष्यमाणस्याप्रत्यक्षत्वात्कथमिदमा परामर्शोऽत्र आह—**वक्ष्य-**

स्याद्वर्णग्रहणं वेति । तद्यदा संघातग्रहणं तदा स्थग्रहणं कर्तव्यमिहापि यथा स्यात् कारिका हारिका । यदा हि वर्णग्रहणं तदा केवलः ककारः प्रत्ययो नास्तीति कृत्वा वचनाद्भविष्यति ।

अथासुप इति कथमिदं विज्ञायते । असुब्वतोऽङ्गस्येति । आहोस्विच्च चेत्सुपः पर आबिति । किंचातः। यदि विज्ञायतेऽसुब्वतोऽङ्गस्येति बहुचर्मिका अत्र न प्राप्नोति । अथ विज्ञायते न चेत्सुपः पर आबिति न दोषो भवति । अथा न दोषस्तथाऽस्तु ।

प्र०—मर्शः । **इहापीति** । अन्यथा दत्तिकेत्यादावेव स्यात् । अज्ञाताद्यर्थविवक्षायामत्र प्रत्ययः । स्थग्रहणे तु क्रियमाणे सर्वत्र भवति । प्रत्ययस्यापि व्यपदेशिवद्भावेन प्रत्ययस्थत्वात् । **असुब्वत इति** । न सुब्वदसुब्वदिति नञ्समासोऽसुप इत्यस्य बहुव्रीहित्वप्रदर्शनाय । भाष्यकारेण लाघवं नाऽऽश्रितम् । तदाश्रयणे हि बहुव्रीहिरेव न्याय्यो ननु मतुबन्तः समासः । तत्रायं प्रश्नः । किमसुप इति बहुव्रीहिराश्रीयते न विद्यते सुब्यस्मिंस्तदसुबिति । अथ तत्पुरुषः प्रसज्यप्रतिषेधश्च न चेत्सुप इति । प्रत्ययग्रहणेन तदन्तविधेः सुबन्तादिति बोद्धव्यम् । **बहुचर्मिकेति** । बहूनि चर्माण्यस्यामिति बहुव्रीहिः । प्रत्ययलक्षणेन सुब्वदेतदङ्गमितीत्त्वं न प्राप्नोति । न लुमताऽङ्गस्येति प्रतिषेधोऽत्र नास्ति । लुमता लुप्ते यदङ्गं तस्य कार्ये स प्रतिषेधः । इदं तु टाप्यङ्गम् । **न दोषो भवतीति** । चर्मशब्दः सुबन्तो नच तस्मात्पर आप्प्रत्ययविधानात् । बहवः परिव्राजका अस्यां सा बहुपरिव्राजकेत्यत्र तु प्रत्ययलक्षणेन सुबन्तात्परिव्राजकशब्दात्पर आबिति प्रतिषेधः प्रवर्तते । पर्युदासाश्रयणे समासादसुबन्तात्पर आबिति स्यादेवात्रेत्त्वम् । तथाऽसुप इत्यनर्थकं स्यादिति प्रसज्यप्रतिषेध

उ०—**माणस्येति** । ननु स्थग्रहणे दत्तिकेत्यादौ प्रत्ययस्य कशब्दस्य प्रत्ययस्थत्वायोगोऽत आह—**प्रत्ययस्यापीति** । **प्रसज्येति** । एवं च सौत्रत्वादसमर्थसमास इति भावः । ननु सुलोपात्कथमेतत्सुब्वदङ्गमत आह—**प्रत्ययलक्षणेनेति** । **टाप्यङ्गमिति** । आप्रि परे यदङ्गमविद्यमानसुप्कं तदवयवाकारस्य प्रत्ययस्थकात्पूर्वस्येत्त्वमिति सूत्रार्थादिति भावः । **चर्मशब्दः सुबन्त इति** । गोस्त्रियोरित्यादिसूत्रस्थभाष्यप्रामाण्येन बहु जस् चर्मन् जसित्यवस्थायामुत्तरजसुत्तरं कपि समासान्ते पूर्वसुपोस्तद्धितान्तत्वात्प्रातिपदिकत्वेन लुक्यपि प्रत्ययलक्षणेन सुबन्तत्वात्कपः पूर्वभागस्य समाससंज्ञा । 'यद्वा कपूसमाससंज्ञयोर्युगपत्प्राप्तिः । कपः समासावयवत्वं तु वाचनिकमेव । समासान्तविषये च सुबन्तात्तद्धितोत्पत्तिरित्यस्य त्यागः । प्रत्ययस्य निरर्थकत्वात्परिपूर्णं पदमित्यादिन्यायविषयाभावादिति भावः । एतेन कबन्तस्य प्रातिपदिकत्वेन ततः सुपि ततः समास इत्यपास्तम् । तावताऽप्यनेकसुबन्ताभावेन समासस्य दुरुपपादत्वादत्रेत्त्वासिद्धेश्चेति दिक् । असुप इत्यस्य प्रत्युदाहरणं दर्शयति—**बहव इति** । **उपचय इति** । तदकरणाल्ला-

इदं विचार्यत इत्त्वे कग्रहणं संघातग्रहणं वा स्याद्वर्णग्रहणं वेति। कश्चात्र विशेषः।

इत्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिः ॥ १ ॥

इत्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिः। एतिकाश्चरन्ति+। वचनाद्भविष्यति। अस्ति वचने प्रयोजनम्। किम्। कारिका हारिका। अस्तु तर्हि वर्णग्रहणम्।

वर्णग्रहणं चेद्व्यवहितत्वादप्रसिद्धिः ॥ २ ॥

वर्णग्रहणं चेद्व्यवहितत्वान्न प्राप्नोति। कारिका हारिका। अकारेण व्यवहितत्वान्न प्राप्नोति। एकादेशे कृते नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव। एवं तर्ह्याहायं प्रत्ययस्थात्का-

---

प्र०—आश्रीयते। **इत्त्व इति**। यद्यकारान्तस्य शब्दस्य कादिति निर्देशस्ततः संघातग्रहणम्। अथाऽऽगन्तुनाऽकारेणोच्चारणार्थेन निर्देशस्ततो वर्णग्रहणम्। ननु वर्णग्रहणे स्थग्रहणस्याऽऽनर्थक्यात्स्थग्रहणात्संघातग्रहणेन भाव्यम्। नैतदस्ति। कोऽत्र निर्दोषः पक्ष इति विचार्यते। यदि च संघातग्रहणपक्षो दोषवांस्तन्मा कारि स्थग्रहणमुपचयो भविष्यति। **एतिका इति**। एतदोऽकाचि जसि त्यदाद्यत्वे टापीत्त्वे च रूपम्। अकचोऽकार उच्चारणार्थो न श्रवणार्थः। तेन धकिद्भिरकुदित्यादि सिध्यति। **वचनादिति**। यथैव कारिकेत्यादावेकादेशे कृतेऽनच्के ककारे संपन्ने भूतपूर्वगत्या भवत्येवमकञ्विधिसूत्रेऽकशब्दः संघात उच्चारित इति तदाश्रयेत्त्वप्रवृत्तिः। **अस्तीति**। एकादेशस्य पूर्वविधौ स्थानिवद्भावात्। अथवा वचनादित्यस्यायमर्थः—न यासयोरिति ज्ञापकाद्भविष्यति। इतरस्त्वगृहीताभिप्राय आह—**अस्तीति**। ततश्चाभिप्रायमप्रकाश्यपक्षान्तरमाश्रयति—**अस्तु तर्हीति**। **व्यवहितत्वादिति**। ननु चाऽऽपीत्यनेन ककारो न विशेष्यते किं तर्ह्यकारः। आपि च

उ०—घवमित्यर्थः। नच वर्णग्रहणे स्थग्रहणाभावे कान्तात्प्रत्ययादित्यर्थः स्यादिति वाच्यम्। क्षिपकादीनामिति निषेधवैयर्थ्यापत्तेः। एवं च पूर्वग्रहणमपि माऽस्तु। प्रत्यये कीत्येव युक्तम्। कादावित्यर्थस्तु न यासयोरितिनिषेधसामर्थ्यान्नेति भावः। **उच्चारणार्थ इति**। एवं च प्रत्ययस्थकशब्दस्याभावः। ननु वचनस्य कारिकादिरवकाशः स्यादत आह—**यथैवेति**। **एकादेश इति**। अन्तरङ्गत्वाद्वार्णादाङ्गमिति तु विभिन्नस्थानिकत्वान्नेति भावः। **स्थानिवद्भावादिति**। नचैवमकास्य नाऽऽप्परत्वं ककाराकाराभ्यां व्यवधानादिति वाच्यम्। सामर्थ्येनादोषात्। अत एव न यासयोरित्यादि चरितार्थम्। अत एतिकाशब्दे त्रिभिर्व्यवायेऽपि न दोषः। भाष्येऽकारेणेति। ककारेण व्यव-

---

यथातथा अयथातथा । अयथातथाभाव आयथातथ्यम् । यदोत्तरपदस्य वृद्धिस्तदैवं विग्रहः करिष्यते । यथातथाभावो याथातथ्यम् । न याथातथ्यमयाथातथ्यम् ।

हनस्तोऽचिण्णलोः ॥ ७ । ३ । ३२ ॥

हन्तेस्तकारे ताद्धिते प्रतिषेधः ॥ १ ॥

हन्तेस्तकारे ताद्धिते प्रतिषेधो वक्तव्यः । वार्त्रघ्नम् भ्रौणघ्नम्+ ।

उक्तं वा ॥ २ ॥

किमुक्तम् । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धमिति× ।

आतो युक्चिण्कृतोः ॥ ७ । ३ । ३३ ॥

कृद्ग्रहणं किमर्थम् । इह मा भूत् । ददौ दधौ । नैतदस्ति प्रयोजनम् । अचिण्णलोरिति* वर्तते । यद्यचिण्णलोरिति वर्तते अदायि आधायीत्यत्र न प्राप्नोति । वचनाच्चिणि भविष्यति । अचिण्णलोरिति वर्तते । एवमपि चौडिः बालाकिरित्यत्र÷ प्राप्नोति । लोपो×ऽत्र बाधको भविष्यति । इदमिह संप्रधार्यम् । लोपः क्रियतां युगिति किमत्र कर्तव्यम् । परत्वाद्युक् । एवं तर्ह्यचा-

---

प्र०—अन्ये तु यथातथाशब्दयोः सुप्सुपेति समास एतदर्थ इत्याहुः । ततो नञिति समासे कृते ब्राह्मणादिषु दर्शनात्ष्यञ् । स्वरेऽपि नास्ति विशेषः । आयथातथ्यमित्यस्य त्रित्वादाद्युदात्तत्वादयाथातथ्यमित्यस्याप्यव्ययपूर्वपदप्रकृतिस्वरत्वात् । प्रत्ययान्तरार्थं त्वेतन्न भवत्यनभिधानादेताभ्यां प्रत्ययान्तराभावात् ।

आतो यु० । **ददाविति** । उत्तमस्य णलो णित्त्वाभावपक्षे सावकाशमात्त्वं णित्त्वे परत्वाद्युग्बाधेत । **अदायीति** । सूत्रे चिणो निमित्तत्वेनोपादानादचिण्णलोरित्यनुवर्तनाच्च विधिनिषेधयोः पर्यायः स्यात् । **वचनादिति** । आतो युक्चिणि चेति चिणः साक्षादुपादानान्निषेधो न [illegible]ति । चिणि विधिः प्रत्यक्षशिष्टत्वादसंदिग्धो निषेधस्तु णलर्थ एवानुवर्तते । अथ चिणर्थोऽपीति संदिग्ध इत्यसंदिग्धो विधिरेव प्रवर्तते । **अचामादेरिति वर्तत इति** । नन्वेवं दरिद्रायके

उ०—पुरम् । अत एव सूत्रे ह्रस्वनिर्देश इति केचित् । एतच्च यथातथाभाव इति भाष्येण विरुध्यते । तस्मात्सूत्रेऽपि दीर्घपाठ एवोचित इति परे । **अयं निपात इति** । विशिष्टो निपात इत्यर्थः । अविपरीतार्थः सत्यरूपोऽर्थः । **एतदर्थः** । एतद्वृत्तिविषय इत्यर्थः । सत्यरूपार्थ इत्यर्थो वा ।

आतो युक् । ननु निरवकाशत्वाण्णल औत्वं बाधकं स्यादत आह—**उत्तमस्येति** । इदमुपलक्षणं भूतपूर्वगत्यौत्वस्य दरिद्रातेरालोपे प्रवृत्त्या चारितार्थ्यात् । विषयभेदनापवादत्वाभाव इति तु नेत्युक्तम् । **पर्यायः स्यादिति** । एवं च न प्राप्नोतीति भाष्यस्य पक्षे न प्राप्नोतीत्यर्थ इति भावः । **असंदिग्धो विधिरेवेति** । तदुक्तं भाष्ये वचनाच्चिणि

+ ६. ४. १३५. × ७. ३. ११४. * ७. ३. ३२. ÷ ४. १. ९६. × ६. ४. १४८.

मादेरिति× वर्तते । यत्राचामादिराकारस्तत्र युगिति । एवमपि ज्ञा देवताऽस्य स्थालीपाकस्य ज्ञः÷ स्थालीपाकः अत्र प्राप्नोति । तस्मात्क्रद्ग्रहणं कर्तव्यम् ।

नोदात्तोपदेशस्य मान्तस्यानाचमेः ॥ ७ । ३ । ३४ ॥

अत्यल्पमिदमुच्यतेऽनाचमेरिति । अवामिकमिचमीनामिति वक्तव्यम् । वामः कामः आचामः ।

शाच्छासाह्वाव्यावेषां युक् ॥ ७ । ३ । ३७ ॥

णिच्प्रकरणे धूञ्प्रीञोर्नुग्वचनम् ॥ १ ॥

णिच्प्रकरणे धञ्प्रीञोर्नुग्वक्तव्यः । धूनयति प्रीणयति ।

पातेर्लुग्वचनम् ॥ २ ॥

पालयति ।

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ॥ ७ । ३ । ४४ ॥

स्थग्रहणं किमर्थम् । इदं विचारयिष्यत इत्त्वे कग्रहणं संघातग्रहणं वा

प्र०—युङ् न प्राप्नोति । एवं तर्हि दोषान्तरोपन्यासादयं दोषो नोक्तस्तदाह—**एवमपीति** । आदिवद्भावादत्र प्रसङ्गो यथा दाय इत्यादौ ।

नोदा० । **काम इति** । आयादय आर्धधातुके वेति यदा णिङ् नास्ति तदा घत्रि वृद्धिनिषेधस्य पर्युदासः । विश्रामशब्दस्त्वसाधुरेव । उद्यमोपरमौ संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावात् ।

शाच्छा० । **पातेर्लुगिति** । यद्यपि पाल रक्षण इत्यस्य पालयतीति सिध्यति तथाऽपि पातेः पुङ्निवृत्तये लुगागमविधानम् । लुग्विकरणत्वात्तस्य युकोऽप्रसङ्गः ।

प्रत्यय० । **स्थग्रहणमिति** । कादिति वर्णग्रहणं नच वर्णमात्रं ककारः प्रत्ययोऽस्तीति सामर्थ्यात्प्रत्ययावयवे प्रत्ययशब्दो वर्तिष्यत इति प्रश्नः । इतरः पक्षान्तरे प्रयोजनमाख्यातुमाह—**इदमिति** । वक्ष्यमाणस्य बुद्ध्या प्रत्यक्षीकृत्य परा-

---

उ०—भविष्यत्यचिण्णलोरिति वर्तत इति । इदं प्रत्यक्षं तदानुमानिकमित्यर्थः । **आदिवद्भावादिति** । आद्यन्तवदेकस्मिन्नित्यनेनाचामादित्वमिति भावः ।

नोदात्तो० । ननु कमेर्णिङि वृद्धौ णिलोपे कामः सिद्धोऽत आह—**आयादय इति** । **उद्यमोपरमेति** । तयोरनुदात्तोपदेशत्वादिति भावः । **वृद्ध्यभावादिति** । घत्रर्थे के साधुरित्यन्ये ।

शाच्छा० । **पुङ्निवृत्तय इति** । अर्तिह्रीतिप्राप्तपुङ्निवृत्तय इत्यर्थः । **नन्वनेन** प्राप्तयुङ्निवृत्तय इति वक्तुं युक्तमत आह—**लुग्विकरणत्वादिति** ।

प्रत्ययस्थात् । ननु वक्ष्यमाणस्याप्रत्यक्षत्वात्कथमिदमा परामर्शोऽत आह—**वक्ष्य-**

× ७. २. ११७. — ÷ २८.

स्यादवर्णग्रहणं वेति। तद्यदा संघातग्रहणं तदा स्थग्रहणं कर्तव्यमिहापि यथा स्यात् कारिका हारिका। यदा हि वर्णग्रहणं तदा केवलः ककारः प्रत्ययो नास्तीति कृत्वा वचनाद्भविष्यति।

अथासुप इति कथमिदं विज्ञायते। असुब्वतोऽङ्गस्येति। आहोस्विन्न चेत्सुपः पर आबिति। किंचातः। यदि विज्ञायतेऽसुब्वतोऽङ्गस्येति बहुचर्मिका अत्र न प्राप्नोति। अथ विज्ञायते न चेत्सुपः पर आबिति न दोषो भवति। यथा न दोषस्तथाऽस्तु।

उ०—मार्ष्टीति। अन्यथा दृत्तिकेत्यादावेव स्यात्। अज्ञाताद्यर्थविवक्षायामत्र प्रत्ययः। स्थग्रहणे तु क्रियमाणे सर्वत्र भवति। प्रत्ययस्यापि व्यपदेशिवद्भावेन प्रत्ययस्थत्वात्। असुब्वत इति। न सुब्वदसुब्वदिति नञ्समासोऽसुप इत्यस्य बहुव्रीहित्वप्रदर्शनाय। भाष्यकारेण लाघवं नाऽऽश्रितम्। तदाश्रयणे हि बहुव्रीहिरेव न्याय्यो नतु मतुबन्तः समासः। तत्रायं प्रश्नः। किमसुप इति बहुव्रीहिराश्रीयते न विद्यते सुब्यस्मिंस्तदसुबिति। अथ तत्पुरुषः प्रसज्यप्रतिषेधश्च न चेत्सुप इति। प्रत्ययग्रहणेन तदन्तविधेः सुबन्तादिति बोद्धव्यम्। बहुचर्मिकेति। बहूनि चर्माण्यस्यामिति बहुव्रीहिः। प्रत्ययलक्षणेन सुब्वदेतदङ्गमितीत्वं न प्राप्नोति। न लुमताऽङ्गस्येति प्रतिषेधोऽत्र नास्ति। लुमता लुप्ते यदङ्गं तस्य कार्ये स प्रतिषेधः। इदं तु टाप्यङ्गम्। न दोषो भवतीति। चर्मशब्दः सुबन्तो नच तस्मात्पर आप्व्यवधानात्। बहवः परिव्राजका अस्यां सा बहुपरिव्राजकेत्यत्र तु प्रत्ययलक्षणेन सुबन्तात्परिव्राजकशब्दात्पर आबिति प्रतिषेधः प्रवर्तते। पर्युदासाश्रयणे समासादसुबन्तात्पर आबिति स्यादेवात्रेत्त्वम्। तथाऽसुप इत्यनर्थकं स्यादिति प्रसज्यप्रतिषेध

उ०—मार्ष्टीति। ननु स्थग्रहणे दृत्तिकेत्यादौ प्रत्ययस्य कशब्दस्य प्रत्ययस्थत्वायोगोऽत आह—प्रत्ययस्यापीति। प्रसज्येति। एवं च सौत्रत्वादसमर्थसमास इति भावः। ननु सुलोपात्कथमेतत्सुब्वदङ्गमत आह—प्रत्ययलक्षणेनेति। टाप्यङ्गमिति। आपि परे यदङ्गमविद्यमानसुप्कं तदवयवाकारस्य प्रत्ययस्थकात्पूर्वस्येत्त्वमिति सूत्रार्थादिति भावः। चर्मशब्दः सुबन्त इति। गोस्त्रियोरित्यादिसूत्रस्थभाष्यप्रामाण्येन बहु जस् चर्मन् जसित्यवस्थायामुत्तरजसुत्तरं कपि समासान्ते पूर्वसुपोस्तद्धितान्तत्वात्प्रातिपदिकत्वेन लुकयपि प्रत्ययलक्षणेन सुबन्तत्वात्कपः पूर्वभागस्य समाससंज्ञा। यद्वा कपसमाससंज्ञयोर्युगपत्प्राप्तिः। कपः समासावयवत्वं तु वाचनिकमेव। समासान्तविषये च सुबन्तान्तद्धितोत्पत्तिरित्यस्य त्यागः। प्रत्ययस्य निरर्थकत्वात्परिपूर्णं पदमित्यादिन्यायविषयाभावादिति भावः। एतेन कबन्तस्य प्रातिपदिकत्वेन ततः सुपि ततः समास इत्यपास्तम्। तावताऽप्यनेकसुबन्ताभावेन समासस्य दुरुपपादत्वादत्रेत्त्वासिद्धेश्चेति दिक्। असुप इत्यस्य प्रत्युदाहरणं दर्शयति—बह्व इति। उपचय इति। तदकरणाल्ला-

इदं विचार्यत इत्त्वे कग्रहणं संघातग्रहणं वा स्याद्वर्णग्रहणं वेति। कश्चात्र विशेषः।

इत्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिः ॥ १ ॥

इत्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिः। एतिकाश्चरन्ति+। वचनाद्भविष्यति। अस्ति वचने प्रयोजनम्। किम्। कारिका हारिका। अस्तु तर्हि वर्णग्रहणम्।

वर्णग्रहणं चेद्व्यवहितत्वादप्रसिद्धिः ॥ २ ॥

वर्णग्रहणं चेद्व्यवहितत्वान्न प्राप्नोति। कारिका हारिका। अकारेण व्यवहितत्वान्न प्राप्नोति। एकादेशे कृते नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव। एवं तर्ह्याहायं प्रत्ययस्थात्का-

---

प्र०—आश्रीयते। **इत्त्व इति**। यद्यकारान्तस्य शब्दस्य कादिति निर्देशस्ततः संघातग्रहणम्। अथाऽऽगन्तुनाऽकारेणोच्चारणार्थेन निर्देशस्ततो वर्णग्रहणम्। ननु वर्णग्रहणे स्थग्रहणस्याऽऽनर्थक्यात्स्थग्रहणात्संघातग्रहणेन भाव्यम्। नैतदस्ति। कोऽत्र निर्दोषः पक्ष इति विचार्यते। यदि च संघातग्रहणपक्षो दोषवांस्तन्मा कारि स्थग्रहणमुपचयो भविष्यति। **एतिका इति**। एतदोऽकाचि जसि त्यदाद्यत्वे टापीत्त्वे च रूपम्। अकचोऽकार उच्चारणार्थो न श्रवणार्थः। तेन धकिद्भिरकुदित्यादि सिध्यति। **वचनादिति**। यथैव कारिकेत्यादावेकादेशे कृतेऽनच्के ककारे संपन्ने भूतपूर्वगत्या भवत्येवमकञ्विधिसूत्रेऽकशब्दः संघात उच्चारित इति तदाश्रयेत्त्वप्रवृत्तिः। **अस्तीति**। एकादेशस्य पूर्वविधौ स्थानिवद्भावात्। अथवा वचनादित्यस्यायमर्थः—न यासयोरिति ज्ञापकाद्भविष्यति। इतरस्त्वगृहीताभिप्राय आह—**अस्तीति**। ततश्चाभिप्रायमप्रकाश्यपक्षान्तरमाश्रयति—**अस्तु तर्हीति**। **व्यवहितत्वादिति**। ननु चाऽऽपीत्यनेन ककारो न विशेष्यते किं तर्ह्यकारः। आपि च

उ०—घवमित्यर्थः। नच वर्णग्रहणे स्थग्रहणाभावे कान्तात्प्रत्ययादित्यर्थः स्यादिति वाच्यम्। क्षिपकादीनामिति निषेधवैयर्थ्यापत्तेः। एवं च पूर्वग्रहणमपि माऽस्तु। प्रत्यये कीत्येव युक्तम्। कादावित्यर्थस्तु न यासयोरितिनिषेधसामर्थ्यान्नेति भावः। **उच्चारणार्थ इति**। एवं च प्रत्ययस्थकशब्दस्याभावः। ननु वचनस्य कारिकादिरवकाशः स्यादत आह—**यथैवेति**। **एकादेश इति**। अन्तरङ्गत्वाद्वार्णादाङ्गमिति तु विभिन्नस्थानिकत्वान्नेति भावः। **स्थानिवद्भावादिति**। नचैवमकास्य नाऽऽप्परत्वं ककाराकाराभ्यां व्यवधानादिति वाच्यम्। सामर्थ्येनादोषात्। अत एव न यासयोरित्यादि चरितार्थम्। अत एतिकाशब्दे त्रिभिर्व्यवायेऽपि न दोषः। भाष्येऽकारेणेति। ककारेण व्यव-

---

त्पूर्वस्येति न क्वचिदव्यवधानं तत्र वचनाद्भविष्यति।

वचनप्रामाण्यादिति चेद्रथकट्यादिष्वतिप्रसङ्गः॥ ३॥

वचनप्रामाण्यादिति चेद्रथकटचादिषु दोषो भवति। रथकटचा+ गर्गकाम्या÷। नैष दोषः। येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्। केन च नाव्यवधानम्। वर्णेनैकेन। संघातेन पुनर्व्यवधानं भवति न भवति च।

अथवा पुनरस्तु संघातग्रहणम्। ननु चोक्तमित्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिरिति। परिहृतमेतद्वचनाद्भविष्यतीति। ननु चोक्तमस्ति वचने प्रयोजनम्। किम्। कारिका हारिकेति। अत्राप्येकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति। अन्तादिवद्भावेन व्यपवर्गः। उभयत आश्रये नान्तादिवत्। एवं तर्ह्येकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यपवर्गः। एवं

प्र०—परतोऽकारस्य कात्पूर्वस्येति व्यवहितस्यापि पूर्वत्वादित्त्वं प्रवर्तिष्यते। नैतदस्ति। रथकट्यादावप्येवं प्रसङ्गात्। किंच कात्पूर्वस्येति पूर्वग्रहणं कृतं न त्वापि पूर्वस्येति। ततश्च निर्दिष्टपरिभाषोपस्थानाव्यवधाने न प्राप्नोति। **तत्र वचनादिति**। आनन्तर्यमसंभवान्नाऽऽश्रीयते। **रथकट्येति**। रथानां समूह इतीनित्रकट्यचश्चेति कट्यच्। **गर्गकाम्येति**। गर्गमिच्छत्यात्मन इति काम्यच्प्रत्ययान्ताद् प्रत्ययादित्यकारप्रत्ययः। **येन नाव्यवधानमिति**। नाऽऽनन्तर्यं परित्यज्यते किंतु यावत्संभवति तावदाश्रीयते। यद्येवमेतिका इत्यत्र द्वाभ्यामकाराभ्यां व्यवधानादित्त्वं न प्राप्नोति। एकस्तसंबन्ध्यकारो द्वितीयस्त्यदादीनाम इत्यकारः। नैष दोषः। द्वयोरकारयोरेकादेशे कृते टापा सहैकादेशस्य स्थानिवद्भावादेकेनैवाकारेण व्यवधानं न पुनः स्थानिवत्त्वप्रतिपत्तिर्यतो द्वावकारौ व्यवधायकौ स्यातम्। सकृत्प्रवृत्त्यौ लक्षणस्य चरितार्थत्वात्। **व्यपवर्गाभावादिति**। वार्णादाङ्गं बलीय इत्येतदनाश्रित्योक्तम्। **उभयत इति**। आपि यः कशब्द इत्येवमुभयमाश्रीयते। अथ त्वापि परतोऽकारस्य कात्पूर्वस्येत्याश्र-

---

उ०—धानं तु वचनात्सोढव्यमेवेति भावः। **व्यवहितस्यापीति**। पूर्वग्रहणमुभयान्वयीत्यभिमानः। **कात्पूर्वस्येतीति**। तत्र पूर्वग्रहणं तु कटुकेत्यादौ परस्य कार्यित्वनिवृत्त्यर्थमावश्यकम्। **तसंबन्धीति**। तकारस्य संबन्धीत्यर्थः। **एकादेशे कृत इति**। अतो गुण इत्यनेन। **टापा सहेति**। टापा सहैकादेशस्य स्थानिवद्भावं विना पूर्वैकादेशस्य स्थानिवत्त्वं वक्तुमशक्यं तस्य टाबेकादेशेनापहारेणादर्शनादिति भावः। **न पुनरिति**। अकारयोरेकादेशस्येति भावः। **सकृत्प्रवृत्त्येति**। न यासयोरिति निषेधोऽप्यत्र एव चरितार्थः। **अनाश्रित्येति**। भिन्नस्थानिकत्वादिति भावः। ननु युगपदुभयाश्रयण एव स निषेध इति तत्प्रत्या-

---

+ ४. २. ५१. + ३. १. ९; ३. ३. १०२.

तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामपीत्वामिति यदयं न यासयोः [४५] इति प्रतिषेधं शास्ति ।

ममकनरकयोरुपसंख्यानमप्रत्ययस्थत्वात् ॥ ४ ॥

ममकनरकयोरुपसंख्यानं कर्तव्यम् । मामिका+ नरिका× । किं पुनः कारणं न सिध्यति । अप्रत्ययस्थत्वात् ।

त्यक्त्यपोश्च प्रतिषिद्धत्वात् ॥ ५ ॥

त्यक्त्यपोश्चोपसंख्यानं कर्तव्यम् । दाक्षिणात्यिका÷ अहत्यिका * । किं पुनः कारणं न सिध्यति । प्रतिषिद्धत्वात् । उदीचामातः स्थाने यकपूर्वायाः [४६] इति प्रतिषिद्धत्वात् ।

न यासयोः ॥ ७ । ३ । ४५ ॥

न यंत्तदोरिति वक्तव्यम् । इहापि यथा स्यात् । यकां यकामधीते । तकां तकां पचामह इति ।

प्रतिषेधे त्यकन उपसंख्यानम् ॥ १ ॥

प्रतिषेधे त्यकन उपसंख्यानं कर्तव्यम् । उपत्यका अधित्यका+ । तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । आचार्यप्रवृत्तिर्ज्ञापयति नैवंजातीयकानामित्वं

प्र०—यिष्यते तथाऽप्युभयमेवाऽऽश्रितं तुल्यकालं भवति । **एवंजातीयकान्नामिति** । प्रकारवचने जातीयरप्रत्ययः । अकज्ञतामित्यर्थः । **मामिकेति** । ममायं युष्मदस्मदोरन्यतरस्यां खञ्चेत्यन्यतरस्यां ग्रहणात्प्राग्दीव्यतोऽणित्यण् । तवकममकावेकवचन इति ममकादेशः । केवलमामकेत्यनेन संज्ञाछन्दसोर्ङीपो नियमादन्यत्र टाप् । नरं कायतीति नरिका । **दाक्षिणात्यिकेति** । दक्षिणस्मिन्देशे दक्षिणादाच् तत्र भवा दाक्षिणापश्चात्पुरसस्त्यगिति त्यक् । अज्ञाताद्यर्थविवक्षायां कः । इह भवेहत्यिका । अव्ययात्त्यप । पूर्ववत्कः । उदीचामात इति पाक्षिकप्रतिषेधप्रसङ्गे वचनम् ।

न या० । या सेति प्रथमैकवचनान्तयोरुपादानाद्विभक्त्यन्तरे प्रतिषेधाप्रसङ्गादाह— **यत्तदोरिति** । **उपत्यकेति** । उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन् । **नैषंजातीयकानामिति** । येऽनेकाचो व्यञ्जनादयः प्रत्ययाः संज्ञाविषयास्तेषामित्यर्थः ।

उ०—ख्यानपरानेकः प्रेष्योऽविरोधार्थी युगपदुभयोः करोतीति भाष्याल्लभ्यतेऽत आह— **तुल्यकालमिति** । तुल्यकालमेवोभयमाश्रितमित्यन्वयः । आपूककारश्च युगपदकारविशेषणत्वेनाऽऽश्रिताविति भावः ।

न यासयोः । **यत्तदोरिति** । सूत्रे स्वरूपं न विवक्षितमिति तात्पर्यम् । संज्ञाविषया इत्यस्य प्रयोजनं चिन्त्यम् । ननु लुकः पूर्वमन्तरङ्गत्वादित्त्वमत आह—

+ ४. ३. ३ × ३. २. ३ — ४. २. ९८; ५. ३. ७३. * ४. २. १०४; ५ ३. ७३
+ ५. २. ३४.

भवतीति यदयं मृदस्तिकन् [५. ४. ३९] इतीत्वभूतं निर्देशं करोति ।

पावकादीनां छन्दस्युपसंख्यानम् ॥ २ ॥

पावकादीनां छन्दस्युपसंख्यानं कर्तव्यम् । हिरण्यवर्णाः शुचयः पावकाः । क्षिपकाः अलोमकाः । छन्दसीति किमर्थम् । पाविका अलोमिका ।

आशिषि च ॥ ३ ॥

आशिषि चोपसंख्यानं कर्तव्यम् । जीवताज्जीवका । नन्दतान्नन्दका । भवताद्भवका+ ।

उत्तरपदलोपे च ॥ ४ ॥

उत्तरपदलोपे चोपसंख्यानं कर्तव्यम् । देवदत्तिका देवका । यज्ञदत्तिका यज्ञका× ।

क्षिपिकादीनां च ॥ ५ ॥

क्षिपकादीनां चोपसंख्यानं कर्तव्यम् । क्षिपका ध्रुवका ध्रुवका ।

प्र०—**यदयमिति** । ननु च तद्धितलुगर्थमिकारोच्चारणं स्यात् । अन्यथा पञ्चभिर्मृत्तिकाभिः क्रीत इत्यार्हादिति ठकोऽध्यर्धपूर्वेति लुकि कृते लुप्तद्धितलुकीति टापो लुकि निमित्ताभावादित्त्वं न स्यात् । **पञ्चमृत्तिक इति** । अन्तरङ्गांश्च विधीन्सर्वो लुग्बाधते न सुब्लुगेव । तथा च सनीस्रंस इत्यादौ नलोपो न भवति । पञ्चभिः खट्वाभिः क्रीतं पञ्चखट्वमित्यादौ टापा सहैकादेशो न भवति । अन्यथैकादेशस्याऽऽदिवद्भावादाब्ग्रहणेन ग्रहणाल्लुकि कृतेऽकारस्य श्रवणं न स्यात् । तदेवं सति प्रयोजने न ज्ञापकमिकारोच्चारणमिति चिन्त्यमेतत् । त्यिकन्निति प्रक्रियालाघवाय स्त्रीविषयत्वाद्वक्तव्ये त्यकन्नित्यकारोच्चारणमित्त्वाभावस्य न ज्ञापकम् । पञ्चभिरुपत्यकाभिः क्रीतं पञ्चोपत्यकमित्यादौ तद्धितलुक्यकारश्रवणार्थत्वात्तस्य । पुनन्ति पावयन्तीति वा पावकाः । **जीवकेति** । आशिषि चेति वुन् । **देवकेति** । अनजादौ च विभाषा लोपो वक्तव्य इति दत्तशब्दस्य लोपः । **क्षिपकेति** । क्षिपेरिगुपधत्वात्के कृतेऽज्ञातादिषु कः । अथवा क्वुन्शिल्पिसंज्ञयोरिति क्वुन् । **ध्रुवकेति** । ध्रु गतिस्थैर्ययोः । **धुवकेति** । धू विधूनने । **वर्णकेति** । वर्ण-

---

उ०—**अन्तरङ्गांश्चेति** । **चिन्त्यमेतदिति** । वस्तुतो भाष्यप्रामाण्यादेतद्विषयेऽन्तरङ्गानपीत्यस्य ज्ञापकसिद्धस्यासार्वत्रिकत्वेनानित्यत्वमङ्गीकार्यमस्यानभिधानं चेत्याहुः । स्त्रीविषयत्वात्प्रक्रियालाघवाय त्यिकन्निति व्यक्तव्य इत्यन्वयः । **पुनन्ति पावयन्तीति वेति** । अर्थद्वयस्याप्युपलम्भादिति भावः । **ध्रु गतीति** । पचाद्यचि कुटादित्वाद्गुणाभावेऽज्ञा-

---

+ ३. १. १५०. × ५. ३. ८३.

तारका ज्योतिषि ॥ ६ ॥

तारका ज्योतिष्युपसंख्यानं कर्तव्यम् । तारका । ज्योतिषीति किमर्थम् । तारिका दासी ।

वर्णका तान्तवे ॥ ७ ॥

वर्णका तान्तव उपसंख्यानं कर्तव्यम् । वर्णका । तान्तव इति किमर्थम् । वर्णिका भागुरी लोकायतस्य ।

वर्तका शकुनौ प्राचाम् ॥ ८ ॥

वर्तका शकुनौ प्राचामुपसंख्यानं कर्तव्यम् । वर्तका शकुनिः । शकुनाविति किमर्थम् । वर्तिका भागुरी लोकायतस्य । प्राचामिति किमर्थम् । वर्तिका ।

अष्टका पितृदेवत्ये ॥ ९ ॥

अष्टका पितृदेवत्य उपसंख्यानं कर्तव्यम् । अष्टका । पितृदेवत्य इति किमर्थम् । अष्टिका* खारी ।

वा सतकापुत्रकावृन्दारकाणाम् ॥ १० ॥

वा सूतकापुत्रकावृन्दारकाणामुपसंख्यानं कर्तव्यम् । सूतका सूतिका । पुत्रका पुत्रिका । वृन्दारका वृन्दारिका ।

प्र०—यति महत्त्वादिकं गुणमिति वर्णका प्रावरणविशेषः । तन्तूनां विकारस्तान्तवम् । ओरञित्यञ् । **वार्णिकेति** । व्याख्यात्रीत्यर्थः । भागुरी टीकाविशेषः । **अष्टकेति** । इष्यशिभ्या तकन्निति तकन् । पितरश्च देवताः पितृदेवताः । तदर्थं कर्म पितृदेवत्यम् । देवतान्तात्तादर्थ्ये यदिति यत् । **अष्टिकेति** । अष्टौ परिमाणमस्याः संख्याया अतिशदन्तायाः कन्निति कन् । **सूतकेति** । न सामिवचन इति प्रतिषेधाज्ञापकात्स्वार्थे कन् । **पुत्रिकेति** । पुत्रशब्दाच्छार्ङ्गरवादित्वान्ङीन्प्रत्ययस्ततः स्वार्थे कन् । केऽण इति ह्रस्वस्तस्य पक्षेऽकारो विधीयते । **वृन्दारिकेति** । वृन्दमस्या अस्ति । शृङ्गवृन्दाभ्यामारकन्प्रत्ययो वक्तव्य इत्यारकन् ।

उ०—तादिषु कः कवुन्वा । **वर्णयतीति** । स्वगतं गुणं प्रकाशयतीत्यर्थः । **व्याख्यात्रीति** । लोकायतशास्त्रस्य व्याख्यानरूपो ग्रन्थविशेष इत्यर्थः । वर्तिका भागुरीत्यत्रापि वर्तिकेत्यस्य व्याख्यात्रीत्यर्थः । **इष्यशिभ्यामिति** । अश्नन्ति ब्राह्मणा अस्यामित्यर्थः । **स्वार्थे कन्निति** । सूतैव सूतकेत्यर्थः । यावादित्वादित्यन्ये । **पुत्रशब्दादिति** । वार्तिके पुत्रकेत्यकारमध्यपाठोऽपपाठः । कैयटविरोधात् । **अकार इति** । वा अ इति च्छेदेनेत्यर्थः । सूतकादौ त्वित्त्वबाधनार्थ एव पक्षेऽकार इति बोध्यम् ।

---

* ५. १. २२.

उदीचामातः स्थाने यकपूर्वायाः ॥ ७ । ३ । ४६ ॥

किमर्थं स्त्रीलिङ्गनिर्देशः क्रियते न यकपूर्वस्येत्येवोच्येत । स्त्रीविषयो य आकारस्तस्य स्थाने योऽकारस्तस्य प्रतिषेधो यथा स्यात्। इह मा भूत् । शुभं यातीति शुभंयाः शुभंयिका+ । भद्रंयिका ।

यकपूर्वे धात्वन्तप्रतिषेधः ॥ १ ॥

यकपूर्वे धात्वन्तप्रतिषेधो वक्तव्यः । किं प्रयोजनम्। सुनयिका अशोकिका अपाकिका ।

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ॥ ७ । ३ । ४७ ॥

एषाद्वे नञ्पूर्वे अनुदाहरणे असुप इति× प्रतिषेधात् ।

अथ भस्त्राग्रहणं किमर्थं नाभाषितपुंस्कादित्येव सिद्धम्÷ ।

भस्त्राग्रहणमुपसर्जनार्थम् ॥ १ ॥

उपसर्जनार्थोऽयमारम्भः । अभस्त्रिका अभस्त्रका ।

प्र०— उदीचां० । **स्त्रीविषय इति** । अर्थगतं स्त्रीत्वं शब्द आरोप्य निर्देशः कृतः । **शुभंयिकेति** । शुभं याति भद्रं यातीति क्विप् । शुभंभद्रंशब्दौ निपातौ । अज्ञाताद्यर्थविवक्षायां कः । केऽण इति ह्रस्वः । **यकपूर्व इति** । धात्वन्ताभ्यां यकारककाराभ्यां परस्याऽऽतः स्थानेऽकारस्येत्त्वप्रतिषेधस्य प्रतिषेधस्तेनेत्त्वं भवत्येव । शोभनो नयोऽस्याः सुनया । नास्ति शोकोऽस्या अशोका । पूर्ववत्कः ।

भस्त्रै० । पाक्षिकप्रतिषेधार्थ आरम्भः । **एषाद्वे इति** । न एषका न द्वके इति विगृह्यान्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इत्यकृतेषु त्यदाद्यत्वादिषु समासे कृते सुब्लुकि समासाद्या विभक्तिस्तस्यां त्यदाद्यत्वं ततष्टाप् । स च प्रत्ययलक्षणेन सुबन्ताभ्यां पर इत्यसुप इतीत्त्वप्रतिषेधस्य व्यापारादनेषका इत्येव भवति । तस्मादनञ्पूर्वयोरेवैतयोः पाक्षिकप्रतिषेधः । **एषका एषिका द्वके द्विके इति** । एषेति प्रथमैकवचननिर्देशादन्यत्र नित्यमित्त्वमेतिकाश्चरन्तीति । **अभस्त्रिकेति** । नास्ति भस्त्रा

उ०— उदीचा० । स्त्रीलिङ्गनिर्देशमात्रेण कथमाकारस्य स्त्रीविषयत्वं लभ्यतेऽत आह—**अर्थगतमिति** । धात्वन्तशब्देन तथाभूतौ यकारककारौ लक्ष्येते इत्याह—**धात्वन्ताभ्यामिति** ।

भस्त्रैषा० । नित्येत्त्वस्य प्रत्ययस्थादित्येव सिद्धेः सूत्रारम्भफलमाह—**पाक्षिकेति** । उदीचामित्यनुवर्तनादिति भावः । **प्रत्ययलक्षणेनेति** । अन्तर्वर्तिसुब्लुक इति शेषः । भाष्ये नञ्पूर्वे इत्युपलक्षणम् । सपूर्वेऽनुदाहरणे इत्यस्यार्थस्य तुल्यन्यायात्तेन परमैषिकेत्येवेत्यादि बोध्यम् । **प्रथमैकवचनेति** । अत एवैषाद्वे नञ्पूर्वे अनुदाहरणे इति भाष्य एषेत्येवोक्तम् । अविवक्षितत्व एतद्द्वीत्येव वदेदिति बोध्यम् । **नास्ति भस्त्रेति** ।

+ ५. ३. ७३; ७. ४. १३ × ७. ३. ४४. ÷ ७. ३. ४८.

नञ्पूर्वग्रहणानर्थक्यं चोत्तरपदमात्रस्येद्वचनात् ॥ २ ॥

नञ्पूर्वग्रहणं चानर्थकम् । किं कारणम् । उत्तरपदमात्रस्येद्वचनात् । **उत्तर-**पदमात्रस्येत्त्वं वक्तव्यम् । निर्भस्त्रिका निर्भस्त्रिका । **बहुभस्त्रिका बहुभस्त्रिका ।**

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

ठस्येकः ॥ ७ । ३ । ५० ॥

किमिदं ठादेशे वर्णग्रहणमाहोस्वित्संघातग्रहणम् । कश्चात्र विशेषः ।

ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधः ॥ १ ॥

ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधो वक्तव्यः । पठिता पठितुम् । अस्तु तर्हि संघातग्रहणम् ।

संघातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेधः ॥ २ ॥

संघातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेधो वक्तव्यः । उणादीनां तावत्

प्र०—अस्या इति बहुव्रीहावुपसर्जनह्रस्वत्वे कृते यष्टावुत्पद्यते स भाषितपुंस्कादभस्त्रशब्दात्पर इत्युत्तरसूत्रेण पाक्षिकप्रतिषेधाप्रसङ्गाद्भस्त्राग्रहणम् । **नञ्पूर्वग्रहणानर्थक्यमिति** । अपिग्रहणेन केवलानां समुच्चयादन्यपूर्वाणामप्रसङ्गान्न कर्तव्यं नञ्पूर्वग्रहणम् । तत्र पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च ग्रहणात्सर्वेष्टसिद्धिः ।

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ।

ठस्येकः । **किमिदमिति** । किं व्यञ्जनमात्रं प्रतिपिपादयिषितमागन्तुना सूत्रकारणार्थेनाकारेण निर्देशोऽथ संघात एव स्थानी निर्दिष्ट इति प्रश्नः । **धात्वन्तप्रतिषेध इति** । संघातग्रहणे त्वेष न दोषः पठतीत्यत्रापि ठस्याऽऽनर्थक्यादर्थवद्-

---

उ०—एतेनानुपसर्जनेऽप्यादाचार्याणामित्यात्वबाधनार्थं भस्त्राग्रहणमित्यपास्तम् । उपसर्जने चारितार्थ्येन बाधे मानाभावात् । नञ्पूर्वग्रहणाकरणे दोषमाह—**अन्यपूर्वाणामप्रसङ्गादिति** । अथापिग्रहणेन केवलानामन्यपूर्वाणां च संग्रहस्तथाऽपि न कार्यमेवेत्याह—**तत्र पदाङ्गेति** । भाष्य **उत्तरपदमात्रस्येत्त्वं वक्तव्यमिति** । उत्तरपदमात्रस्य यथेत्त्वं भवति तथा तद्व्याख्येयमित्यर्थः ॥

इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

ठस्येकः । ननु विशिष्टोच्चारणात्संशयोऽयुक्तोऽत आह—**किं व्यञ्जनेति** । लक्षणयेति भावः । ननु पठतीत्यत्र ठशब्दोऽस्त्येवेत्यत आह—**आनर्थक्यादिति** । ननु वर्णग्रहणेऽप्यानर्थक्यं तुल्यमत आह—**वर्णग्रहणेति** । नन ठगादिषु संघातस्योपल-

कण्ठः वण्ठः शण्ठः। इह च मथितं पण्यमस्य माथितिक इत्यकारलोपे कृते तान्तादिति कादेशः प्राप्नोति+। वर्णग्रहणे पुनः सत्यल्विधिरयं भवति÷।

तस्माद्विशिष्टग्रहणम् ॥ ३ ॥

तस्माद्विशिष्टस्य ठकारस्य ग्रहणं कर्तव्यम्। न कर्तव्यम्। अस्तु तावद्वर्णग्रहणम्। ननु चोक्तं ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेध इति। नैष दोषः। अङ्गादिति वर्तते। न वा अङ्गादिति पञ्चम्यस्ति। एवं तर्हि

प्र०—ग्रहणपक्षे च ठगांद्यकार उच्चारणार्थो वर्णमात्रं प्रत्ययः। **कण्ठ इति**। कण्ठेष्ठः। **शण्ठ इति**। शमेर्जनिदाच्युस्निति ठः। **पण्ठ इति**। पणोऽन्येभ्योऽपि दृश्यत इति ठः। **वर्णपक्षेऽप्युणादीनां प्रसङ्गः**। सत्यपि संघातस्य प्रत्ययत्व इह च संघातग्रहणे ठगादयः संघाता एव प्रत्ययाः प्रतिज्ञायन्ते। **माथितिक इति**। संनिपातलक्षणपरिभाषामनाश्रित्य चोद्यते। अन्यथाऽजादिसंनिपातेन तान्ततोपजाता कथमजादिविघातनिमित्तं स्यात्। **वर्णग्रहणे त्वनल्विधाविति** स्थानिवत्त्वनिषेधादिकस्य कादेशाप्रसङ्गः। ननु तान्तादङ्गात्परस्य ठस्य कादेशो विधीयते। नचैतत्तकारान्तमङ्गम्। तकारान्तात्प्रत्ययस्याविधानात्। नैतदस्ति। एकदेशविकृतस्यानन्यत्वादङ्गं भवति तकारान्तं चेति कादेशः प्राप्नोत्येव। **तस्माद्विशिष्टग्रहणमिति**। तद्धितस्य ठादेरिक इति कर्तव्यम्। एवं च माथितिक इत्यत्र ठादेरिति वचनादल्विधित्वात्स्थानिवद्भावात्कादेशस्याप्रसङ्गः। **अङ्गादिति वर्तत इति**। अर्थवशाद्विभक्तिविपरिणाम इति भावः। **एवं तर्हीति**। सामर्थ्यात्षष्ठ्यन्तमूह्यते। इतरो न क्वचित्षष्ठ्यन्तं प्रकृतमिति

उ०—ध्वेस्तेषामिहानुकृतत्वाद्वर्णग्रहणपक्षानुपपत्तिरत आह—**वर्णग्रहणपक्षे चेति**। अत एवात्र पक्षेऽङ्गनिमित्तं यदकार इति वक्ष्यमाणं भाष्यं संगच्छते। **वर्णपक्षेऽप्युणादीनामिति**। ठस्य सद्भावादिति भावः। ननु ठगादिषु वर्णमात्रस्य प्रत्ययत्वात्कथमत्र संघातग्रहणमत आह—**इह चेति**। विशिष्टपदार्थमाह—**तद्धितस्येत्यादि**। (× वस्तुतः रचितोकारविशिष्टं पठनीयमित्यर्थः। विशिष्टस्य ठकारस्य ग्रहणमिति भाष्यात्। माथितिकस्तु टकछसोरिति वार्तिकस्थभाष्योक्तरीत्या संनिपातपरिभाषया सिद्ध इति भाष्यार्थ उचित इति भाति। यद्वोणादिविषयमेवैतत्। माथितिके त्वग्रे परिहरिष्यत इति भावः)। अङ्गस्येत्यस्य प्रकृतत्वादङ्गादिति वर्तत इत्ययुक्तमत आह—**अर्थवशादिति**। धात्वन्तनिवृत्त्यर्थं पञ्चम्यन्तस्येहोपयोगादिति भावः। पञ्चम्यन्तस्य कथं षष्ठ्यन्तत्वमत आह—**सामर्थ्यादिति**। पञ्चम्यन्तस्यान्वयायोग्यत्वादिति भावः।

× धनुश्चिह्नान्तर्गतो ग्रन्थः ख. पुस्तकस्थः।

+ ४. ४. ५१; ७. ३. ५०; ६ ४. १४८; ७. ३. ५१. ÷ १. १. ५६.

प्रत्ययस्थस्येति वर्तते । क्व प्रकृतम् । प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः [७. ३. ४४] इति । तद्वै पञ्चमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । अर्थाद्विभक्तिविपरिणामो भविष्यति । तद्यथा । उच्चानि देवदत्तस्य गृहाणि । आमन्त्रयस्वैनम् । देवदत्तमिति गम्यते । देवदत्तस्य गावोऽश्वा हिरण्यम् । आढ्यो वैधवेयः । देवदत्त इति गम्यते । पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं द्वितीयानिर्दिष्टं च भवति । एवमिहापि पुरस्तात्पञ्चमीनिर्दिष्टं सदर्थात्षष्ठीनिर्दिष्टं भविष्यति । एवमप्युणादीनां प्रतिषेधो वक्तव्यः । न वक्तव्यः । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि । एवमपि कर्मठ इत्यत्र÷ प्राप्नोति । एवं तर्ह्यङ्गस्येति× संबन्धषष्ठी विज्ञास्यते । अङ्गस्य यष्ठकारः । किंचाङ्गस्य ठकारः । निमित्तम् । यस्मिन्नङ्गमित्येतद्भवति । कस्मिंश्चैतद्भवति । प्रत्यये । अथवा पुनरस्तु संघातग्रहणम् । ननु चोक्तं संघातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेध इति । उणादीनां तावत्प्रतिषेधो न वक्तव्यः । परिहृतमेतदुणादयोऽव्युत्पन्नानि प्रातिपदिकानीति । यदप्युच्यत इह च मथितं पण्यमस्य माथितिक इत्यकारलोपे कृते तान्तादिति कादेशः प्राप्नोतीति । नैष दोषः । अकारलोपस्य स्थानिवद्भावान्न भविष्यति । न सिध्यति । पूर्वविधौ स्थानिवद्भावो+ न चायं पूर्वविधिः । अयमपि पूर्वविधिः । पूर्वस्मादपि विधिः पूर्वविधिरिति । अथाप्युणादयो व्युत्पा-

प्र०—मत्वाऽऽह—**क्व प्रकृतमिति** । **अर्थादिति** । ठस्येति षष्ठ्यन्तेन संबन्धात्षष्ठ्यन्तत्वेन विपरिणामः । कर्मणि घटते कर्मणि घटोऽठजित्यठच् । अङ्गस्येति संबन्धषष्ठीत्वेनोपादानाद्विशिष्टो निमित्तनिमित्तिभावलक्षणः संबन्धो विवक्षितः । तेनाङ्गावयवस्याप्रसङ्गः । अङ्गव्यपदेशनिमित्तप्रत्ययग्रहणात्कर्मठ इति प्रत्ययावयवस्य न भवति । ननु समुदायस्य निमित्तत्वेनावयवस्यापि निमित्तत्वमाश्रीयते । तथा च चक्रतुः चक्रुरित्यत्र द्विर्वचननिमित्तेऽच्यजादेशः स्थानिवद्भवति । एवं तर्हि साक्षान्निमित्तमिह गृह्यते । स्थानिवत्त्वे तु लक्ष्यवशाद्यथाकथाचिन्निमित्तमाश्रीयते । **पूर्वस्मादपि विधिरिति** । संबन्धसामान्यवचनषष्ठ्यन्तस्य पूर्वशब्दस्य विधिशब्देन समास आश्रीयते । अथवा वर्णग्रहणात्तदन्तत्वे लब्धे तान्तादित्यन्तग्रहणं प्रत्ययोपदेशकाले तान्तग्रहणार्थमिति माथितिके कादेशाप्रसङ्गः । **अथापीति** । सर्पिषा यजुषेत्यादौ षत्वाद्यर्थं व्युत्पत्तिपक्षोऽप्यङ्गी क्रि-

उ०—अङ्गस्येति त्वङ्गावयवस्य प्रत्ययस्थस्य ठस्येत्यन्वययोग्यमेवेति तात्पर्यम् । **तेनाङ्गावयवस्येति** । पठितेत्यादावठचि परिहारमुपपादयति—**अङ्गव्यपदेशेति** । अतोऽप्युणादावदोष इति बोध्यम् । **साक्षादिति** । समुदायस्यैव मुख्यं निमित्तत्वमित्यर्थः । **अथवेति** । इसुसुगिति भिन्नं लुप्तपञ्चम्यन्तं पदं तान्तादिति भिन्नम् । तेन तकारेणैवान्तपदसंबन्ध

÷ ५. २. ३५ × ६. ४. ९. + १. १ ५७.

न्त एवमपि न दोषः । क्रियते न्यास एव विशिष्टग्रहणं ठस्येति ।

इसुसुक्तान्तात्कः ॥ ७ । ३ । ५१ ॥

इह कस्मान्न भवति । आशिषा× तरत्याशिषिकः+। उषा* तरत्यौषिकः। **लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति** । अथेह कथं भवितव्यम् । दोर्भ्यां तरति । दौष्क इति भवितव्यम् । कथम् । यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ।

हो हन्तेर्ञ्णिन्नेषु ॥ ७ । ३ । ५४ ॥

किमिदं ञ्णिन्नकारग्रहणं हन्तिविशेषणम्। ञ्णिन्नकारपरस्य हन्तेर्यो हकार

प्र०—यते । **क्रियते न्यास एवेति** । येषां ठशब्दानामिक इष्यते तेष्वकारः स्वरित उच्चारितस्तदनुकरणं स्वरितमेव ठस्येति । न चोणादिठस्याकारः स्वरित इत्यादेशाश्रयङ्गः ।

इसु० । **आशिषेति** । आङः शासिवच्छायामित्यस्मादाशासनमाशीरिति संपदादित्वाद्भावे क्विप् । आशासः क्वावुपसंख्यानमितीत्वम् । **उषेति** । वसेः क्विप् । वाचिस्वपीति संप्रसारणम् । षत्वस्यासिद्धत्वादिसुसौ भवत इति कादेशभ्रमङ्गः । **लक्षणेति** । लाक्षणिकमनुमेयरूपं प्रतिपदोक्तं तु प्रत्यक्षरूपम् । **अथेति** । दोष्क इति दृश्यते नच प्राप्नोतीति **प्रश्नः । दौष्क इति** । तरतीति ठक् । उपसंख्येयोऽत्र कादेश इति भावः। क्वचित्तु कथं यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पाठः । तत्र यदीति निपातो न संदेहार्थ उपात्तः किं तर्हि यदेत्यस्यार्थे वर्तते । ओकारे य उकारः स उकारग्रहणेन गृह्यते। यत्र च समुदायाश्रयं कार्यं नास्ति तत्रावयवाः स्वकार्यस्य प्रयोजका एव । तथा च नुडविधिलादेशविनामा ऋकारावयवाश्रयाः प्रवर्तन्ते । अग्रहणपक्षे तु यथा नुडविधिलादेशविनामेषु प्रतिविधीयते तथा दोष उपसंख्यानं कर्तव्यमिति संदेहार्थोऽपि यदिशब्दो व्याख्येयः ।

हो हन्तेः । किमिदमिति । हन्तिरपीहोपात्तो हकारोऽपि तत्र कि हकारस्य **प्राधान्याद्विशेषणसंबन्धोऽथ** प्रधानोपकाराय गुणस्यापि हन्तेः । पक्षद्वयेऽपि दोषदर्शनात्**प्रश्नः** । द्वंद्वनिर्दिष्टास्तु ञ्णिन्ना एकयोगक्षेमा न्याय्या इति भिन्नेन संबन्धिना

उ०—इति वायुदत्तशब्दाठचि दत्तशब्दलोपे वायुक इत्यादौ न दोषः । संनिपातपरिभाषयाऽपि माथितिके दोषवारणं प्रागुक्तं कथं यथान्यासे वारणं तदाह **येषामिति** ।

इसुसु० । **षत्वस्येति** । शासिवसिघसीनां चेत्यस्येत्यर्थः । ननु समुदाये गुणभूता अवयवाः कथं स्वकार्ये प्रवर्तेयुरत आह **यत्र समुदायेति** । **संदेहार्थ इति** । **पक्षान्तरे** परिहारस्यानुत्थानं दर्शयितुं संदेहार्थोऽपि यदिशब्दो व्याख्येय इत्यर्थः । वर्णैकदेशानां **वर्णग्रहणेन ग्रहणेऽप्यनर्थकत्वाद्**प्रत्ययत्वाच्च कथमस्य प्रवृत्तिरिति चिन्त्यम् । अत **एवास्य क्वाचित्कपाठता** कैयटेनोक्ता । दौष्क इणः ष इति षत्वम् ।

हो हन्तेः । प्राधान्यादिति । विशेष्यत्वात्कार्यान्वयित्वाच्चेत्यर्थः । **प्रधानोपकारायेति** । प्रधानस्य कुत्वस्य बहुविषयलाभरूपोपकारायेत्यर्थः । **द्वंद्वनिर्दिष्टास्त्विति** । सह-

---

× ६. ४. ३४. + ४. ४. ५. * ६. १. १५.

इति । आहोस्विद्धकारविशेषणम् । ञ्णिन्नकारपरस्य हकारस्य स चेद्धन्तेरिति । कश्चात्र विशेषः ।

हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः ॥ १ ॥

हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः । घ्नन्ति घ्नन्तु अघ्नन् । अस्तु तर्हि हकारविशेषणम् ।

हकारस्येति चेञ्ञ्णित्यप्राप्तिः ॥ २ ॥

हकारस्येति चेञ्ञ्णित्यप्राप्तिः । घातयति घातकः । किं कारणम् । नकारेण व्यवहितत्वान्न प्राप्नोति । वचनाद्भविष्यति । इहापि वचनात्प्राप्नोति । हननमिच्छति हननीयति हननीयतेर्ण्वुल् हननीयक इति ।

स्थानिवद्भावाच्चाचो नकारेऽप्रसिद्धिः ॥ ३ ॥

स्थानिवद्भावाच्चाचो नकारेऽप्रसिद्धिः । घ्नन्ति घ्नन्तु+। वचनाद्भविष्यति।

वचनप्रामाण्यादिति चेदलोपे प्रतिषेधः ॥ ४ ॥

वचनप्रामाण्यादिति चेदलोपे प्रतिषेधो वक्तव्यः । हन्ता हन्तुम् । नकारग्रहणसामर्थ्यादलोपे न भविष्यति । अस्त्यन्यन्नकारग्रहणस्य प्रयोजनम् । किम् । श्रूयमाणविशेषणम् । यत्र नकारः श्रूयते तत्र यथा स्यात् । इह मा भूत् । हतः हथ इति× ।

सिद्धं तूपधालोप इति वचनात् ॥ ५ ॥

प्र०–संबन्धं प्रतिपत्तुमनर्हा ञ्णिति हन्तेर्नकारे हकारस्येति । **हन्तेरिति** । स्वावयवेन पौर्वापर्ययोगात् । **ञ्णित्यप्राप्तिरिति** । तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्धकारस्य च ञ्णितोऽनन्तर्यासंभवात् । **वचनादिति** । निर्दिष्टपरिभाषोपस्थानाद्येन नाव्यवधानमिति शब्दान्तरव्यवायो निवर्त्यते । इतरस्तु व्यवधानसंभवान्निर्दिष्टाङ्गविकलपरिभाषोपस्थान मत्वाऽऽह—**इहापीति** । **स्थानिवद्भावाच्चाच इति** । अचो य आदेशो लोपस्तस्येत्यर्थः । **नकारग्रहणेति** । सर्वत्र व्यवहितो नकारो हकारात्पर इति नकारग्रहणसामर्थ्याद्ञ्णिद्ग्रहणसामर्थ्याच्च श्रुतिकृतमानन्तर्यमाश्रयिष्यते । **सिद्धं त्विति** । नकारग्रहणमपनीयोपधालोपग्रहणं कर्तव्यम् । **वचना-**

उ०–विवक्षायां द्वंद्वेन तन्निर्दिष्टानां तुल्यतयैकत्र संबन्धस्य न्याय्यत्वादित्यर्थः । **स्वावयवेनेति** । भिन्नवस्तुविषयत्वात्पौर्वापर्यव्यवहारस्येत्यर्थः। ननु वचनसामर्थ्याद्व्यवधानेऽपि प्रवृत्तावतिप्रसङ्गः स्यादत आह— **निर्दिष्टेति** । नन्वजादेशस्य स्थानिवत्त्वं न त्वच इत्यत आह— **अचो य इति** । **ञ्णिद्ग्रहणसामर्थ्याच्चेति** । सर्वत्र नकारपरत्वादेव सिद्धेस्तद्वैयर्थ्यमिति भावः । घातयतीत्यादावप्यन्तरङ्गत्वात्पूर्वं कृत्वं ततस्तत्वमिति तात्पर्यम् । ननु सत्यपि

सिद्धमेतत् । कथम् । उपधालोपे चेति वक्तव्यम् । सिध्यति सूत्रं तर्हि भिद्यते ।

यथान्यासमेवास्तु । ननु चोक्तं हन्तेस्तत्पुरस्येति चेन्नकारेऽप्रसिद्धिरिति । वचनाद्भविष्यति । अथवा पुनरस्तु हकारविशेषणम् । ननु चोक्तं हकारस्येति चेक्त्रिण्यप्राप्तिरिति । वचनाद्भविष्यति । ननु चोक्तमिहापि वचनात्प्राप्नोति हननीयक इति । नैष दोषः । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । न च क्वचिद्धात्ववयवेनाव्यवधानमेतेन पुनः संघातेन व्यवधानं भवति न च भवति । यदप्युच्यते स्थानिवद्भावाच्चानो नकारेऽप्रसिद्धिरिति । वचनाद्भविष्यति । ननु चोक्तं वचनप्रामाण्यादिति चेदलोपे प्रतिषेध इति । नैष दोषः । आनन्तर्यमिहाऽऽश्रीयते हकारस्य नकार इति । क्वचिच्च संनिपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं क्वचिच्च न संनिपातकृतं नापि शास्त्रकृतम् । लोपे संनिपातकृतमानन्तर्यमलोपे नैव संनिपातकृतं नापि शास्त्रकृतम् । यत्र कुतश्चिदेवाऽऽनन्तर्यं तदाश्रयिष्यामः ।

अभ्यासाच्च ॥ ७ । ३ । ५५ ॥

अभ्यासात्कुत्वमसुपः ॥ १ ॥

प्र०—द्भविष्यतीति । एकग्रहणकवाक्यनिबन्धनानि बहूनि वाक्यानि लक्ष्यस्य संस्कारकाण्युपप्लवन्ते, हो हन्तेर्ञिति, हो हन्तेर्णिति, हो हन्तेर्न इति । सह विवक्षायां द्वंद्वेऽपि यथासंभवं विशेषणविशेष्यभाव इति ञिता णिता च हन्तिर्विशेष्यते नकारेण हकारः । **येन नाव्यवधानमिति** । तस्मिन्निति निर्दिष्ट इति परिभाषोपस्थानेन धात्ववयवेन नित्यव्यवायाच्छब्दान्तरेण व्यवधानं निवार्यते । **वचनादिति** । सत्यपि स्थानिवद्भावकृते व्यवधाने श्रुतिकृतानन्तर्याश्रयणात् । **नापि शास्त्रकृतमिति** । यथा—आमन्त्रितं पूर्वमविद्यमानवदित्युक्तं तथाऽकारस्य शास्त्रेणाव्यवधायकत्वं न क्वाचित्प्रतिपादितमित्यर्थः । **कुतश्चिदिति** । निर्दिष्टपरिभाषोपस्थानात् ।

अभ्या० । **असुप इति** । असुबन्तावयवस्य हन्तेरभ्यासात्परस्य कुत्वं नतु सुबन्तावयवस्येत्यर्थः । **हन्तेरभ्यासादिति** । अङ्गाधिकारेण चाभ्यासेन च प्रत्ययस्याऽऽक्षेपादभ्यास-

---

उ०—वचने स्वावयवेन पौर्वापर्याभावादप्रतिपत्तिरत आह—**एकग्रहणकेति** । **सहविक्षायां द्वंद्वेऽपीति** । हो हन्तेरिति समुदायविषयान्वयेन स साधुरिति भावः । सौत्रो द्वंद्व इत्यन्ये । **श्रुतिकृतेति** । सामर्थ्यादिति भावः । भाष्ये न शास्त्रकृतमानन्तर्यमिति पाठः । क्व पुनः शास्त्रकृतमानन्तर्यमत आह—**यथेति** । अत्र ह्यविद्यमानवद्भावाच्छ्रौतव्यवधानेऽपि शास्त्रकृतमव्यवधानं न तथेह तथा शास्त्राभावादित्यर्थः ।

अभ्यासाच्च । नन्वभ्यासस्य क्वापि सुबन्तत्वाभावादसुप इति व्यर्थमत आह—**असुबन्तेति** । जिहननीयिषतीत्यत्र सुबन्तात्क्यङ्विधानेन सुबन्तावयवो हन्तिरित्यर्थः । आचा-

अभ्यासात्कुत्वमसुप इति वक्तव्यम् । इह मा भूत् । हननमिच्छति हननीयति हननीयतेः सन् जिहननीयिषतीति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । हन्तेरभ्यासादित्युच्यते न चैष हन्तेरभ्यासः । हन्तेरेषोऽभ्यासः । कथम् । एकाचो द्वे प्रथमस्य [६. १. १] इति । एवं तर्हि हन्तेरङ्गस्य योऽभ्यासस्तस्मादित्युच्यते । न चैष हन्तेरङ्गस्याभ्यासः । हन्तेरङ्गस्यैषोऽभ्यासः । कथम् । एकाचो द्वे प्रथमस्येति । एवं तर्हि यस्मिन्हन्तिरङ्गं तस्मिन्योऽभ्यासस्तस्मादित्युच्यते यस्मिंश्चात्र हन्तिरङ्गं× न तस्मिन्नभ्यासो यस्मिंश्चाभ्यासो+ न तस्मिन्हन्तिरङ्गं भवति ।

प्र०—निमित्ते प्रत्यये हन्तेरङ्गस्य योऽभ्यासस्तस्मात्कुत्वमिति भावः । इतरस्त्वगृहीताभिप्राय आह—**हन्तेरिति** । पूर्वोक्तेनाभिप्रायेणाऽऽह—**हन्तेरङ्गस्येति** । तथा चोक्तं सिद्धं तु परस्परं प्रत्यङ्गप्रत्ययसंज्ञाभावादिति । **न चैष हन्तेरङ्गस्येति** । अभ्यासनिमित्ते प्रत्यये हन्तिरत्र नाङ्गमित्यर्थः । इतरोऽङ्गमात्रमाश्रित्याऽऽह—**हन्तेरिति** । आचार्यः स्वाभिप्रायं प्रकाशयति—**एवं तर्हीति** । यथा जघनिथेति थलि हन्तिरङ्गं तस्मिन्नेव चाभ्यासः ।

उ०—रक्तिबाख्यानण्यन्तेभ्यः सनादिकमनभिधानान्नास्त्येवेति भावः । तत्र कुत्व इष्टापत्तिस्तु न । वक्ष्यमाणप्रत्याख्यानविरोधात् । ननु हन्तेरेवायमभ्यासोऽत आह - **अङ्गाधिकारेण चेति** । **अभ्यासनिमित्ते प्रत्यय इति** । प्रत्यासत्त्येति भावः । अङ्गेन प्रत्ययाक्षेपे बीजमाह— **तथा चोक्तमिति** । अङ्गस्येत्यत्र । अत एवास्याङ्गाधिकारे पाठश्चरितार्थः । नन्वङ्गाधिकारपाठाभावेऽप्यभ्यासेन स्वघटितसमुदायस्य प्रत्ययान्तत्वाक्षेपे तत्र प्रत्ययस्य प्रकृत्याकाङ्क्षायां प्रत्यासत्त्योपस्थितत्वेन हन्तेरेव संबन्धेन जिहननीयिषतीत्यादौ नातिप्रसङ्गः । स्पष्टा चेयं रीतिर्हूर्वः संप्रसारणमभ्यस्तस्येत्यत्र कैयट इति चेन्न । शब्दानुपस्थितप्रत्ययाक्षिप्तप्रकृतेः शाब्दबोधविषयत्वे मानाभावात् । अत्र चैवमादीनामङ्गाधिकारपाठ एव ज्ञापकः । (परे× त्वत्र प्रत्ययाक्षेपस्य नोपयोगः । हन्तेरङ्गावयवस्य योऽभ्यास इत्यर्थेऽङ्गाभ्यासयोर्द्वयोरपि शास्त्रेण निमित्तत्वग्रहात्प्रत्यासत्त्याऽङ्गसंज्ञानिमित्तनिमित्तकाभ्यासस्यैव ग्रहणमिति भाष्यार्थमाहुः) । अङ्गसंज्ञायास्तु कार्यकालत्वेन तद्विधायकैकवाक्यतया तन्निमित्तप्रत्ययस्य शब्दादुपस्थित्या प्रत्यासत्त्या च तयोरेकत्व एव शास्त्रप्रवृत्त्या न दोषः । भाष्ये—**यस्मिंश्चाभ्यास इति** । यन्निमित्तद्वयोः पूर्वोऽभ्यास इत्यर्थः । लिडादेः सप्तम्यन्तपदेनैव द्वित्वं प्रति निमित्तत्वबोधनात्तदभिप्रायेण भाष्ये सप्तमीनिर्देशः । विषयसप्तमी वा ।

× धनुश्चिह्नार्गतो ग्रन्थः ख. पुस्तकस्थः ।

× ३. ३. ११५. + ३. °. ७.

हेरचङि ॥ ७ । ३ । ५६ ॥

अचङीति किमर्थमप्राजीहयद्दूतम् ।

हेश्चङि प्रतिषेधानर्थक्यमङ्गान्यत्वात् ॥ १ ॥

हेश्चङि प्रतिषेधोऽनर्थकः । किं कारणम् । अङ्गान्यत्वात् । ण्यन्तेमेतद्ङ्गमन्यद्भवति । लोपे* कृते नाङ्गान्यत्वम् । स्थानिवद्भावादङ्गान्यत्वमेव ।

ज्ञापकं त्वन्यत्र ण्यधिकस्य कुत्वविज्ञानार्थम् ॥ २ ॥

एवं तर्हि ज्ञापयत्याचार्योऽन्यत्र ण्यधिकस्य कुत्वं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । प्रजिघाययिषतीत्यत्र कुत्वं सिद्धं भवति ।

सन्लिटोर्जेः ॥ ७ । ३ । ५७ ॥

जिग्रहणे ज्यः प्रतिषेधः ॥ १ ॥

जिग्रहणे ज्यः× प्रतिषेधो वक्तव्यः । जिज्यतुः जिज्युरिति । स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवमेतस्य न भविष्यति । सा तर्ह्येषा परिभाषा कर्तव्या । अवश्यं कर्तव्या अध्याप्य गत इत्येवमर्थम्÷ ।

न क्वादेः ॥ ७ । ३ । ५९ ॥

क्वाद्यजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात् ॥ १ ॥

प्र०— **हेरचङि** । **अचङीति किमर्थमिति** । यस्मिन्हिनोतिरङ्गं तस्मिन्नभ्यासे विज्ञायमाने णौ हिनोतिरङ्गं चङ्यभ्यास इति कुत्वं न भविष्यतीति मत्वा प्रश्नः । **अन्यत्रेति** । सनादावित्यर्थः ।

सन्लिटोः । **जिज्यतुरिति** । ज्या वयोहानौ । लिट्यतुसि ग्रहिज्यादिसूत्रेण संप्रसारणे कृते पूर्वैकादेशे च यद्यपि हल इति दीर्घत्वं क्रियते तथाऽप्येकदेशविकृतस्यानन्यत्वाद्यथा जयतेर्जिगीषतीत्यत्र कुत्वं भवत्येवं जिनातेः प्राप्नोति । **अध्याप्येति** । विभाषाऽऽप इंत्यस्यादेश इङादेशात्पुगन्तात्परस्य णेर्न भवति ।

न क्वादेः । **क्वाद्यजीति** । चजोः कुघिण्ण्यतोर्निष्ठायामनिट इति वक्तव्यम् । तेनैव क्वाद्यजा

उ०— **हेरचङि** । **यस्मिन्हिनोतिरिति** । पूर्वसूत्रोक्तरीत्येत्यर्थः । कुत्वविज्ञानार्थमित्यनेन भाष्येणास्य कुत्वमात्रविषयता नान्यविषयतेति ध्वन्यते । **प्रजिघायय्रिषतीति** । एवमुत्तरसूत्रविषये प्राजिगायय्रिषतीत्यपि बोध्यम् ।

सन्लिटोर्जेः । **यद्यपीति** । यद्यपि दीर्घात्परं कुत्वं तथाऽपि नित्यो दीर्घः प्रकृतिप्रत्ययसामान्यापेक्षत्वेनान्तरङ्गो वेति भावः । **इङादेशादिति** । इङः क्रीङ्जीनामित्यात्वे ' अर्तिह्री. ' इति पुकि यदाप् इति रूपं तस्मादित्यर्थः ।

न क्वादेः । **निष्ठायामनिट्त्वादिति** । उदितो वेति क्त्वायां विकल्पाद्यस्य विभा-

---

* ६. ४. ५१. × ६. १. १६; १०८. ÷ ६. ४. ५७.

क्राद्यजिव्रजियाचिरुचीनामप्रतिषेधः× । अनर्थकः प्रतिषेधोऽप्रतिषेधः । कुत्वं कस्मान्न भवति । निष्ठायामनिटः कुत्ववचनात् । निष्ठाया**मनिटः कुत्वं वक्ष्यामि** सेटश्चेते निष्ठायाम् । यदि निष्ठायामनिटः कुत्वमुच्यते कथं शोकः समुद्ग इति ।

शुच्युब्ज्योर्घञ्त्रि कुत्वम् ॥ २ ॥

शुच्युब्ज्योर्घञ्त्रि कुत्वं वक्तव्यम् । कथमर्कः ।

अर्चेः कविधानात्सिद्धम् ॥ ३ ॥

नैतदघञन्तम् । औणादिक एष कशब्दस्तस्मिन्नाष्टमिकं कुत्वम्* ।

प्र०–दीनां कुत्वनिवृत्तेः सिद्धत्वान्नार्थः प्रतिषेधेनेत्यर्थः । ननु ग्लुचुग्लुञ्चुकुजुखुजूनां निष्ठायामनिट्त्वादघिण्यतोः कुत्वं वार्तिककारमते प्राप्नोति । सूत्रकारमते तु न क्वादेरिति प्रतिषेधप्रसङ्गः । तथाऽर्जिसर्जितर्जीनां निष्ठाया सेट्त्वात्कुत्वाप्रसङ्गः । उच्यते । वार्तिककारस्य सूत्रकारात्प्रमाणतरत्वान्तन्मतेन तु कुत्वस्य भावाभावावेवगन्तव्यौ । नन्वस त्यजेः प्रतिषेधे वीत इति निष्ठायामनिट्त्वात्समाज इति कुत्व प्राप्नोति । नैतदस्ति । व्यादेशो निष्ठायामनिण्न त्वजि. । न च स्थानिवद्भावो निष्ठायामनिडिति लौकिके व्यपदेशेऽस्ति शास्त्रीयेष्वेव कार्येषु स्थानिवत्त्वात् । वलादावार्धधातुके विकल्प इष्यत इति वीभावाभावपक्षेऽजित इति निष्ठायामजिः सेडेव । कथमिति । शुच्युब्जी निष्ठाया सेटौ । ईशुचिर पूतीभाव इति यद्यपि निष्ठायामनिट् तथाऽप्यर्थभेदाश्रयः प्रश्न. । शुच्युब्जोर्घञ्त्रीति । यथान्यासेऽपि घञ्येव यथा स्याण्ण्यति मा भूदिति नियमाय वाच्यम् । तदेव न्यासभेदे विध्यर्थमिति भावः । यद्यपि गमेर्ड्व्युपसर्गाद्डप्रत्यये सति समुद्ग इति सिध्यति तथाऽप्युब्जेर्घञ्त्रि जकारनिवृत्तये कुत्वमभ्युपेयम् । औणादिक इति । कृदाधारार्चिकलिभ्यः कः । घिण्यतोस्त्वर्चोऽर्च्यमिति भवति ।

उ०–षेति निष्ठायामिण्निषेधादिति भावः । कुत्वाप्रसङ्ग इति । वार्तिककृन्मत इति शेषः । वार्तिककारस्येति । तस्य भाष्यकृता तदप्रत्याख्यानात् । भाष्यकारस्य चाज्ञानकल्पनापेक्षयैकस्य सूत्रकृतस्तत्कल्पना युक्तेति भावः । उक्तानुक्तदुरुक्तचिन्ताकरत्वं हि वार्तिककारत्वम् । स्थान्यादेशयोरभेदमाश्रित्य शङ्कते–नन्विति । समाज इति । समुदोरजः पशुष्विति पशुष्वपि(पृ)ततोऽन्यत्र हलश्चेति घञ् । भेदेनोक्तम् । न च स्थानिवद्भाव इति । इदं चिन्त्यम् । आदेशस्य तेन स्थानिवद्भावो नतु स्थानिन आदेशवद्भाव इति हेतोः । अतोऽत्रायमग्रन्थ इति बोध्यम् । निष्ठायामनिडिति । इवीदितो निष्ठायामिति प्रतिषेधादिति भावः । अर्थभेदेति । शुच शोक इत्यस्य न सिध्यतीत्यर्थः । ननु वचनेन परिहारे गौरवमत आह— यथान्यासेऽपीति । द्व्युपसर्गादिति । समुत्पूर्वादन्येष्वपि दृश्यत इति डः ।

---

१ ख स्तत्काले तावन्मात्रलक्ष्यस्मरणकल्प ।

भुजन्युब्जौ पाण्युपतापयोः ॥ ७ । ३ । ६१ ॥

भुजः पाणौ ॥ १ ॥

भुजः पाणाविति वक्तव्यम् । कथं न्युब्ज उपताप इति ।

न्युब्जेः कर्तृत्वादप्रतिषेधः ॥ २ ॥

अनर्थकः प्रतिषेधोऽप्रतिषेधः । कुत्वं कस्मान्न भवति । कर्तृत्वात् । नैतद्घञन्तम्+। कर्तृप्रत्यय एषः× । न्युब्जतीति न्युब्जः । आधिकरणसाधनो वै लक्ष्यते घञ् । न्युब्जिताः शेरतेऽस्मिन्न्युब्ज उपताप इति । एषोऽपि हि कर्तृसाधन एव । कथम् । न्युब्जयतीति न्युब्जः ।

यजयाचरुचप्रवच्चर्चश्च ॥ ७ । ३ । ६६ ॥

प्रवचिग्रहणमनर्थकं वचोऽशब्दसंज्ञाभावात् ॥ १ ॥

प्रवचिग्रहणमनर्थकम् । किं कारणम् । वचोऽशब्दसंज्ञाभावात् । वचोऽशब्द-

---

प्र०— **भुज०** । भुजेस्तौदादिकस्य रौधादिकस्य वा घञि गुणकुत्वनिषेधौ निपात्येते । **भुजः पाणाविति** । न्युब्जोपतापग्रहणं न कर्तव्यमित्यर्थः । लोके बाहौ भुजशब्दो भुजावयवत्वात्प्रयुज्यते । **कर्तृप्रत्यय इति** । पचाद्यच् । **न्युब्जतीति** । न्युब्जत्यस्मिन्नित्यधिकरणं प्रदर्शनीयम् । भाष्ये तु वस्तुमात्रं कथितम् । **एषोऽपीति** । यस्मिन्व्याधौ न्युब्जिताश्चेष्टारहिताः शेरते स व्याधिस्तान्न्युब्जयतीत्यच् । न चात्र घञचोः स्वरे विशेषः । आथादिसूत्रेणान्तोदात्तत्वविधानात् । भुजशब्दस्तु घञ्यायुदात्तो भवत्यचि त्वन्तोदात्तः स्यात् ।

यज० । **अविवाक्यस्येति** । यद्ययं नियमः क्रियते तदाऽविवाक्यमित्येव स्यान्न

प्र०— **भुजन्युब्जौ** । **तौदादिकस्येति** । कुटिली क्रियत इति तदर्थः । **रौधादिकस्येति** । अभ्यवहियतेऽनेनेति तदर्थः । सूत्र एव सत्यादुकव्यत्वानुपपत्तिरत आह—**न्युब्जेति** । **लोके बाहाविति** । **मणिबन्धादेः** पञ्चशाखप्रभेदः पाणिः। **बाहुश्च**× तत ऊर्ध्वभाग इति तदनुपपत्तिरिति भावः । भुजावयवत्वादिति बहुव्रीहिः । सूत्रस्थपाणिपदस्य पाण्यवयवके लक्षणेति केचित् । भाष्ये तु **वस्तुमात्रमिति** । अन्तर्भावितण्यर्थतयेति भावः। इतर एतदजानान आह—**अधिकरणेति** । स्वाशयं प्रकटयति—**एषोऽपीति** । न्युब्जित्वेत्यस्य व्याख्यानं चेष्टारहिता इति । ननु भुजेरन्यच्चि घञ्वदेव संज्ञापूर्वकविधेरनित्यत्वाद्गुणाभावे भुजस्य सिद्ध्यात्किं तत्रापि वचनेनेत्यत आह—**भुजशब्दस्त्विति** । **अन्तोदात्तः स्यादिति** । इगुपधलक्षणकेऽप्येवं स्यादिति भावः । वस्तुतः संज्ञापूर्वकविधेरनित्यत्वे मानाभावाद्गुणाभावार्थमपि तन्निपातनं बोध्यम् ।

यजयाच० । भाष्ये **प्रपूर्वो वचिरशब्दसंज्ञार्थमिति** । तत्रैवेत्यर्थः । एतेन प्रवाच्यं

× स्व. ° श्च समुदित इ° ।

+ ३. ३. १२१. × ३. १. १३४.

संज्ञायां प्रतिषेध उच्यते× प्रपूर्वश्च वचिरशब्दसंज्ञायां वर्तते । उपसर्गनियमार्थं तर्हीदं वक्तव्यम् । प्रपूर्वस्यैव वचेरशब्दसंज्ञायां प्रतिषेधो यथा स्यात् । इह मा भूत् । अविवाक्यमिति ।

उपसर्गपूर्वनियमार्थमिति चेदविवाक्यस्य विशेषवचनात्सिद्धम् ॥२॥

विशेष एतद्वक्तव्यम् । अविवाक्यमहरिति । क्व मा भूत् । अविवाच्येमवान्यादिति ।

ण्यप्रतिषेधे त्यजेरुपसंख्यानम् ॥ ३ ॥

ण्यप्रतिषेधे त्यजेरुपसंख्यानं कर्तव्यम् । त्याज्यम् ।

भोज्यं भक्ष्ये ॥ ७ । ३ । ६९ ॥

[भोज्यमभ्यवहार्ये ॥ १ ॥]

भोज्यमभ्यवहार्य इति वक्तव्यम् । इहापि यथा स्यात् । भोज्यः सूपः । भोज्या यवागूरिति । किं पुनः कारणं न सिध्यति । भक्षिरयं खरविशदे वर्तते तेन द्रवे न प्राप्नोति । नावश्यं भक्षिः खरविशद एव वर्तते । किं तर्हि । अन्यत्रापि वर्तते । तद्यथा । अब्भक्षः वायुभक्ष इति ।

प्र०—त्वविवाच्यमिति । द्वयमपि चैतद्विषयविभागेनेष्यत इति यत्नान्तरं कार्यं न त्वयं नियमः । अन्योपसर्गपूर्वस्य च प्रतिषेध इष्यत एव । दृशगात्रस्य यज्ञविशेषस्य दृशममहरविवाक्यमुच्यते । यस्मिन्याज्ञिका न विब्रुवते न नानावाक्यान्युच्चारयन्तीत्यर्थः । तत्र पृषोदरादित्वात्कुत्वमन्यत्र प्रतिषेध इति प्रवचिग्रहणं प्रत्याख्यातम् । **त्यजेरिति** । पूज्यमिति तु ण्यन्तस्य पूजे रूपम् ।

भोज्यम् । **नावश्यमिति** । भाष्यकारः सूत्रकारन्यासं समर्थयते—**अब्भक्ष इति** । नच शब्दान्तरसंनिधिगम्यं सामान्यवाचित्वमिति शक्यं वक्तुम् । नहि शब्दस्यानभिधेयं शब्दान्तरसंनिधानेनाभिधीयते नित्यत्वाच्छब्दार्थसंबन्धस्य । भोज्यं भक्ष्यं लेह्यं पेयमित्यत्र गोबलीवर्दन्यायेन विशेषविषयत्वं भुजिभक्ष्योर्ज्ञेयम् ।

उ०—नाम ग्रन्थविशेष इति वृत्त्युक्तं चिन्त्यम् । अविवाक्यस्य विशेषवचनादित्यस्य नियमानुपपत्तौ हेतुत्वमुपपादयति—**यद्ययमिति** । यत्नान्तरं नियमादन्यत् । नन्वेवमन्योपसर्गपूर्वस्य न स्यादिति शङ्कायामिष्टापत्तिमाह—**अन्योपसर्गेति** । तथा च प्रयुज्यतेऽनिर्वाच्या विद्येति । न विब्रुवत इत्यस्य व्याख्यानं न नानावाक्येत्यादि । बाहुलकादधिकरणे कृत्यः । **पृषोदरादित्वादिति** । पृषोदरादिष्वविवाक्यमहरिति पठनीयमिति भावः । **पूज्यमिति त्विति** । एवं च पूजेश्चेति वृत्तिश्चिन्त्येति भावः ।

भोज्यम् । ननु भक्षिः खरविशदविषय एव । अब्भक्ष इत्यादौ शब्दान्तरसंनिधानात्सामान्यवृत्तित्वमिति शङ्कते—**न चेति** । उत्तरयति—**न हीति** । अनेकार्थस्याभिधेयत्वे हि तस्य बोधनियामकत्वमात्रमिति भावः ।

× ७. ३. ६७.

घोर्लोपो लेटि वा ॥ ७ । ३ । ७० ॥

वेति शक्यमवक्तुम् । कस्मान्न भवति । तदग्निरग्नेय ददात् । अस्त्वत्र लोप आटः× श्रवणं भविष्यति तेनोभयं सिध्यति । दधद्रत्नानि दाशुषे । ददद्रत्नानि दाशुषे ।

ओतः श्यनि ॥ ७ । ३ । ७१ ॥

[ओतः शिति ॥ १ ॥]

ओतः शितीति वक्तव्यम् । किं प्रयोजनम् ।

उत्तरत्र शिद्ग्रहणाभावाय ॥ २ ॥

तत्रायमप्यर्थः ष्ठिवुक्लम्वाचमां शिति [७५] इति शिद्ग्रहणं न कर्तव्यं भवति । ननु च भोः श्यन्ग्रहणमपि तर्ह्युत्तरार्थं कर्तव्यम् । शमामष्टानां दीर्घः श्यनि [७४] इति श्यन्ग्रहणं न कर्तव्यं भवति । अत्राप्यस्तु शितीत्येव । यदि शितीत्युच्यते अनु त्वेन्द्रो भ्रमतु* मदतु अत्रापि प्राप्नोति । शमादिभिरत्र शितं विशेषयिष्यामः । शमादीनां यः शिदिति । कश्च शमादीनां शित् । शमादिभ्यो यो विहितः । एवमपि तस्यति यस्यति अत्र प्राप्नोति । अष्टाना-

---

प्र०— **घोर्लो०** । भाष्यकारेण वेति प्रत्याख्यातम् । केचित्त्वनित्यमागमशासनमित्यस्य ज्ञापकं वाग्रहणं वर्णयन्ति । अनित्यत्वान्नस्या ह्यसति ददादिति न स्यादिति तत्सिद्धये वाग्रहणं क्रियमाणमेनां परिभाषां ज्ञापयति ।

ओतः । **ओत इति** । नहि श्यनोऽन्य ओतः शिदस्ति । **तत्रायमप्यर्थ इति** । न केवलं मात्रालाघवं यावदयमप्यर्थ इत्यर्थः । **भ्रमत्विति** । या भ्राशेति वचनात्पक्षे शप् । **मदत्विति** । व्यत्ययेन शप् । **शमादिभ्यो यो विहित इति** । श्यन्नेव सर्वेभ्यः शमादिभ्यो विहित इति स एव गृह्यते । **एवमपीति** । शिद्विशेषणे शमादीनामुपयोगात्कार्यि-

---

उ०— **घोर्लोपो** । **केचित्त्वनित्यमिति** । अस्यार्थस्य भाष्यकृताऽस्पृष्टत्वादिदमप्रामाणिकम् । जप्त्वेत्याद्यसाध्वेवेत्यन्ये ।

ओतः श्यनि । **नहीति** । नच भवतीत्यस्ति । ओत इत्यस्य विहितविशेषणत्वाङ्गीकारात् । भवतेरित्यादिनिर्देशेन प्रतिपदोक्तौकारस्यैव ग्रहणाच्च । ओकारान्तप्रकृतिकाचारक्विबन्तास्तु न सन्त्येवानभिधानादिति भावः । **न केवलमिति** । क्सस्येति लुग्वेति च सूत्र ओत इत्यतः प्रागेव पाठ्ये लुग्वेत्यत्रापि लोपपदसंबन्धे बाधकाभाव इति भावः । ननु शबपि शमादिभ्यो विहित एवेत्यत आह—**श्यनेवेति** । दिवादिभ्य इत्यादिग्रहणस्य व्य

× ३. ४. ९४. । * ३. १. ७०. ।

मिति वचनान्न भविष्यति ।

ष्ठिवुक्लमुचमां शिति ॥ ७ । ३ । ७५ ॥

दीर्घत्वमाङि चमः ॥ १ ॥

दीर्घत्वमाङि चम इति वक्तव्यम् । आचामति । इह मा भूत् । उच्चमति विचमतीति ।

इषगमियमां छः ॥ ७ । ३ । ७७ ॥

इषेश्छत्वमहलि ॥ १ ॥

इषेश्छत्वमहलीति वक्तव्यम् । इह मा भूत् । इष्णाति इष्यति । तर्ताहं वक्तव्यम् । न वक्तव्यम् । अचीति× वर्तते । एवमपीषाणेत्यत्र÷ प्राप्नोति । अथाहलीत्युच्यमाने कस्मादेवात्र च्छत्वं न भवति । नैवं विज्ञायते न हल् अहल् अहलीति । कथं तर्हि । अविद्यमानो हलस्मिन्सोऽयमहल् अहलीति । यद्येव-मचीत्यपि वर्तमाने न दोषः । न ह्यचा शिद्विशेष्यते । शिति भवति कतरस्मिन् अचीति । कथं तर्हि । शिताऽज्विशेष्यते । अचि भवति कतरस्मिन् शिनीति ।

प्र०—निर्देशाभावात् । **अष्टानामिति** । अष्टानामित्यनेन संख्येयाः कार्यिणो निर्दिश्यन्ते ते च सनिधानाच्छमादय एव विज्ञायन्ते ।

ष्ठिवु० । ष्ठिवुक्लमुचमां शितीति सूत्रपाठादाह—**दीर्घत्वमाङि चम इतीति** । अथवा सूत्रे तन्त्रमाङ्ग नतु यथोपेयिवानित्यत्रोपशब्दोऽतन्त्रमिति प्रदर्शनाय वार्तिकारम्भः ।

इष० । इषुगमीति पाठोऽनार्ष इत्याह—**इषेश्छत्वमहलीति** । **इषाणेति** । इष आभीक्ष्ण्य इत्यस्माद्धलः श्नः शानज्झाविति शानच् । स चाजादिरिति च्छत्व-प्रसङ्गः । **अथेति** । अहलीति तत्पुरुषे शानजजादिरिति भावः । **न ह्यचेति** । विशेषणविशेष्यभावे कामचारात्तदादिविधिस्तदन्तविधिवद्विशेषणेन भवति । न विशेष्येण ।

उ०—श्यन्श्मादिशब्दोच्चारणेन विहितो नतु शप् तथेति परे । **कार्यिनिर्देशाभावादिति** । शमादिविहिताशित्यङ्गस्य दीर्घ इत्यर्थः स्यादिति भावः ।

ष्ठिवुक्लमु० । ननु सूत्र एवाऽऽचमामिति पाठाद्वार्तिकमनर्थकमत आह—**ष्ठिव्विति** । स पाठोऽनार्ष इति भावः । तमपि पाठं स्थापयति—**अथवेति** ।

इषगमि० । इषुगमीति पाठे तौदादिकस्यैवोदितः पाठादन्यस्य ग्रहणशङ्कैव नेत्यत आह—**अनार्ष इति** । गणेऽप्यनुदित एव पाठ इत्यर्थः । **न विशेष्येणेति** । एवं चाजूरूपे शितीत्यर्थान्न दोष इति भावः । अत्राचीत्यस्य मण्डूकानुवृत्तिर्बोध्या । अत एव क्रमः पर-स्मैपदेष्विति दीर्घः श्यन्यपि भवति । अत एव भगवता तत्सूत्रं विहायात्रैव विचारोऽका-रीति बोध्यम् ।

---

१ ख °त्रैवैतद्विचा° ।

× ७. ३. ७२. ÷ ३. १. ८३.

घ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ ७ । ३ । ७८ ॥

पिबेर्गुणप्रतिषेधः ॥ १ ॥

पिबेर्गुणप्रतिषेधो वक्तव्यः । पिबति । लघूपधगुणः प्राप्नोति× । स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । गुणः कस्मान्न भवति । पिबिरदन्तः ।

अदन्त इति चेदुक्तम् ॥ २ ॥

किमुक्तम् । धातोरन्त इति चेदनुदात्ते चबग्रहणमिति+ । अथवाऽङ्ग्रुवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येत्येवं न भविष्यति ।

ज्ञाजनोर्जा ॥ ७ । ३ । ७९ ॥

दीर्घोच्चारणं किमर्थं न ज्ञाजनोर्ज इत्येवोच्येत । का रूपसिद्धिः जानाति जायते । अतो दीर्घो यञि [७. ३. १०१] इति दीर्घत्वं भविष्यति । एवं तर्हि सिद्धे सति यदीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाऽ-

---

प्र०— **घ्राधा०** । **धातोरन्त इति चेदिति** । धातोरित्यत्र द्वौ पक्षावुक्तौ । अन्त इति वर्तते न वा । यद्यनुवर्तते तदाऽनुदात्ते चेति सूत्रं कर्तव्यं ददातीत्याद्युदात्तार्थं तथा पिबन्तीत्यादावाद्युदात्तत्वं मध्योदात्तनिवृत्त्यर्थं बान्तस्य धातोर्वक्तव्यमन्तग्रहणनिवृत्तौ तु क्रमप्राप्तत्वादादेरेवोदात्तत्वं सिध्यति । तत्रायं निर्णयः । अन्त इति वर्तते । ऊर्णोत्याद्यर्थम् । अनुदात्ते चेति कृतमेव । पिबेति चाऽऽद्युदात्तनिपातनमिह कार्यम् । **अथवेति** । सत्यपि हलन्तत्वे गुणाभावः पिबादेशेनैवाङ्गस्य प्रयोगार्हत्वात् ।

ज्ञाज० । **अतो दीर्घो यञीति** । अत्र सार्वधातुकग्रहणं तुरुस्तुसूत्रादनुव-

---

उ०— **घ्राधा०** । **आदेरेवेति** । इदं तत्रैवोपपादितम् । धातोरिति सूत्रस्थं पूर्वपक्षवार्तिकग्रहणं तत्रत्यसिद्धान्तवार्तिकस्याप्युपलक्षणमित्याशयेनाऽऽह—**तत्रायमिति** । **कृतमेवेति** । इदमेव ज्ञापकं धातोरित्यत्रान्ताधिकारस्येति भावः ।

ज्ञाजनोर्जा । ज्ञासाहचर्याच्छ्रूयमाणविकरण एवात्र जानिर्न जुहोत्यादिरित्याहुः । नन्वतो दीर्घ इत्यत्र तिङीत्यनुवृत्तेः कथं जानातीत्यत्र दीर्घोऽत आह—**अतो दीर्घ इत्यादि** । अत्रत्यमेतज्ज्ञापनपरं ज्यादादीयस इति सूत्रस्थं च भाष्यमेकदेश्युक्तिः । अदन्तत्वेनैव गुणप्रतिषेधवार्तिकप्रत्याख्यानसंभवेनास्य यत्नस्य गुरुत्वात् । भ्यसोभ्यामितिसूत्रस्थं च भाष्यमत्रत्यतदेकदेशिमतेनैवेति बोध्यम् । फलान्तरं तु नास्या उपलभ्यते । नन्वनेन दीर्घेऽजानां भो इत्यादावनन्त्यस्य प्लुतो न स्यात् । तत्रत्यदीर्घग्रहणस्य प्लुतव्यावर्तकताया हरदत्तादिभिरुक्तत्वात् । अत एव पचामि भोक्ष्यामीत्यादौ न प्लुतः । न चानन्त्यस्य पदस्य टेरिति तदर्थात्पचामीत्यादौ तत्प्राप्त्यभावेन किमर्थं दीर्घग्रहणेन तन्निराकरणमिति वाच्यम् । दीर्घग्रहणसामर्थ्येनान्त्यविषय

× ७. ३. ८६. + ६. १. १६२.

ङ्ङ्वृत्ते पुनर्वृत्तावविधिरिति । किमेतस्य ज्ञापने प्रयोजनम् । पिबेर्गुणप्रतिषेधश्चोदितः÷ स न वक्तव्यो भवति ।

जुसि च ॥ ७ । ३ । ८३ ॥

जुसि गुणे यासुट्प्रतिषेधः ॥ १ ॥

जुसि गुणे यासुडादौ प्रतिषेधो वक्तव्यः । चिनुयुः सुनुयुरिति । न वक्तव्यः । नैवं विज्ञायते मिदेर्गुणः [८२] जुसि चेति । कथं तर्हि । मिदेर्गुणोऽजुसि चेति । किमिदमजुसीति । अजादावुस्यजुसीति । इहापि तर्हि प्राप्नोति । चक्रुः जह्रुरिति । एवं तर्हि शितीति+ वर्तते । एवमपि अजुहवुः अबिभयुरित्यत्र न प्राप्नोति । भूतपूर्वगत्या भविष्यति । न सिध्यति न ह्युस्शिद्भूतपूर्वो नास्तीति कृत्वोसि यः शिद्भूतपूर्वस्तस्मिन्भविष्यति । अथवा क्रियते न्यास एव । अविभक्तिको निर्देशः । नैवं विज्ञायते मिदेर्गुणो जुसि चेति । कथं तर्हि । मिदर्गुण उजुसीति । उकारादौ जुसि । अथवाऽचीति× वर्तते तेन जुसं विशेषयिष्यामः । अजादौ जुसीति ।

जाग्रोऽविचिण्णल्ङित्सु ॥ ७ । ३ । ८५ ॥

इह जागरयति जागरक इति कृते रपरत्वे चात उपधायाः [७. २. ११६]

प्र०–र्तते नतु तिङिति । अत एवाऽऽने मुक्पूर्वान्तः कृतो न परादिर्दीर्घप्रसङ्गात् । **अङ्गवृत्त इति** । ज्यादादीयस इत्याकारविधानस्य ज्ञापकत्वे जा इति दीर्घोच्चारणं दीर्घश्रवणार्थमेतत् । दीर्घोच्चारणे तु ज्ञापके तदाकारविधानमाकारश्रवणार्थम् ।

जुसि च । **चिनुयुरिति** । तद्भक्तस्तदग्रहणेन गृह्यत इति गुणप्रसङ्गः । **शितीति वर्तत इति** । ष्ठिवुक्लमुचमां शितीत्यतः । नच लिटि शिदस्ति । **एव. मपीति** । उसि शितीति सामानाधिकरण्यसंबन्धं मन्यते । इतर उसि यः शित्तस्मिन्निति संबन्धं मत्वाऽऽह—**भूतपूर्वगत्येति** । प्रत्ययलक्षणं तु नास्ति । न लुमताऽङ्गस्येति निषेधात् । उकारादाविति । यासुडादेरनुकारादित्वाद्ग्रहणाभावः । अनुबन्धनिर्देशाच्च लिडादेशस्योसो ग्रहणाभावः । **अचीति वर्तत इति** । क्सस्याचीत्यतः ।

जाग्रो । **इहेति** । अङ्गवृत्त इत्यनाश्रित्योच्यते । गुणस्यावकाशः जागरित

उ०–एव टेरित्यस्य संबन्धादिति चेन्न । ज्ञापकपरभाष्यप्रामाण्येन तत्रत्यदीर्घग्रहणस्य स्पष्टार्थतया तदर्थकत्वाभावकल्पनात् ।

जुसि च । **लिटीति** । जुसि यः शित्तत्र परेऽङ्गस्य गुण इति सूत्रार्थः । ननु प्रत्ययलक्षणसत्त्वे किं भूतपूर्वगत्याऽत आह–**प्रत्ययलक्षणं त्विति** । भाष्ये **गुण उ जुसीति** । गुणेति लुप्तविभक्तिकमिति भावः ।

जाग्रो । **अनाश्रित्येति** । अगतिकगतित्वादिति भावः । ननु गुणात्पूर्वमचोऽ-

---

÷ ७. ३. ७८. + ७. ३. ७५. × ७. ३. ७२.

इति वृद्धिः प्राप्नोति तस्याः प्रतिषेधो वक्तव्यः।

चिण्णलोः प्रतिषेधसामर्थ्यादन्यत्र गुणभूतस्य वृद्धिप्रतिषेधः॥१॥

यदयमचिण्णलोरिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो न गुणाभिनिर्वृत्तस्य वृद्धिर्भवतीति।

किं पुनरयं पर्युदासः। यदन्याद्विचिण्णल्डिद्भ्यश्च इति। आहोस्वित्प्रसज्यायं प्रतिषेधः। विचिण्णल्डित्सु नेति। कश्चात्र विशेषः।

प्रसज्यप्रतिषेधे जुसिगुणप्रतिषेधप्रसङ्गः॥ २॥

प्रसज्यप्रतिषेधे जुसिगुणप्रतिषेधः प्राप्नोति। अजागरुः*।

उत्तमे च णलि॥ ३॥

उत्तमे च णलि प्रतिषेधः प्राप्नोति अहं जजागर+।

न वाऽनन्तरस्य प्रतिषेधात्॥ ४॥

न वैष दोषः। किं कारणम्। अनन्तरस्य प्रतिषेधात्। अनन्तरं यद्गुणविधानं×तस्य प्रतिषेधः। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिधो वेति।

जुसि पूर्वेण गुणविधानात्॥ ५॥

जुसि पूर्वेण गुणो विधीयते जुसि च [८३] इति।

प्र०—इति। अचो ञ्णितीति वृद्धेरवकाशः कारक इति। जागरयतीत्यादावुभयप्रसङ्गे परत्वाद्गुणे कृतेऽत उपधाया इति वृद्धिः प्राप्नोति। **गुणभूतस्येति**। गुणशब्दः स्वरूपपदार्थको गुणशब्देन भूतो निष्पन्नो गुणभूतः। एवं गुणशब्देनाभिनिर्वृत्तो गुणाभिनिर्वृत्तः। यद्येनेन गुणे कृतेऽत उपधाया इति वृद्धिः स्याच्चिण्णलोर्गुणप्रतिषेधोऽनर्थकः स्यात्कृते गुणे वृद्ध्या रूपस्य सिद्धत्वात्। तस्माच्चिण्णलोः प्रतिषेधोऽत उपधाया इति वृद्ध्यभावस्य ज्ञापको वृद्धिमात्राभावस्य न ज्ञापकः। तथा च ह्म्यन्तक्षणेत्यत्र जागृग्रहणमजागरीदित्यत्र वृद्धिनिषेधार्थं कृतम्। अन्यथा गुणे कृतेऽतो ल्यान्तस्येत्यनेन वृद्धिर्न भविष्यतीति किं जागृग्रहणेन। **अजागरुरिति**। लङ् सिजभ्यस्तविदिभ्यश्चेति जुसादेशः। तस्य ङित्त्वाज्जुसि चेत्यनेनापि प्राप्तस्य गुणस्य निषेधप्रसङ्गः। पर्युदासपक्षे तु न दोषः। तत्र विचिण्णल्डिद्भ्योऽन्यत्र गुणो विधी-

---

उ०—ञ्णितीति वृद्धिः किं न शङ्क्यतेऽत आह—**गुणस्येति**। अचिण्णलोरित्यनेन वृद्धिनिषेधेऽस्य गुणस्य विशिष्य विधानादपवादत्वादिति वक्तुं युक्तम्। **निष्पन्न इति**। भूधातुरुत्पत्त्यर्थ इति भावः। **किं जागृग्रहणेनेति**। तत्र तु सामान्यापेक्षज्ञापकत्वमाश्रित्य जागृग्रहणं प्रत्याख्यातमुपाध्यायैः। अत्रत्यभाष्यस्वरसोऽपि सामान्यापेक्षज्ञापकत्व एव दृश्यते। **निषेधप्रसङ्ग इति**। तत्र पक्षे विशेषाभावेन सर्वस्य गुणस्य निषेधः स्यादिति भावः। भाष्ये **पूर्वेणेति**।

---

* ३. ४. १०९; १. २. ४; ७. ३. ८३. +. ७. १. ९१; ७. ३. ८४. ×७. ३. ८५.

णलि च ॥ ६ ॥

किम् । न वाऽनन्तरस्य प्रतिषेधादित्येव । णलि च पूर्वेण गुणो विधीयते सार्वधातुकार्धधातुकयोः [८४] इति ।

अथवा पुनरस्तु पर्युदासः ।

अतोऽन्यत्र विधाने वावगुणत्वम् ॥ ७ ॥

अतोऽन्यत्र विधाने वावगुणत्वं वक्तव्यम् । जागृविः ।

न वा पर्युदाससामर्थ्यात् ॥ ८ ॥

न वा वक्तव्यम् । किं कारणम् । पर्युदाससामर्थ्यादत्र गुणो न भविष्यति । अस्त्यन्यत्पर्युदासे प्रयोजनम् । किम् । क्विबर्थं पर्युदासः स्यात् । शुद्धपरस्य विशब्दस्य प्रतिषेधे ग्रहणमनुनासिकपरश्च क्वौ विशब्दः । वस्वर्थं तार्हि पर्युदासः स्यात् । जागृवांसो अनुग्मन् । कथं पुनर्वेः पर्युदास उच्यमानो वस्वर्थः शक्यो विज्ञातुम् । सामर्थ्याद्वस्वर्थमिति विज्ञास्यते ।

वस्वर्थमिति चेन्न सार्वधातुकत्वात्सिद्धम् ॥ ९ ॥

वस्वर्थमिति चेत्तन्न । किं कारणम् । सार्वधातुकत्वात्सिद्धम् । कथं सार्वधा-

---

प्र०—यते । न च तेषु निषिध्यत इति लक्षणान्तरेण गुणः प्रवर्तत एव । **जागृविरिति** । वृद्दृजागृभ्यो विन्निति सूत्रपाठाश्रयेण चोद्यते । यदा तु जृशृस्तृजागृभ्यः क्विन्निति पाठस्तदा कित्त्वादेवाऽऽर्धधातुकलक्षणगुणाप्रसङ्गः । यद्यपि प्रसज्यप्रतिषेधेऽप्ययं दोषोऽनन्तरस्य निषेधात्तथाऽपि पर्युदासो दोषवानिति प्रतिपादनायेदमुच्यते । **न वेति** । यदि जागृविरित्यत्र लक्षणान्तरेण गुणः स्याद्वेः पर्युदासोऽनर्थकः स्यात् । **क्विबर्थमिति** । नहि लक्षणान्तरेण गुणप्रसङ्गो न चात्र तदनुबन्धकपरिभाषोपतिष्ठते । अनुबन्धरयानिर्देशादिति विग्रहणेन क्विबपि गृह्यत इति भावः । **शुद्धपरस्येति** । विशब्द इकारो निरनुनासिक उच्चारित इति क्विपो ग्रहणं नास्ति । तस्य हीकारोऽनुनासिकः । **क्वस्वर्थमिति** । विशब्दः सप्तम्यन्तो निर्दिश्यते निपातनाच्च सप्तम्या अलुक् । यथा वरेयलोपेति । अथवेकार उच्चारणार्थ इति तत्र तदादिविधिना क्वसोर्ग्रहणं भवतीति भावः । इतरस्तु यथोक्तमप्रतिपद्य वि इति समुदायो निर्दिष्ट इति मत्वाऽऽह—**कथं पुनरिति** । इतरः पूर्वोक्तेनाभिप्रायेणाऽऽह—**सामर्थ्यादिति** । औणा-

---

उ०—व्यवहितपूर्वेणेत्यर्थः । **तथाऽपीति** । त्वत्पक्षोऽपि दुष्ट इति प्रसज्यप्रतिषेधवादिना प्रतिपाद्यत इत्यर्थः । **नहि तत्रेति** । कित्त्वादिति भावः । ननु क्विपो द्रव्यनुबन्धकत्वाद्ग्रहणं नेत्यत आह—**न चात्र तदन्विति । तस्य हीकार इति** । विधेयविषय उच्चारणार्थवर्णानामपीत्संज्ञालोपौ । अन्यथा तद्विशिष्टविधिसंभावनया तदश्रवणे मानाभावादिति भावः । ननु वसौ विशब्दाभावात्कथमत्र ग्रहणमाशङ्क्येतेत्यत आह—**विशब्द इति** । औणादिकविशब्दग्रहणेन

तुकसंज्ञा। छान्दसः क्वसुः। लिट् च च्छन्दसि सार्वधातुकमपि भवति+। तत्र सार्वधातुकमपिङ्डिदिति÷ ङित्त्वात्पर्युदासो भविष्यति। अथवा वकारस्यैवेदमशक्तिजेनेकारेण ग्रहणम्।

पुगन्तलघूपधस्य च ॥ ७। ३। ८६॥

संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति।

संयोगे गुरुसंज्ञायां× भेत्तुमिति गुणो न प्राप्नोति।

विध्यपेक्षं लघोश्चासौ

प्र०—दिको न पर्युदस्यते। लक्षणान्तरेण प्रसङ्गादिति सामर्थ्याद्वकारादेः क्वसोर्ग्रहणमित्यर्थः। **छान्दस इति**। भाषायां सदवसश्रुभ्य एव क्वसुर्नान्येभ्य इति भावः। केचित्तु भाषायामपि क्वसुमिच्छन्ति त एवं परिहरन्ति। असंयोगाल्लिट् कितीति सिद्धे कित्त्वे क्वसोः कित्त्वं प्रतिषेधविषयस्यापि गुणस्य प्रतिषेधार्थमिति क्वसो गुणाभावः। **अथवेति**। अनच्कस्य हल उच्चारयितुमशक्यत्वादिकार उच्चारणार्थो निर्दिष्ट इति वकारादेर्ग्रहणम्। क्वसौ च प्रतिविहितमित्यौणादिक एव पर्युदस्यते तत्सामर्थ्याल्लक्षणान्तरेणापि गुणो न भवति। क्विपस्तु लोपाद्वर्णाश्रये प्रत्ययलक्षणनिषेधाच्च पर्युदासं नेच्छन्ति। अन्ये तु यथाऽतृणोदिति प्रत्ययलक्षणेनेमागमो भवति वर्णस्य प्रत्ययविशेषणत्वादेवं क्विपोऽपि पर्युदास इत्याहुः।

पुगन्तल०। संयोग इति। धात्वन्तप्रत्ययाद्योर्हलोरानन्तर्ये संयोगे गुर्विति गुरुसंज्ञायां लघुसंज्ञाया बाधनाद्भेत्तेति गुणो न भवति। अजादौ च भेदनमित्यादौ सावकाशो गुणः। **विध्यपेक्षमिति**। गुणविधानमिति शेषः। लघूपधाद्ये विहिते सार्वधातुकार्धधातुके तयोरङ्गस्य गुण इत्यर्थः। ननु पञ्चम्यभावात्कथं विधानं भविष्यति। उच्यते। षष्ठीपक्षेऽपि लघूपधस्य ये सार्वधातुकार्धधातुके, के च तस्य तस्माद्ये

उ०—सप्रयोजनत्वात्कथं सामर्थ्यमत आह—**औणादिक इति**। **भाषायामिति**। लिटः कानज्वा क्वसुश्चेत्यत्र च्छन्दसीत्यनुवर्तनादिति भाष्याभिप्रायः। अत एव भाषायां सदेति चरितार्थम्। **केचित्त्विति**। संयोगान्तधातुभ्यस्त्वनभिधानात्क्वसुरेव नेति तदाशयः। भाष्यविरोधोऽत्रारुचिः। कित्त्वं तु तितीर्वानित्यादावुच्छत्यृतामिति गुणनिषेधेन चरितार्थमिति बोध्यम्। वस्तुतो विभाषा पूर्वाह्णेतिसूत्रस्थभाष्यप्रामाण्याद्भाषायां क्वस्वङ्गीकारेऽपि जागृधातोर्लोके तस्यानभिधानाद्दोषाभाव इति वक्तुं युक्तम्। अथवा वकारस्येति भाष्यग्रन्थो वस्वर्थः शक्यो विज्ञातुं सामर्थ्यादित्युत्तरं बोध्यः। तेनैव संगतेः। **प्रत्ययलक्षणप्रतिषेधाच्चेति**। चिणादिसाहचर्येण श्रूयमाणस्यैव वेर्ग्रहणाच्चेत्यपि बोध्यम्। अत एव भाष्योक्तपूर्वपक्षेणाविरोधः। तेन जागः जागरावित्यादौ गुणो भवत्येवेति बोध्यम्। **अन्ये त्विति**। भाष्योक्तपक्षयोः फलभेदोऽत्रारुचिः।

पुगन्तल०। गुणविधानमितीति। भाष्येऽपि लघुग्रहणशब्देन गुणविधानं लक्ष्यत इति बोध्यम्। **तयोरङ्गस्येति**। प्रत्यासत्त्या लघूपधस्याङ्गस्येत्यर्थः। **के च तस्येति**। अङ्ग-

---

+ ३. ४. ११७. ÷ १. २. ४. × १. ४. ११.

विध्यपेक्षं लघुग्रहणं कृतं लघोश्चासौ विहितः ।

कथं कुण्डिर्न दुष्यति ॥ १ ॥

कुण्डिता हुण्डिता अत्र कस्मान्न भवति ।

धातोर्नुमः

धातोर्नुम्विधावुक्तं तत्र धातुग्रहणस्य प्रयोजनं धातूपदेशावस्थायामेव नुम्भवतीति× ।

कथं रञ्जेः

कथं रञ्जेरुपधालक्षणा वृद्धिः + । आश्चर्यो रागः । विचित्रो रागः * ।

स्यन्दिश्रन्थ्योर्निपातनात् ।

यदयं स्यन्दिश्रन्थ्योरवृद्ध्यर्थं निपातनं करोति÷ तज्ज्ञापयत्याचार्यो भवत्येवंजातीयकानां वृद्धिरिति ।

प्र०–विधीयेते इत्युपपद्यते विधानविशेषणम् । ननु सांप्रतिकलघूपधसभवे कथ विधानं विशेष्यते । व्याप्तिन्यायाश्रयादेव हि हलादावजादौ च गुणः सिध्यति । **कथं कुण्डिरिति** । अङ्गाधिकारे नुमो विधानादकृत एव नुमि प्रत्ययो लघूपधाद्विधीयते तस्मिन्परतो नुमि गुणः प्राप्नोति । **उक्तं तत्रेति** । तेन कुण्डेति गुरोश्च हल इत्यकारः सिध्यत्यन्यथा क्तिन् स्यात् । **कथं रञ्जेरिति** । यदि षष्ठीनिर्देशेऽपि विधानं विशेष्यते तदाऽन्यत्रापि प्रसङ्गः । ततश्चाकारोपधाद्विहिते प्रत्यये वृद्धिर्विधीयमाना रञ्जेः प्रत्ययोत्पत्तेः पुरस्तान्नकारोपधत्वाद्वृद्धिर्न प्राप्नोति । **राग इति** । रञ्जेश्च घञि च भावकरणयोरिति नलोपः । ननु चोपधाया अकारस्य वृद्धिरुच्यते । न च ततः प्रत्ययविधिसंभव इति विध्यपेक्षत्वं नाऽऽश्रयिष्यते । एवं मन्यतेऽकारोपधाद्यो विधीयते सोऽवयवादनुमानाद्विहितो भवति । **स्यन्दिश्रन्थ्योरिति** । नलोपार्थं वृद्ध्यभावार्थं निपातनम् । यदि वृद्धिविधौ विधानं विशेष्यते ततो वृद्धिप्रसङ्गाभावात्तदभावार्थं निपातनं क्रियेत । नलोपसिद्धये विधिरेवाऽऽश्रीयेत । अनेक-

---

उ०–प्रत्यययोर्विधाननिमित्तसंबन्धस्याङ्गसंज्ञाशास्त्रे दृष्टत्वादिति भावः । भाष्ये लघोश्चासावित्यस्य लघूपधाच्चासावित्यर्थः । **सांप्रतिकलघूपधसंभव इति** । स्थानषष्ठीत्वसंभवेन प्रधानगुणविशेषणत्वे संभवतीत्यर्थः । **अन्यथा क्तिन्स्यादिति** । ततश्चात्र लघूपधाद्विधानाभावेन न गुण इत्यर्थः । भाष्ये धातोर्नुम इति हेतौ पञ्चमी यतस्तत्र धातोर्नुम् नाङ्गस्य तस्मादित्यर्थः । **कथं रञ्जेरिति** । चोद्यस्य प्रकृते संगति दर्शयति–**यदीति** । **अवयवादनुमानादिति** । अवयवात्मकत्वात्समुदायस्येति भावः । ननु नलोपार्थमेव निपातनं स्यादत आह—**नलोपसिद्धये**

× ७. १. ५८. + ८. २. ११६. * ६. ४. २७. – ६. ४. २८, २९.

अनङ्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥ २ ॥

अनङ्लोपः। दध्ना सक्थ्ना× । शिदीर्घत्वम् । कुण्डानि वनानि* । एवं तर्हि।

अभ्यस्तस्य यदाहाचि

यदयं नाभ्यस्तस्याचि पिति सार्धधातुके [८७] इत्यज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येवंजातीयकानां गुण इति ।

लङर्थं तत्कृतं भवेत् ।

लङर्थमेतत्स्यात् । अनेनेक् ।

क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्यालघोर्गुणे ॥ ३ ॥

यदयं त्रासिगृधिधृषिक्षिपेः क्नुः [३. २. १४०] इको झल्हलन्ताच्च [१. २. ९; १०] इति क्नुसनौ कितौ करोति तज्ज्ञापयत्याचार्यो भवत्येवंजातीयकानां गुण इति ।

संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति ।
विध्यपेक्षं लघोश्चासौ कथं कुण्डिर्न दुष्यति ॥ १ ॥

प्र०—प्रयोजनसिद्धये निपातनाश्रयणम्। **अनङ्लोपेति**। अल्लोपोऽन इत्यत्र षष्ठीनिर्देशेऽन्नन्ताद्विहिते प्रत्यये लोपो विधीयमानो राज्ञ इत्यादावेव स्यान्नास्थ्ना दध्नेत्यादौ । शिदीर्घत्वं च सामानीत्यादावेव स्यान्नतु कुण्डानीत्यादौ । तस्मात्षष्ठीनिर्देशे विधानविशेषणे दोषप्रसङ्गाद्गुणो भेत्तुर्न सिध्यति । **अभ्यस्तस्येति**। अज्ग्रहणस्य प्रयोजनं नेनेक्तीत्यादौ गुणप्रतिषेधो मा भूत् । यदि च हलादाबलघूपधत्वाद्गुणो न स्यात्तदा गुणस्य प्राप्तिरेव नास्तीति किं तन्निषेधनिवारणार्थेनाज्ग्रहणेन । **लङर्थमिति** । लुप्ते प्रत्यये गुणप्रतिषेधनिवारणायाज्ग्रहणं न ज्ञापकम् । **अनेनेकेति** । णिजिर शौचपोषणयोरित्यस्मालुङि तिप् शप् श्लुः । द्विर्वचनै निजां त्रयाणां गुणः श्लाविति अभ्यासस्य गुणः । हलङ्याभ्य इति तिलोपः । प्रत्ययलक्षणेन लघूपधगुणः । **क्नुसनोरिति** । ननु सनः कित्त्व-

---

उ०—**इति**। रज्ञेश्च घञि चेत्युत्तरमेव स्यन्दिश्रन्थी पठेदित्यर्थः। वार्तिकेऽनलोप इति पाठेऽनन्तस्य योऽलोपः सोऽनलोप इत्यर्थः । अनङ्लोप इति पाठेऽनङो लोपोऽर्थात्तत्संबन्ध्यकारस्येत्यर्थः। शिदीर्घत्वं सर्वनामस्थाने चासंबुद्धाबित्यनेन तत्रापि नान्ताद्विहिते सर्वनामस्थाम इत्यर्थः स्यादिति भावः। **लुप्ते प्रत्यय इति**। प्रत्ययलोपे संयोगाभावेन गुरुत्वाभावाल्लघूपधत्वमस्त्येवेत्यर्थः। **क्नोरेवेति**। संयोगात्परत्वे सति ह्रस्वत्वरूपलघुत्वशरीरघटकसंयोगस्य प्रत्यासत्याऽङ्गावयवस्यैव ग्रहणम्। ईदृशार्थाश्रयणे च क्नोः कित्त्वं ज्ञापकम्। यद्वा भूतपूर्वलघुत्वमाश्रित्य गुण इति भावः। परे तु 'सृजिदृशोर्झल्यमकित्सनि' इति लघुन्यासेन सिद्ध इको झल्हल-

---

× ७. १. ७५; ६. ४. १३४. * ७. १. ७२; ६. ४. ८.

धातोर्नुमः कथं रञ्जेः स्यन्दिश्रन्थ्योर्निपातनात् ।
अनङ्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥ २ ॥
अभ्यस्तस्य यदाहाचि लङर्थं तत्कृतं भवेत् ।
क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ॥ ३ ॥

नाभ्यस्तस्याचि पिति सार्वधातुके ॥ ७ । ३ । ८७ ॥

अभ्यस्तानामुपधाह्रस्वत्वमचि पस्पशाते चाकशीमि वावशतीरिति दर्शनात् ॥ १ ॥

अभ्यस्तानामुपधाह्रस्वत्वमाचि वक्तव्यम् । किं प्रयोजनम् । पस्पशाते चाकशीमि । वावशतीरिति प्रयोगो दृश्यते । कपोतः शरदं पस्पशाते । अहं भुवनं चाकशीमि । वावशतीरुदाजादिति ।

बहुलं छन्दस्यानुषग्जुजोषादिति दर्शनात् ॥ २ ॥

बहुलं छन्दसि वक्तव्यमुपधाह्रस्वत्वम् । किं प्रयोजनम् । आनुषग्जुजोषादिति दर्शनात् । यस्त आतिथ्यमानुषग्जुजोषत् ।

यद्युपधाह्रस्वत्वमुच्यते

प्र०—ममभावार्थं स्यात्सिसृक्षति दिदृक्षत इति कथं ज्ञापकम् । उच्यते । यद्येतावत्प्रयोजनं स्यात्सृजिदृशोर्झल्यमकित्सनोरित्येव ब्रूयात्तस्माद्गुणप्रतिषेधार्थमपि कित्त्वं ज्ञापकमेव । किंतु धिप्सति धीप्सतीत्यत्र नलोपार्थं सनः कित्त्वं स्यादिति क्नोरेव कित्त्वं ज्ञापकम् ।

नाभ्यस्त० । **अभ्यस्तानामिति** । गुणप्रतिषेधमविधाय ह्रस्वत्वमेव विधेयं सर्वेष्टसिद्धय इति भावः । **किं प्रयोजनमिति** । गुणनिषेधे ह्रस्वे चाविशेषं मत्वा प्रश्नः । **पस्पशात इति** । स्पशिर्वार्तिककारवचनादपठितोऽपि धातुस्तस्माल्लेट्यत्ययेनाऽऽत्मनेपद टेरेत्वं लेटोऽडाटावित्याट् शपो बहुलं छन्दसीति श्लुद्विर्वचनम् । **चाकशीमीति** । काशृ दीप्तौ यङ्लुक् लट् मिप् शपलुक् । यङो वेतीडागमः । **वावशतीरिति** । वाशृ शब्दे । यङ्लुक् लट् । शतृ ङीप् । **जुजोषादिति** । जुषी प्रीतिसेवनयोः । लेट् व्यत्ययेन परस्मैपदं तिप् इतश्च लोपः परस्मैपदेष्वितीकारलोपो लेटोऽडाटावित्यट् व्यत्ययेन शपः श्लुः । द्विर्वचनं गुणे कृते ह्रस्वाभावः । **यदि तर्हीति** । यदि गुणनिषेधं प्रत्याख्यायोपधाह्रस्वो विधीयते तदा नर्नृतीति गुण-

---

उ०—न्ताच्चेति सामान्यतोऽतिदेशस्य गुणप्रतिषेधार्थत्वमिति भाष्याशयः । इको झलहलन्ताच्चेति प्रकरणे रुदविदेति सूत्रेण विहितं सनः कित्त्वमपि ज्ञापकं बोध्यम् ।

नाभ्यास्तस्य० । गुणनिषेधविधौ सत्येवोपधाह्रस्वत्वं वक्तव्यमिति वार्तिकार्थभ्रमं निरस्यति—**गुणप्रतिषेधमिति** । गुणे तस्य ह्रस्व इकि नेनिजतीत्यादिसिद्धिरिति भावः । **अविशेषमिति** । नेनिजतीत्यादावित्यर्थः । **उपधा नास्तीति** । जातेऽपि ह्रस्वे रूपासिद्धिरेवे-

प्रियां मयूरः प्रतिनर्नृतीवि
यद्वृत्त्वं नरवर नर्नृतीषि हृष्टः

अत्र गुणः प्राप्नोति । तस्मान्नार्थ उपधाह्रस्वत्वेन । कस्मान्न भवति । पस्पशाते चाकशीमि वावशतीरिति । स्पशिकाशिवशयः प्रकृत्यन्तराणि ।

भूसुवोस्तिङि ॥ ७ । ३ । ८८ ॥

भूसुवोः प्रतिषेध एकाज्ग्रहणं बोभवतीत्यर्थम् ॥ १ ॥

भूसुवोः प्रतिषेध एकाज्ग्रहणं कर्तव्यम् । किं प्रयोजनम् । बोभवतीत्यर्थम् । इह मा भूत् । बोभवति । यद्येकाज्ग्रहणं क्रियते अभूत् अत्र न प्राप्नोति । क्व तर्हि स्यात् । मा भूत् । तस्मान्नार्थ एकाज्ग्रहणेन । कस्मान्न भवति । बोभवतीति । बोभूत्वित्येतन्नियमार्थं भविष्यति* । अत्रैव यङ्लुगन्तस्य गुणो न भवति नान्यत्रेति । क्व मा भूत् । बोभवतीति ।

प्र०—रपरत्वयोः कृतयोर्ह्रस्वभाविन्युपधा नास्तीति रूपं न सिध्यतीति गुणनिषेध एव ज्यायान् । ननु परत्वाद्गुणं बाधित्वा ह्रस्वो भविष्यति । सकृद्गतौ विप्रतिषेध इति पुनर्गुणो न भविष्यति । एवं तर्हि पुनःप्रसङ्गविज्ञानाद्गुणः स्यात् । **स्पाशिकशिवशय इति** । स्पश बाधनस्पर्शनयोः । कश गतिशासनयोरिति केचित्पठन्ति । अन्ये तु कस गतिशासनयोरिति । तन्मतेन कशिः सौत्रो धातुः । कशेर्मुट् प्रतिष्कशश्च कशेरिति पाठात् । वश कान्तौ ।

भूसु० । **एकाज्ग्रहणमिति** । द्विर्वचने कृतेऽनेकाच्त्वे गुणनिषेधानिवृत्त्यर्थम् । **बोभवतीति** । यङ्लुगन्ताल्लेट् तिप् लेटोऽडाटावित्यट् । **मा भूदिति** । न माङ् योग इत्यट्प्रतिषेधादेकाच्त्वम् । **अत्रैवेति** । सिद्धे गुणनिषेधे निपातनं नियमार्थम् । **यथेवं सोषवीतीति** गुणनिषेधः प्राप्नोति । उच्यते । भाष्यं यथा तथा भवत्येव । **योगापेक्षं ज्ञापकमिति** वक्तव्ये नियमार्थमिति वचनादथवा नियमार्थेन निपातनेन द्वयोरपि भूसुवोर्यङ्लुकि गुणनिषेधो निवार्यते । यद्वा छान्दसो यङ्लुक् । न च

उ०—स्यपि बोध्यम् । **ननु परत्वादिति** । इदं चिन्त्यम् । गुणस्य नित्यत्वात् । सौत्रत्वमुपपादयति—**कशेरिति** ।

भूसु० । **द्विर्वचने कृत इति** । उत्तरखण्डस्य भूत्वात्प्राप्तिः । भूशब्दान्तस्याङ्ग्स्येत्यर्थ इति भावः । ननु मा भूदित्यत्राप्यनेकाच्त्वाद् गुणः स्यादत आह—**न माङ्गिति** । **नियमार्थमिति** । भवतेश्चेद्यङ्लुकि निषेधस्तर्हि बोभूत्वित्यत्रैवेति नियम इत्यर्थः । **अथवेति** । **भूसुवोरिति** यः प्रतिषेधः स यङ्लुकि चेद्बोभूत्वित्यत्रैवेति नियम इत्यर्थः । एकाज्ग्रहणं कर्तव्यमिति वार्तिकेन समानफलत्वाय द्विविधोऽत्र नियमश्छन्दस्येव लोट्यचेति च । अत एव वार्तिकारम्भे भाषायां गुणापत्तिदूषणं नोद्भावितमित्यके । परे त्वाहुः—भाषायामस्य यङ्लुगन्तप्रयोगे दृढतरं न मानम् । बोभूत्वित्यस्य च्छान्दसेषु पाठस्तु

---

* ७. ४. ६५.

तृणह इम् ॥ ७ । ३ । ९२ ॥

किमर्थं तृहिरागतश्नम्को गृह्यते न तृहेरिम्भवतीत्येवोच्येत ।

तृणहिग्रहणं श्नमिमोर्व्यवस्थार्थम् ॥ १ ॥

तृणहिग्रहणं श्नमि कृत इम्यथा स्यात् ।

तहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वात् ॥ २ ॥

तृहिग्रहणे हि सतीम्विषये श्नमोऽभावः स्यात् । किं कारणम् । अनवकाशत्वात् । अनवकाश इम्श्नमं बाधेत । इदमयुक्तं वर्तते । किमत्रायुक्तम् । तृणहिग्रहणं श्नमिमोर्व्यवस्थार्थमित्युक्त्वा तत उच्यते तृहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वादिति । तत्र वक्तव्यं तृणहिग्रहणं श्नमिमोर्भावाय तृहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वादिति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । व्यवस्थार्थमित्येव सिद्धं न ह्यसतो व्यवस्थेति ।

तुरुस्तुशम्यमः सार्वधातुके ॥ ७ । ३ । ९५ ॥

सार्वधातुक इति+ वर्तमाने पुनः सार्वधातुकग्रहणं किमर्थम् ।

पुनः सार्वधातुकग्रहणमपिदर्थम् ॥ १ ॥

प्र०—सुवो यङ्लुगन्तस्य छन्दसि प्रयोगः । भाषायां तु क्वचिद्यङ्लुक् न सर्वत्र ।

तृणह इम् । **किमर्थमिति** । तृहू इत्यस्य निवृत्त्यर्था विकरणनिर्देशो न भवति ततः परस्य हलादेः पितः सार्वधातुकस्य विकरणेन व्यवधानादिति प्रश्नः । **न ह्यसत इति** । व्यवस्थार्थमित्येवं ब्रुवता पूर्वं श्नमोभावः पश्चादिमित्युक्तं भवति । श्नमोभावायेति तूच्यमाने क्रमो न प्रदर्शितः स्यात् ।

तुरु० । **अपिदर्थमिति** । नाभ्यस्तस्याचि पिति सार्वधातुक इति सार्वधातुकग्रहणं पिद्विशेषणसंबन्धमिति तदनुवृत्तौ पितोऽप्यनुवृत्तिः स्यादिति तन्निवृत्त्यर्थमन्यत्सार्वधातुकग्रहणमित्यपितोऽपीङ् भवति । हलग्रहणमनुवर्तते नहि तत्सार्वधातु-

---

उ०—यङ्लुकश्छान्दसत्वादेव तदाह—**भाषायां त्विति** ।

तृणह इम् । **तृहू इत्यस्येति** । न चास्यैव यङ्लुगन्तस्य व्यावृत्त्यर्थं स्यादिति वाच्यम् । सानुबन्धकत्वेनास्याग्रहणमित्यत्र तात्पर्यात् । यङ्लुक्सत्त्वे मानाभावाच्च । भाष्येऽनवकाशत्वादिति । न च इनमि कृते तन्मध्यपतितन्यायेनेमोऽवकाशः । मिदचोऽन्त्यादित्येकवाक्यतया तृहोऽन्त्यादच ऋकारात्पर इमित्यर्थेन इनमि ऋकारस्यान्त्यत्वाभावेन तदप्राप्तेः पुनर्वाक्यार्थे तु न मानम् । अनेनैव न्यायेनेमि इनमोभावः । तदेव ध्वनयन्नाह—**श्नमिमोर्भावायेति** । न ह्यसतो व्यवस्थाऽस्तीति च । यद्वा तत्कालेऽवश्यंप्राप्तिसत्त्वेन तदप्राप्तिविषयेऽवकाशाभावेनानवकाशत्वमित्यर्थः । **पूर्वमिति** । व्यवस्थार्थमित्यनेन इनमिमोर्भावः क्रमश्च दर्शित इति भावः ।

तुरुस्तु० । नन्वेवं हलग्रहणस्यापि निवृत्तिः स्यादत आह—**हलग्रहणमिति** । उतो

+ ७. ३. ८७.

अपिदर्थोऽयमारम्भः । अधिगो शमीध्वं सुशमि शमीध्वं शमीध्वमधिगो ।

बहुवचने झल्येत् ॥ ७ । ३ । १०३ ॥

अतो दीर्घाद्बहुवचन एत्त्वं विप्रतिषेधेन ॥ १ ॥

अतो दीर्घाद्बहुवचन एत्त्वं भवति विप्रतिषेधेन । अतो दीर्घो यञि सुपि च [१०१; १०२] इत्यस्यावकाशः वृक्षाभ्याम् प्लक्षाभ्याम् । बहुवचने झल्येदित्यस्यावकाशः । वृक्षेषु प्लक्षेषु । इहोभयं प्राप्नोति । वृक्षेभ्यः प्लक्षेभ्यः । एत्त्वं भवति विप्रतिषेधेन ।

अम्बार्थनद्योर्ह्रस्वः ॥ ७ । ३ । १०७ ॥

डलकवतीनां प्रतिषेधो वक्तव्यः । अम्बाडे अम्बाले अम्बिके ।

तल्ह्रस्वत्वं वा ङिसंबुद्ध्योः । तल्ह्रस्वत्वं वा ङिसंबुद्ध्योरिति वक्तव्यम् । देवत देवते । देवतायाम् देवते ।

स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । स कथं न वक्तव्यो भवति ।

अम्बार्थं द्व्यक्षरं यदि ।

यद्यम्बार्थं द्व्यक्षरं गृह्यते ।

तत्तर्हि ह्रस्वत्वं वक्तव्यम् । अवश्यं छन्दासि ह्रस्वत्वं वक्तव्यम् । उपगायन्तु मां पत्नयो गर्भिणयो युवतय इत्येवमर्थम् ।

प्र०—कग्रहणेन सह निर्दिष्टं यतस्तन्निवृत्तौ हलो निवृत्तिः स्यात् । **शमीध्वमिति** । शमेरन्तर्भावितण्यर्थात्त्रैषे लोट् । व्यत्ययेनाऽऽत्मनेपदम् । शप् तस्य बहुलं छन्दसीति लुक् ।

अम्बा० । **डलकवतीनामिति** । अर्थगतेन स्त्रीत्वेनाम्बार्थाः शब्दा निर्दिष्टाः श्रुत्यपेक्षया वा स्त्रीत्वेन निर्देशः । असंयुक्तानां च डलकानां ग्रहणादक्काष्ठेति ह्रस्वो भवत्येव । **देवत इति** । ङौ ह्रस्वे कृते ङ्याबुग्रहणेऽदीर्घ इति स्थानिवत्त्वनिषेधादाम्याडागमौ न भवतः । **अम्बार्थमिति** । व्यच एवाम्बार्थस्य ग्रहणाद्डलकवतामर्थात्प्रतिषेधः कृतो भवति । **अवश्यमिति** । व्यत्ययो बहुलमिति दीर्घस्य ह्रस्वः ।

उ०—वृद्धिरित्यतः । ननु शमिरकर्मकस्तत्कथं पशुविशसनप्रत्यायकतया सकर्मकोऽत आह—**शमेरिति** । **शबिति** । अत्रापि व्यत्ययेनेत्यपकृष्यते । श्यन्विकरणो हि शमिः परस्मैपदी च ।

अम्बार्थ० । ननु शब्दस्य विशेष्यत्वात्स्त्रीलिङ्गनिर्देशोऽनुपपन्नोऽत आह—**अर्थगतेनेति** । अम्बा माता । **श्रुत्यपेक्षयेति** । श्रुतिशब्द एव विशेष्योऽध्याहर्तव्य इत्यर्थः । **असंयुक्तानामिति** । अत एव प्रत्याख्यानेन फलैक्यम् । भाष्ये **द्व्यक्षरामिति** । व्यञ्जनसहितोऽजत्राक्षरं द्व्यजम्बार्थेति सूत्रं पाठ्यम् । प्रतिषेधाच्चेदं लघ्विति भावः । **तत्तर्हीति** । तल्ह्रस्वत्वं वेत्येतत् । तलन्तस्य ह्रस्वत्वं वेति तदर्थः । पूर्ववदेवेति । अर्थगतं पूजाद्योतकं बहुत्वं

मातॄणां मातच्पुत्रार्थमर्हते । मातॄणां मातजादेशो वक्तव्यः पुत्रार्थमर्हते । गार्गीमात वात्सीमात ।

ह्रस्वस्य गुणः ॥ ७ । ३ । १०८ ॥

इह कस्मान्न भवति । नदि कुमारि किशोरि ब्राह्मणि ब्रह्मबन्धु । ह्रस्ववचनसामर्थ्यात्+ । अस्त्यन्यद्ह्रस्ववचने प्रयोजनं पृथग्विभक्तिं मोच्चारयमिति । शक्यं पृथग्विभक्तिरनुच्चारयितुम् । कथम् । एवमयं ब्रूयात् । अम्बार्थानां ह्रस्वः नदीह्रस्वमोर्गुण इति । यद्येवमुच्यते जसि च [१०९] इत्यत्र नद्या अपि गुणः प्राप्नोति । एवं तर्हि योगविभागः करिष्यते । अम्बार्थनद्योर्ह्रस्वः । ततो ह्रस्वस्य । ह्रस्वस्य च ह्रस्वो भवति । किमर्थमिदम् । गुणं वक्ष्यति तद्बाधनार्थम् । ततो गुणः । गुणश्च भवति ह्रस्वस्येति । अथवा ह्रस्वस्य गुण इत्यत्राम्बार्थनद्योर्ह्रस्व इत्येतदनुवर्तिष्यते ।

प्र०—**मातॄणामिति** । पूर्वपदे बहवो मातृशब्दा इति बहुवचनं मातृशब्दस्य मातजादेशो वक्तव्यो यो मातृशब्दः पुत्रार्थं पुत्रमभिधातुमुपादीयते । बहुव्रीहौ च वर्तिपदैरन्यपदार्थोऽभिधीयत इति तत्रैवायं संबुद्धौ मातजादेशः । **गार्गीमातेति** । गार्गी माताऽस्येति बहुव्रीहौ नद्यृतश्चेति कप् येन नाप्राप्त इति मातच्या बाध्यते यः पुत्रः श्लाघ्यगुणत्वात्कुलसंभूतया मात्रा व्यपदेशमर्हति तत्र मातजादेशो नान्यत्र। गर्गवत्साभ्यां गार्गादियञ् यञश्चेति ङीप् ।

ह्रस्व० । **इह कस्मादिति** । ह्रस्वविधानं नद्या गुणविध्यर्थमेव स्यात् । **पृथगिति** । यद्यम्बार्थानां ह्रस्व इत्युक्त्वा नद्या गुणो ह्रस्वस्य चेत्युच्यते तदा पृथगुच्चारयितव्या भवति । **एवमयं ब्रूयादिति** । ह्रस्वं विधाय गुणे विधीयमाने प्राक्रियागौरवं भवतीति लाघवार्थं साक्षादेव गुणं विदध्यात् । **नद्या अपीति** । एकसमासनिर्देशाद्द्वयोरपि नदीह्रस्वयोरनुवृत्तिप्रसङ्गात् । **ह्रस्वस्य चेति** । ह्रस्वस्य चेत्य-

---

उ०—शब्द आरोप्य बहुवचननिर्देश इत्यर्थः। पूर्वपदे बहव इति पाठे तु सति पूर्वपदमुत्तरपदभूतास्ते बहव इत्यर्थः । कथं मातृशब्दस्य पुत्रार्थाभिधानायोपादानमत आह—**बहुव्रीहौ चेति** । अर्हत इत्यस्योपयोगमाह—**यः पुत्र इति** । **श्लाघ्यत्वादिति** । एतच्चार्हः प्रशंसायामिति प्रशंसायां विहितशतृप्रयोगाल्लभ्यते । पुत्रार्थमर्हत इत्यत्र सापेक्षत्वेऽप्यत एव निपातनात्समासः। **नान्यत्रेति** । यत्र पितुरसंविज्ञानेन मात्रा व्यपदेशस्तत्र न भवतीत्यर्थः ।

ह्रस्वस्य । ननु नदीत्यादौ ह्रस्वविधानाद्गुणो न भविष्यतीत्यत आह—**ह्रस्वविधानमिति** । **पृथगिति** । तथा च गौरवं स्यादित्यर्थः । एवं च तत्परिहारायैवमुच्यत इति सामर्थ्यक्षयान्नदीत्यादौ गुणः स्यादेवेति भावः । नन्वेवं निर्देशस्य यथान्यासेन समानत्वाल्लाघवाभावेनैवं ब्रूयादित्ययुक्तमत आह—**ह्रस्वं विधायेति** । **साक्षादेवेति** । तद्विधानाच्च

+ ७. ३. १०७.

जसि च ॥ ७ । ३ । १०९ ॥

जसादिषु च्छन्दसि वावचनं प्राङ् णौ चङ्युपधायाः ॥ १ ॥

जसादिषु च्छन्दसि वेति वक्तव्यम् । किमविशेषेण । नेत्याह । प्राङ् णौ चङ्युपधायाः÷ । किं प्रयोजनम् ।

अम्बे दर्वि शतक्रत्वः पश्वे नृभ्यः किकिदीव्या ॥ २ ॥

अम्बे अम्ब । दर्वि दर्वे । शतक्रत्वः शतक्रतवः । पश्वे पशवे । किकिदीव्या किकिदीविना÷ ।

घेर्ङिति ॥ ७ । ३ । १११ ॥

घेर्ङिति गुणविधाने ङीसार्वधातुके प्रतिषेधः ॥ १ ॥

घेर्ङिति गुणविधाने ङीसार्वधातुके प्रतिषेधो वक्तव्यः । पट्वी मृद्वी× । कुरुत इति* ।

प्र०—त्राम्बार्थनद्योरित्यनुवर्तते । तेन नद्या ह्रस्वे कृते तस्य गुणबाधनाय ह्रस्व एव क्रियते । अथवेति । सिद्धे ह्रस्वे पुनरनुवृत्त्या तद्विधानं गुणबाधनार्थम् ।

जसि च । **जसादिष्विति** । आदिशब्दः प्रकारवाची । प्रकरणेऽस्मिन्येषु कार्यं विधीयते ते जसादय इति पूर्वयोगनिर्दिष्टानामपि ग्रहणम् । **दर्वीति** । कृदिकारादक्तिन इति पक्षे ङीष्विधानात्सिध्यति रूपद्वयं ङीषूविकल्पं त्वनपेक्ष्यैतदुक्तम् । **शतक्रत्व इति** । जसि चेति गुणाभावपक्षे प्रथमयोरिति पूर्वसवर्णदीर्घोऽपि वा छन्दसीति वचनान्न भवतीति यणादेशः प्रवर्तते । किकिदीविशब्दः कृविघृष्विित्युणादिषु निपातितः ।

घेः । **कुरुत इति** । शेषो घ्यसखीति यस्य नदीसंज्ञा नास्ति स घिसंज्ञ इति

उ०—गुणाभावोऽनुमीयत इत्यर्थः । **तेन नद्या इति** । अम्बार्थानां पुनर्ह्रस्वविधानप्रयोजनाभावान्नदीविषयमेतद्ध्रस्वविधानमित्यर्थः । मातृशब्द ऋतो ङीति गुणबाधोऽपि स्यादिति नदीग्रहणमात्रमनुवर्तत इति तत्त्वम् । **पुनरनुवृत्त्येति** । वाक्यभेदेनेत्यर्थः । अम्बार्थनद्योर्गुण इत्येव सिद्धे ह्रस्वविधानसामर्थ्यान्न गुण इति कश्चित्तन्न । इकूपरिभाषोपस्थितावेम्बित्यादौ गुणानापत्तेः । तद्नुपस्थितौ तु मातृवाचकानस्शब्देऽपि गुणापत्तेः । तस्य नपुंसकत्वेऽपि त्रपा इतिवत्पक्षे गुणापत्तिरिति बोध्यम् ।

जसि च । प्रकारः सादृश्यम् । तच्चैकप्रकरणनिर्दिष्टत्वनिबन्धनम् । किकिदीविः पक्षिविशेषः । **अनपेक्ष्येति** । तदा ह्येकमन्तोदात्तं स्यात् । आद्युदात्तमेव प्रयोगद्वयमिष्यत इति भाष्यकृदभिप्रायं मन्यते ।

घेर्ङिति । ननु कुरुशब्दस्थालिङ्गस्य कथं घिसंज्ञा । यू स्त्र्याख्यावित्यपेक्षया

÷ ७. ४. १. + ७. ३. १०७; १०८; १०९; १११; १२०. × ४. १. ४४. * १. २. ४.

सुबधिकारात्सिद्धम् ॥ २ ॥

सुबिति वर्तते । क्व प्रकृतम् । सुपि च बहुवचने झल्येत् [१०२; १०३] इति ।

याडापः ॥ ७ । ३ । ११३ ॥

इह अतिखट्वाय अतिमालायेति ह्रस्वत्वे× कृते स्थानिवद्भावाद्याट् प्राप्नोति तस्य प्रतिषेधो वक्तव्यः । न वक्तव्यः ।

याड्विधानेऽतिखट्वायेत्यप्रतिषेधो ह्रस्वादेशत्वात् ॥ १ ॥

याड्विधाने अतिखट्वाय अतिमालायेत्यप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः । याट् कस्मान्न भवति । ह्रस्वादेशत्वात् । ह्रस्वादेशोऽयम् । उक्तमेतन्ङ्याब्ग्रहणेऽदीर्घ इति+ । अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे÷ कृत आप्चासौ भूतपूर्व इति कृत्वा याट् कस्मान्न भवति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। ननु चेदानीं सत्यपि स्थानिवद्भाव एतया परिभाषया शक्यमुपस्थातुम् । नेत्याह । न हि तदानीं क्वचिदपि स्थानिवद्भावः स्यात् ।

प्र०—कुरुशब्दो घिः ।

याडा० । **अतिखट्वायेति** । खट्वामतिक्रान्त इति प्रादिसमासे ह्रस्वे च कृते चतुर्थ्येकवचनस्य ङेर्य इति प्राप्नोति याडाप इति च । तत्र परत्वाद्याट्प्राप्नोति तत्र कृते दीर्घत्वे चातिखट्वायै देवदत्तायेति प्रसङ्गः । **ह्रस्वादेशत्वादिति** । यतो ह्रस्वादेशः कृतस्ततो रूपभेदादाब्ग्रहणेन तस्य ग्रहणाभावात्स्थानिवत्त्वं नास्तीत्याह—**उक्तमेतदिति** । **लक्षणेति** । अकारस्य दीर्घे सत्या इति लाक्षणिकं रूपमिति न तस्य ग्रहणम् । **ननु चेति** । ङ्याब्ग्रहणेऽदीर्घ इति न वक्तव्यमिति चोद्यते नेत्याहेति परिहारः ।

उ०—शेषविज्ञानात् । अत आह—**शेषो घीति** ।

याडापः । **परत्वादिति** । नित्यत्वेनोत्कृष्टत्वादित्यर्थः । **लाक्षणिकं रूपमिति** । नचैवं खट्वाया इत्यत्र सवर्णदीर्घे लाक्षणिकत्वमिति तत्रापि न स्यात् । आदिवद्भावेन प्रवृत्तेः । किंच यत्र लक्षणप्रवृत्तिं विना तद्रूपासंभवस्तदेव लक्षणप्रतिपदोक्तपरिभाषानिषेधविषयः । नचैतत्तथा । एकादेशतः प्रागपि तद्रूपसत्त्वात् । अत एवाऽऽकारप्रश्लेषेण वार्तिकप्रत्याख्यानेऽपि न दोष इति बोध्यम् । यत्तु तत्पक्षेऽङ्गस्याऽऽबन्तविशेणत्वेनाऽऽबन्ताङ्गाभावान्न दोषः । उपसर्जनस्त्रीप्रत्यये तदादिनियमसत्त्वादिति । तन्न । अतिखट्वायेत्युदाहरणविषयवार्तिकस्य तत्प्रत्याख्यानाय प्रश्लेषस्य च वैयर्थ्यापत्तेः । स्थानिवद्भावेऽपि प्राप्त्यभावात् । किंचैवं खट्वाया अर्धेऽर्धखटायामित्यादौ याडनापत्तिरिति दिक् ।

× १. २. ४८. + १. १. ५६. – ७. ३. १०२.

ङेराम्नद्याम्नीभ्यः ॥ ७ । ३ । ११६ ॥

इदुद्भ्यामाम्विधानमौत्त्वस्य परत्वात् ॥ १ ॥

इदुद्भ्यामाम्विधेयः । शकट्याम् पद्धत्याम् धेन्वामिति । किं पुनः कारणं न सिध्यति । औत्त्वस्य परत्वात् । परत्वादौत्त्वं प्राप्नोति*।

योगविभागात्सिद्धम् ॥ २ ॥

योगविभागः करिष्यते । ङेराम्नद्याम्नीभ्यः । तत इदुद्भ्याम् । इदुद्भ्यामुत्तरस्य ङेराम्भवतीति । शकट्याम् पद्धत्याम् धेन्वामिति । तत औदृच्च घेः ।

औदृच्च घेः ॥ ७ । ३ । ११८; ११९. ॥

औत्त्वे योगविभागः ॥ १ ॥

औत्त्वे योगविभागः कर्तव्यः । औत् । औद्भवतीदुद्भ्याम् । ततोऽच्च घेरिति । अकारश्च भवति घेरिति । किमर्थो योगविभागः ।

सखिपतिभ्यामौत्त्वार्थः ॥ २ ॥

सखिपतिभ्यामौत्त्वं यथा स्यात् । सख्यौ पत्यौ÷ ।

एकयोगे ह्यप्राप्तिरत्त्वसंनियोगात् ॥ ३ ॥

एकयोगे हि सत्यौत्त्वस्याप्राप्तिः । किं कारणम् । अत्त्वंसंनियोगात् । अ-

---

प्र०— ङे० । **शकट्यामिति** । शकटिशब्दस्य ङिति ह्रस्वश्चेति वा नदीसंज्ञा विधानात्तदभावपक्षे घिसंज्ञायां शकट्याविति भवति । नदीसंज्ञापक्षे तु परत्वादौत्वं प्राप्नोति । आमोऽवकाशः कुमार्यामिति । औत्त्वस्यावकाशः सख्यौ पत्याविति । अत आह— **इदुद्भ्यामिति** । पूर्वविप्रतिषेध आश्रयणीय इत्यर्थः । ननु कृत औत्त्वे पुनःप्रसङ्गविज्ञानादाम् भविष्यति । पुनरौत्त्वं न भविष्यति । चक्रकेष्विष्टतो व्यवस्थापनात् । नैतदस्ति । द्रव्यपदार्थपक्षे सकृद्गतपरिभाषयाऽऽम् स्यात् । **योगविभाग इति** । इदुद्भ्यामित्यत्र योगे नदीग्रहणानुवृत्त्या सख्यौ पत्याविति त्राऽऽमोऽप्रसङ्गः ।

औदृच्च० । **औत्त्व इति** । एकयोगे त्वत्त्वौत्त्वयोः संनियोगाशिष्टत्वाद्यत्रात्त्वं तत्रौत्त्वं स्यात् । **सख्यौ पत्याविति** । असखीति प्रतिषेधात्पतिः समास एवेति नियमाच्चानयोर्नास्ति घिसंज्ञा । अस्याख्यत्वाच्च नदीसंज्ञा नास्ति । यदा सखिशब्दः स्त्रियां वर्तते तदा सख्यशिश्वीति भाषायामिति ङीषा भाव्यम् । पतिशब्दस्य तु स्त्रीवृत्तेर्यज्ञसंयो-

---

उ०— ङेराम् । **शकट्यामितीति** । अत्र प्रयोगे शकटिशब्दस्येत्यर्थः । ननु योगविभागे सख्यावित्यादावप्याम् स्यादत आह—**इदुद्भ्यामित्यत्रेति** ।

औदृच्च । सखिपत्योः स्त्रियां वृत्तौ कथं भाव्यं तत्राऽऽह—**यदा सखीति** । एवं च तस्य सख्यामित्येवेति भावः । **यज्ञसंयोगादन्यत्रेति** । यज्ञसंयोगे हि पत्न्यामिति भवति । आयुदात्तेषु

---

* ७. ३. ११७; ११९. ÷ १. ४. ७; ८.

त्त्वसंनियोगेनौत्त्वमुच्यते तेन यत्रैवात्त्वं तत्रैवौत्त्वं स्यात् ।

न वाऽकारस्यानन्वाचयवचनाद्यथा क्यङि सलोपः ॥४॥

न वाऽर्थ औत्त्वे योगविभागेन । किं कारणम् । अकारस्यान्वाचयवचनात् । प्रधानशिष्टमौत्त्वमन्वाचयशिष्टमत्त्वं यथा क्यङि सलोपः । तद्यथा । प्रधानशिष्टः क्यङ् प्रातिपदिकमात्राद्भवति यत्र च सकारस्तत्र लोपः+ ।

अत्त्वे टाप्प्रतिषेधः ॥ ५ ॥

अत्त्वे टापः प्रतिषेधो वक्तव्यः । शकटौ पद्धतौ धेनौ । अत्त्वे कृते टाप्प्राप्नोति÷ ।

न वा संनिपातलक्षणस्यानिमित्तत्वात् ॥ ६ ॥

न वा वक्तव्यः । किं कारणम् । संनिपातलक्षणस्यानिमित्तत्वात् । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति टाप् न भविष्यति ।

ङित्करणाद्वा ॥ ७ ॥

प्र०—गादन्यत्र ङिति ह्रस्वश्चेति पक्षे नदीसंज्ञेति पत्यामिति भवति । **न वेति** । अन्वाचये चशब्दः । इदुद्भ्यां परस्य डेरौद्भवति । यत्र तु धिसंज्ञाऽस्ति तत्र तस्यात्त्वमिति । अत्त्वानपेक्षमौत्त्वं प्रधानशिष्टम् । **अत्त्व इति** । टापि सत्यौङ आप इति शीभावः प्राप्नोति । यदा तत्र सामान्यग्रहणार्थो ङकारो वर्णनिर्देशो वा । यदा तु पूर्वाचार्यनिर्देशस्तदा प्रथमाद्वितीयाद्विवचनयोरेव शीविधानादस्याप्रसङ्गः । अन्ये टापि याट्प्रसङ्गमाहुः । **न वेति** । या सेत्यादौ टाब्भवति त्यदाद्यकारष्टाब्विधेरिति दोषेषु परिगणनात् । **ङित्करणाद्वेति** । अन्तोदात्तेषु स्वरभेदोऽपि नास्ति ङित्त्व उदात्तनिवृत्तिस्वरेण भाव्यम् । अङित्त्वे त्वेकादेश उदात्तेनोदात्त इति । ननु ङित्त्वे सख्यौ पत्याविति टिलोपप्रसङ्गः । नैतदस्ति । औङ्डिच्च घेरिति न्यासः क्रियते पत्यावैश्वर्य इति निपातनाद्वाऽघेष्टिलोपाभावः । विंशतावित्यत्र ति विंशतेर्डितीति तिलोपो भवति । नस्तद्धित इति योगविभागात् । तद्धित इत्यत्र ति विंशतेर्डितीति न इति चानुवर्तते । टित्येतत्तु नानुवर्तते ।

उ०—स्वरभेदप्रसङ्ग एव न । अन्तोदात्तेष्वपि नेत्याह—**ङित्त्व इति** । तित्त्वप्रयुक्तं स्वरितत्त्वं तु नात्र । तितिप्रत्ययग्रहणात् । प्रत्ययाप्रत्ययोरित्येव सिद्धे पुनः प्रत्ययग्रहणेनौपदेशिकप्रत्ययत्ववत एव ग्रहणादिति भावः । **अघेरिति** । सामान्यापेक्षं ज्ञापकमिति भावः । वस्तुतः शड्कैवायुक्ता । इदुद्भ्यामुत्तरस्य डेरौत् । घेः परस्य तु स ङिदित्यर्थात् । **योगविभागादिति** । तद्धित इति विभज्य तत्र ति विंशतेर्डिति न इति चानुवर्त्य वाक्यभेदेन व्याख्येयमिति भावः । **टेरित्येतदिति** । तस्य टेर्डिति लोप इति स्वातन्त्र्येणैवार्थो नतु तद्धित इत्येतदेकवाक्यतयेति भावः । **अत-**

+ ३. १. ११. – ४. १. ४.

अथवा डिदौकारः करिष्यते× । औ ङिच्च घेः ।

आङो नाऽस्त्रियाम् ॥ ७ । ३ । १२० ॥

किमर्थमस्त्रियामित्युच्यते नाऽऽङो ना पुंसीत्येवोच्येत । का रूपसिद्धिः त्रपुणा जतुना । नुमा सिद्धम्+ । नैवं शक्यम् । इह हि अमुना ब्राह्मणकुलेनेति मुभावस्यासिद्धत्वान्नुम्न स्यात् । अस्त्रियामिति पुनरुच्यमाने न दोषो भवति । कथम् । वक्ष्यत्येतन्न मु टादेश इति* ।

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् । पादश्च समाप्तः ॥

प्र०—अतद्धितानां डित्करणसामर्थ्यात् । यथैव ह्यभस्य लोपो भवत्येवमतद्धितेष्वपि ।

आङो । **किमर्थमिति** । आङो ना पुंसीत्युच्यमाने मात्रालाघवं भवतीष्टं च सिध्यतीति प्रश्नः । **नुमेति** । इकोऽचि विभक्तावित्यनेन । **अमुनेति** । पुंसीत्युच्यमाने नपुंसके नाभावो न स्यान्नुमपीग्लक्षणो मुत्वस्यासिद्धत्वान्नास्ति । **न मु टादेश इति** । टाया आदेशष्टायामादेश इत्यनेकविभक्त्यन्तसमासाश्रयेण नाभावे कर्तव्ये ने च परतो दीर्घे मुत्वस्य सिद्धत्वाद्घिलक्षणो नाभावो भवत्यतो दीर्घो यञि सुपि चेति दीर्घत्वं न भवतीति सर्वेष्टसिद्धिः ।

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् । पादश्च तृतीयः समाप्तः ।

उ०—द्धितानामिति पाठे यथाऽतद्धितानां ङा इत्यादीनां डित्करणसामर्थ्यात्सिद्धान्तेऽभत्वेऽपि टिलोपस्तथाऽतद्धितत्वेऽपि भविष्यतीति तदनुवृत्तावपि न क्षतिरित्यर्थः । क्वचित्तु तद्धितानामिति पाठः । यथा ङमतुपादितद्धितेऽभत्वेऽपि लोपस्तथौङादावतद्धितत्वेऽपि लोप इत्यर्थः । क्वचित्तु तत्सामर्थ्यादेवोभयवैकल्येऽपि ङादौ लोप इति बोध्यम् ।

आङो नाऽ० । ननु नमुन इत्यस्य तन्त्रेण नाभावे नकारे च कृते कर्तव्ये च मुत्वं नासिद्धमित्यर्थान्नपुंसके नुमा सिद्धमित्यत आह—भाष्ये **वक्ष्यत्येतदिति** । एवं च वार्तिकैकवाक्यतया सूत्रेऽपि नाभावे कृते कर्तव्य इत्येवार्थ इति भावः । किंचैवमस्मै कुलाय अमू कुले इत्याद्यसिद्धिः । न मु न इति सूत्रविषये पूर्वं विभक्तिनिमित्तकार्याप्रवृत्तौ मुत्वे तस्य नकारविषये कमपि प्रत्यसिद्धत्वाभावेन विभक्त्यादेशं प्रत्यसिद्धत्वेऽपि वा परत्वेन नुमापत्तेरिति सर्वेष्टसिद्धिः ।

इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकं पादश्च समाप्तः ।

+ ६. ४. १४३. + ७. १. ७३. * ८. २. ३.

णौ चङ्युपधाया ह्रस्वः ॥ ७ । ४ । १ ॥

अथ णिग्रहणं किमर्थं न चङ्युपधाया ह्रस्व इत्येवोच्येत । चङ्युपधाया ह्रस्व इतीयत्युच्यमाने अलीलवत् अर्पीपवत् ऊकारस्यैव ह्रस्वत्वं प्रसज्येत । नैतदस्ति प्रयोजनम् । वृद्धिरत्र बाधिका भविष्यति* । वृद्धौ तर्हि कृतायामौकारस्यैव ह्रस्वत्वं प्रसज्येत । नैतदस्ति । अन्तरङ्गत्वादत्रावादेशो भविष्यति+ । न हीदानीं ह्रस्वभाविन्युपधा भवति । तस्माण्णिग्रहणं कर्तव्यम् ।

प्र०— **णौ चङ्युपधायाः** । **अथ णिग्रहणमिति** । ह्रस्वग्रहणादुपधाग्रहणाच्च चङा णिराक्षिप्तो नद्यण्यन्तानां चङि ह्रस्वभागुपधाऽस्ति । ह्रस्वश्रुत्या ह्यच्परिभाषोपस्थानादच उपधाया ह्रस्वेन भाव्यम् । न श्रिद्रुस्रुधेट्स्त्र्वीनामजुपधा । कमिगुप्योस्तु ह्रस्व एवोपधा । तत्र णावन्तरङ्गत्वाद्वृद्ध्यादिषु कृतेषु चङ्युपधा ह्रस्वभाङ् नास्तीति सामर्थ्याच्चङि यः प्रत्ययस्तस्मिन्नुपधाया ह्रस्वो विज्ञास्यत इति प्रश्नः । इतरो यथाश्रुतसंभवाच्चङि यः प्रत्यय इत्यध्याहारो न युक्त इति वचनादन्तरङ्गमपि वृद्ध्यादि ह्रस्वो बाधेतेति मत्वाऽऽह—**चङ्युपधाया इति** । इतरस्तु चङि यः प्रत्ययस्तस्मिन्नुपधाया इत्यध्याहारेण सूत्रार्थसंभवादयुक्ताऽन्तरङ्गबाधेति मत्वाऽऽह—**वृद्धिरत्रेति** । इतरो ह्रस्वस्यानवकाशतां मत्वाऽऽह—**औकारस्येति** । नन्वेवं वृद्धिरनर्थिका स्यात् । एतदेव तर्ह्युच्यते वृद्ध्याऽत्र न भाव्यमभ्युपगम्य तु वृद्धिरुच्यते । **वृद्धौ तर्हि कृतायामिति** । अपवादत्वाद्धि ह्रस्वो वृद्धेर्बाधक आवादेशस्य चेति भावः । इतरो वाक्याध्याहारेण ह्रस्वस्य सावकाशतां मत्वाऽऽह—**नैतदस्तीति** । इतरो यथाश्रुतसंबन्धसंभवादनवकाशतामेव मत्वाऽऽह—**नहीदानीमिति** । ननु वृद्धिं बाधित्वा भवतूकारस्य ह्रस्वस्तस्मिस्तु कृते बाधितत्वान्मा भूद्वृद्धिः । गुणस्तु केन

उ०— **णौ चङि०** । **ह्रस्वग्रहणादिति** । ह्रस्वविधानादित्यर्थः । विधेयसमर्पकह्रस्वग्रहणेन तल्लिङ्गाच्चपरिभाषोपस्थानादिति यावत् । **वृद्ध्यादिष्विति** । आदिनाऽवादि । अदीदपदित्यादौ पुक् च । **चङि यः प्रत्यय इति** । स च णिरेवेति णिग्रहणमनर्थकमित्यर्थः । **यथाश्रुतेति** । अनुपसंजातविरोधन्यायादिति भावः । अयमेव सिद्धान्त्याशयः । भाष्य **ऊकारस्यैवेति** । न त्वपीपचदित्यादाविति भावः । **नन्वेवमिति** । यद्यौकारस्य ह्रस्व उकारस्तर्हि प्रतिपत्तिगौरवपरिहारायोकारस्य ह्रस्वोऽस्त्वित्याशयः । अत्र वदन्ति—वृद्धिशास्त्रमर्थवदेवान्यत्र । अत्र प्रवृत्तिरपि पर्जन्यन्यायेनेति चिन्त्यमिदम् । **वृद्ध्याऽत्र न भाव्यमिति** । **आवादेशस्य चेति** । वृद्धिबाधद्वारेति भावः । (× **अपवादत्वाद्धीति** । क्रमेण संस्कारे वृद्धिप्राप्तिकाले ह्रस्वाप्राप्त्या चिन्त्यमिदम् । पदसंस्कारे तु वक्तुं शक्यं परंतु भाष्यस्य क्रमसंस्काराभिप्रायेण प्रवृत्तिर्लक्ष्यते । ह्रस्व-

---

* ७. २. ११५. + ६. १. ७८.

× धनुश्चिह्नान्तर्गतो ग्रन्थः स. ग. पुस्तकस्थः ।

नेति ब्रूयात्। एवं वा वृद्धेर्लोपो बलीयानिति। अथवाऽऽरभ्यते पूर्वविप्रतिषेधो ण्यलोपाविय‌ङ्चण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धमिति+। तस्मादुपसंख्यानं कर्तव्यमिति।

नाग्लोपिशास्वृदिताम्॥ ७। ४। २॥

अग्लोपिप्रतिषेधानर्थक्यं च स्थानिवद्भावात्॥ १॥

अग्लोपिप्रतिषेधश्चानर्थकः। किं कारणम्। स्थानिवद्भावात्। स्थानिवद्भावादत्र ह्रस्वत्वं न भविष्यति। यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः। क्व स्थानिवद्भावो नास्ति। यो हलचोरादेशः। अत्यरराजत्* । किं पुनः कारणं हलचोरादेशो न स्थानिवदित्युच्यते। अजादेशः स्थानिवदित्यु-

---

प्र०—**अथवेति**। हलिकल्योरत्वनिपातनमेव ज्ञापकं लोपात्पूर्वं वृद्धिर्भवतीति। णिलोपस्तु वाचनिकेन पूर्वविप्रतिषेधेन वृद्धेः पूर्वं भवति। एवं पटुमारूयदपपटदिति सन्वद्भाव प्रसङ्गात्प्रत्याहारग्रहणमेव ज्ञापकमाश्रयणीयम्। तेन वृद्धेः प्राग्लोपो विधेयः।

नाग्लोपि०। अग्लोपीति। मालामाख्यदसमालदित्यादौ टिलोपस्य स्थानिवत्त्वादनुपधात्वात्प्राप्तिरेव ह्रस्वस्य नास्तीति प्रतिषेधोऽनर्थकः। ननु प्रतिषिध्यते तत्र स्थानिवत्त्वं क्ङिलुगुपधात्वचङ्परनिर्ह्रासकुत्वेष्विति। नैतदस्ति। यदर्थः स प्रतिषेधस्तस्य णेर्णिच्युपसंख्यानमित्यनेन साधितत्वान्न वक्तव्यः। **हलचोरादेश इति**। यथा सुधातुरकङ्ङ चेत्यादेशे समुदायेऽवयवस्यानादेशत्वादणो रपरत्वं न भवति। **सौधातकिरिति**। तथा समुदाये स्थानिन्यवयवस्यास्थानित्वादजादेशत्वाभावान्नास्ति स्थानिवद्भावः। **किं पुनरिति**। अवयवात्मकत्वात्समुदायस्य तस्मिन्स्थानिन्यवयवानामपि स्थानित्वादजादेशत्वान्न्याय्य एव स्थानिवद्भावः। तथा सदृग्दृश्य इति ऋस्थानिकत्वाश्रयमणो रपरत्वं भवतीति भावः। इतरः पूर्वोक्तेनैवाभिप्रायेणाऽऽह—**अजादेश**

उ०—**एवमिति**। भाष्ये—**तस्मादुपसंख्यानमिति**। यत्तु ण्याकृतिर्निर्देष्टव्येति। तन्न। जातेः पौर्वापर्याभावेन चङ्पर इति विशेषणेनात्र व्यक्तिपक्षस्यैवाऽऽश्रयणात्। किंच तदाश्रयणे विषयसप्तम्या एव आर्धधातुक इति सूत्र आकर उक्ततया वृद्ध्यादीनामन्तरङ्गत्वं प्रागुक्तम्, ओणेर्क्रदित्करणस्य ज्ञापकत्वं च भज्यतेत्याहुः।

नाग्लोपिशा०। अनुपधात्वादिति। ह्रस्वभाविन उपधात्वाभावादित्यर्थः। **यदर्थ इति**। ण्यन्तप्रकृतिकण्यन्तार्थः। फलान्तरं तु नास्त्येव तस्य। तथाप्रयोगानभिधानात्। एतदेव ध्वनयितुमत्रेदमुपसंख्यानम्। तद्वा कर्तव्यमिदमेवेति तात्पर्यकम्। **अवयवस्यानादेशत्वादिति**। समुदाये गुणभूतत्वादिति भावः। भाष्ये 'किं पुनरित्यादिस्थानिवदिति' इत्यन्ता शङ्का। उच्यत इत्याद्युत्तरम्। **अवयवानामपि स्थानित्वादिति**। गुणानामपि प्रधानकार्याविरोधेन कार्यप्रवृत्त्यङ्गीकारादिति भावः।

+ ६. ४. ४८. * ६. ४. १५५.

च्यते× न चायमत्र एवाऽऽदेशः । किं तर्हि । अचश्चान्यस्य च । अग्लोपिनां नेत्यपि तर्हि प्रतिषेधो न प्राप्नोति । किं कारणम् । अग्लोपिनां नेत्युच्यते न चात्रागेव लुप्यते । किं तर्हि । अक् चान्यश्च । योऽत्राग्लुप्यते तदाश्रयः प्रतिषेधो भविष्यति । यथैव तर्हि योऽत्राग्लुप्यते तदाश्रयः प्रतिषेधो भवत्येवं योऽत्राज्लुप्यते तदाश्रयः स्थानिवद्भावो भविष्यति । एवं तर्हि सिद्धे सति यदग्लोपिनां नेति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्य इत उत्तरं स्थानिवद्भावो न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । पूर्वत्रासिद्धे न स्थानिवदित्युक्तं + तन्न वक्तव्यं भवति । यद्येतज्ज्ञाप्यते आदीधयतेरादीधकः आवेकयतेरावेकः यीवर्णयोर्दीधीवेव्योः [७. ४. ५३] इति लोपो न प्राप्नोति । इह च यत्मलुनीह्यत्र तिङि चोदात्तवति [८. १. ७१] इत्येष स्वरो न प्राप्नोति ।

प्र०—इति । इतरस्त्वनुमीयमानोऽवश्याश्रयितव्यः स्थान्यादेशभाव इति मत्वाऽऽह—अग्लोपिनामिति । इत उत्तरमिति । पञ्चपाद्यामित्यर्थः । पूर्वत्रासिद्धे इति । तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति वक्तव्यमेव । यद्वा ज्ञापकज्ञापिता विधयोऽनित्या इति संयोगादिलोपलत्वणत्वेषु स्थानिवद्भावो भवत्येव । अचः परस्मिन्नित्यत्र विचारितं हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोप एकादेश इत्यादि तत्र निर्णीतं हलचोरादेशो न स्थानिवदिति । इह तु प्रतिषेधवचनमर्थान्तरज्ञापनायोक्तमिति ग्रन्थविरोधस्तस्मान्न्यायाश्रयेण हलचोरादेशो न स्थानिवदित्यथं पक्षो ग्राह्यः । इह त्वभ्युपेत्य स्थानिवत्त्वं ज्ञापकत्वमाश्रितम् । शिष्यबुद्धिव्युत्पादनायास्थितोऽपि पक्षः क्वचिदुपन्यस्यत इत्येवं विरोधः परिहार्यः । अग्लोपग्रहणसामर्थ्याच्च समुदायलोपोऽप्यग्लोप आश्रीयते । केवलाग्लोपे प्रतिषेधस्याऽऽनर्थक्यात् । खट्वश्यं इत्यत्र त्वेकः पूर्वपरयोरित्यवयवावेव शब्देन चोदिताविति रपरत्वं प्रवर्तते । तदुक्तम्—यो ह्युभयोः षष्ठीनिर्दिष्टयोः स्थाने भवति लभतेऽसावन्यतरव्यपदेशमिति । आदीधक इति । दीधी णिच् । दीधीवेवीटामिति गुणवृद्धिप्रतिषेधस्ततो ण्वुलि णिलोपे कृते तस्य स्थानिव-

---

उ०—अत्र दृष्टान्तमाह—तथा चेति । अनुमीयमान इति । समुदायद्वाराऽवयवानामित्यर्थः । नान्वित उत्तरं स्थानिवत्त्वाभावज्ञापनेऽपि ह्रस्वे कथं स्थानिवत्त्वाभावोऽत आह—पञ्चपाद्यामित्यर्थ इति । अर्थान्तरज्ञापनायेति । तद्विरुद्धार्थान्तरेत्यर्थः । इह त्वभ्युपेत्येति । एवं चेदं भाष्यं प्रौढ्येति भावः । अस्थितपक्षाश्रयणे फलमाह—शिष्यबुद्धीति । अग्लोपिनां नेत्यपि तर्हि प्राप्नोतीत्यारभ्य एकदेशयुक्तिरिदं भाष्यमिति तत्त्वम् । प्रकृतेऽनग्लोपेऽप्यग्लोपित्वाश्रयणे बीजमाह—अग्लोपिग्रहणसामर्थ्यादिति । आनर्थक्यादिति । मालामास्यदमालदित्यादेरनभिधानमिति भावः । खट्वश्यं इत्यादौ रपरत्वोपपत्तिमाह—खट्वश्यं इत्यत्र त्विति । स्थानिवद्भावाभावादिति । इत उत्तरत्र

× १. १. ५७. + १. १. ५८.

नैष दोषः। यत्तावदुच्यते आदीधयतेरादीधकः आवेवयतेरावेवकः यीवर्णयोरिति लोपो न प्राप्नोतीति यीवर्णयोरित्यत्र वर्णग्रहणसामर्थ्याद्भविष्यति। यदप्युच्यते यत्प्रलुनीह्यत्र तिङि चोदात्तवतीत्येष स्वरो न प्राप्नोतीति बहिरङ्गे यणादेशोऽन्तरङ्गः स्वरोऽसिद्धं बहिरङ्गमन्तरङ्गे।

भ्राजभासभाषदीपजीवमीलपीडामन्यन्तरस्याम् ॥ ७। ४। ३ ॥

काण्यादीनां चेति वक्तव्यम्। के पुनः काण्यादयः। काणिराणिश्राणि-

---

प्र०—द्भावाभावाद्यीवर्णयोरिति लोपो न प्राप्नोति। यद्यप्यन्तरङ्गत्वाल्लोपः सिध्यति तथाऽपि वर्णग्रहणस्यानन्यार्थस्य प्रयोजनाख्यानायोपक्षेपः। **यत्प्रलुनीह्यत्रेति**। तिङ्ङतिङ इति निघातो निघातैर्यद्यदीति निषिद्धः। हेरपित्त्वादाद्युदात्तत्वान्न विकरणस्वरो लसार्वधातुकस्वरं बाधत इति स्वराभावस्तत्र यणादेशे कृत उदात्तत्वाभावात्स्थानिवत्त्वाभावाच्च निघातो न प्राप्नोति। **वर्णग्रहणसामर्थ्यादिति**। वर्णग्रहणाद्भूतपूर्वगतिराश्रीयते। अन्तरङ्गत्वात्तु लोपे सिद्धे वर्णग्रहणं शक्यमकर्तुम्। तत्तु केचिज्ज्ञापकं वर्णयन्त्युत्तरत्र स्थानिवत्त्वाभावस्य। अग्लोपिग्रहणं तु सति प्रयोजने न ज्ञापकमस्यार्थस्य। **अन्तरङ्गः स्वर इति**। यद्यप्युभयं पदद्वयाश्रयं तथाऽपि पूर्वमुपसर्गेण संबन्धः पश्चादधिकरणवाचिनाऽत्रशब्देनेति यणादेशो बहिरङ्गः।

भ्राज०। काण्यादीनां वेति। आदिशब्दः प्रकारे। येषां ह्रस्वविकल्पो दृश्यते ते काण्यादयः। काणिराणिश्राणिहेठिलोट्प्रभृतयः।

उ०—स्थानिवत्त्वाभावज्ञापनादित्यर्थः। **तथाऽपीति**। एतदतिरिक्तप्रयोजनाभावबोधनायेति भावः। ननु हेः पित्त्वादनुदात्तत्वमत आह—**हेरिति**। ननु सति शिष्टत्वात्सार्वधातुकस्वरं बाधित्वा विकरणस्वरः स्यादिति कथं हेरुदात्तत्वमत आह—**न विकरणेति**। सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इत्युक्तेरिति भावः। भाष्ये **वर्णग्रहणसामर्थ्यादिति**। अयं भावः। यीवर्णयोरित्यत्र परसमाहारद्वंद्वगर्भेतरेतरयोगः। यकार इकारे वर्णे च परत इत्यर्थः। तत्र संनिहितत्वाद्वर्णशब्देनेवर्ण एव। एतत्सामर्थ्याल्लुप्तेऽपि तस्मिन्भूतपूर्वगत्या लोपः। अत एवाचः परस्मिन्नित्यत्राऽऽदीध्य इति भाष्यप्रयोगः संगच्छते। वस्तुतस्त्वन्तरङ्गत्वेन णिलोपात्पूर्वं यीवर्णयोरिति लोपे नेदमस्य फलं तदाह—**अन्तरङ्गत्वात्त्विति**। इत उत्तरं स्थानिवत्त्वाभावज्ञापनपरं पूर्वभाष्यं त्वेकदेश्युक्तिरित्युक्तमेव कैयटेन ध्वनितं च। एतेन वर्णग्रहणसामर्थ्याच्छ्रूयमाणे वर्ण एव लोपः। तेनाऽऽदीध्यक इत्येवेति हरदत्तोक्तमपास्तम्। भाष्यविरोधात्। तस्मात्सिद्धान्ते न्यायप्राप्तार्थानुवादकमेव वर्णग्रहणमिति तत्त्वम्। **तथाऽपि पूर्वमुपसर्गेणेति**। तदर्थेनेत्यर्थः। विशिष्टक्रियावचनस्य पदस्य पदान्तरेण संबन्धादिति भावः। एवं चान्तरङ्गसंबन्धार्थकोपसर्गनिमित्तकं कार्यमन्तरङ्गमिति तात्पर्यम्।

भ्राजभासभाष०। काण्यादीनां संनिवेशेन काप्यपाठादाह—**प्रकार इति**। प्रकारः सादृश्यम्। केन रूपेणेत्यत्त आह—**येषामिति**। प्रभृतय इत्यनेन भाष्यो-

भाणिहेठिलोपयः । अचकाणत् अचीकणत् । अरराणत् अरीरणत् । अशश्राणत् अशिश्रणत् अबभाणत् अबीभणत् । अजिहेठत् अजीहिठत् । अलुलोपत् अलूलुपत् ।

दयतेर्दिगि लिटि ॥ ७ । ४ । ९ ॥

इह अवदिग्ये अवदिग्याते अवदिग्यिरे दिग्यादेशे कृते द्विर्वचनं प्राप्नोति* तत्र साभ्यासस्येति वक्तव्यम् । ननु च द्विर्वचने कृते साभ्यासस्य दिग्यादेशो भविष्यति । न सिध्यति । किं कारणम् ।

दिग्यादेशस्य परत्वात्साभ्यासस्याऽऽदेशवचनम् ॥ १ ॥

दिग्यादेशः क्रियतां द्विर्वचनमिति परत्वाद्दिग्यादेशेन भवितव्यम् । तत्र साभ्यासस्येति वक्तव्यम् ।

एवं तर्हि दिग्यादेशो द्विर्वचनं बाधिष्यते । पुनःप्रसङ्गविज्ञानाद्द्विर्वचनं प्राप्नोति ।

प्र०— दय० । **दिग्यादेशे कृत इति** । यद्यपि प्राप्ते द्विर्वचने दिग्यादेश आरभ्यते तथाऽपि बाध्यबाधकभावे द्वैतं लक्षणं वा लक्षणेन बाध्यते लक्ष्यं वा । तत्र यदा द्विर्वचनशास्त्रं दिग्यादेशशास्त्रेण बाध्यते तदा दिग्यादेशे कृते नास्ति द्विर्वचनप्रसङ्गः । यदा तु लक्ष्यं बाध्यते तस्य द्विर्वचनं दिगिना बाध्यते दिगेस्तु तत्प्राप्नोति शास्त्रस्याबाधितत्वात् । ततश्च यथा चख्यावित्यादौ ख्याऽऽदेशे कृते द्विर्वचनं भवत्येवं दिग्यादेशे कृते प्राप्नोति । **साभ्यासस्येति** । तेन कृते द्विर्वचने दिग्यादेशो न पुनर्द्विर्वचनं भवति सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात् । साभ्यासग्रहणसामर्थ्याच्च । **ननु चेति** । पूर्वविप्रतिषेधाल्लक्ष्यसिद्धय इष्टक्रमाश्रयणाद्वेति भावः । **न सिध्यतीति** । विप्रतिषेधे परं कार्यमित्यस्मिन्व्यवस्थाहेतौ सत्येष क्रमो दुर्लभः । तत्र द्विर्वचनस्यावकाशः पपाठेति । कृते द्विर्वचने दयतिसद्भावाद्दिग्यादेशस्य । अकृते तु द्विर्वचन उभयप्रसङ्गे परत्वाद्दिग्यादेशः । **एवं तर्हीति** । नाप्राप्ते द्विर्वचने दिग्यादे-

---

उ०—क्तामामुपलक्षणत्वं ध्वनयति । अत्र मानं चिन्त्यम् ।

दयतेर्दिगि । **लक्ष्यमिति** । विधेयं कार्यमित्यर्थः । **नास्ति द्विर्वचनेति** । शास्त्रस्य बाधितत्वेन पुनःप्रवृत्त्ययोगादिति भावः । **तस्य द्विर्वचनमिति** । दय तेरित्यर्थः । लक्ष्यभेदाल्लक्षणभेद इति भावः । तत्र दृष्टान्तमाह—**ततश्च यथेति । सकृत्प्रवृत्त्येति** । आदेशकृतलक्षणभेदानाश्रयणादिति भावः । तत्र मानमाह—**साभ्यासग्रहणेति** । चो हेतौ । ननु परत्वाद्दिग्यादेशे कथिते पुनरेवं तर्हीत्यादिना तत्कथनं पुनरुक्तमत आह—**नाप्राप्त इति** । कृते द्विर्वचन आदेश अवकाश इति त्व-

---

* ६. १. ८.

पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यम् । पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यमेतद्भवति*। तद्यथा । अमादिषु कृतेषु पुनःप्रसङ्गाच्छिशीलुग्नुमो न भवन्ति । एवं दिग्यादेशे कृते पुनःप्रसङ्गाद्द्विर्वचनं न भविष्यति । अथवा विप्रतिषेधे पुनःप्रसङ्ग इत्युच्यते विप्रतिषेधश्च द्वयोः सावकाशयोरिह पुनरनवकाशो दिग्यादेशो द्विर्वचनं बाधिष्यते । यदि तर्ह्यनवकाशा विधयो बाधका भवन्ति बभूव भूभावो + द्विर्वचनं बाधेत । सावकाशो भूभावः । कोऽवकाशः । भविता भवितुम् । इह तर्हि चक्षिङः ख्याञ्वा लिटि [२. ४. ५४; ५५] इति

प्र०—शस्याऽऽरम्भात् । इतरस्तद्बुद्धिपरीक्षार्थं विप्रतिषेधाश्रयेण सकृद्गता इत्येवं दिग्यादेशो द्विर्वचनस्य त्वया बाधक उक्त इत्यारोप्य कथयति—**पुनःप्रसङ्गविज्ञानादिति** । इतरोऽप्यभ्युपगम्य तावद्विप्रतिषेधं सकृद्गता इत्याश्रित्याऽऽह—**पुनःप्रसङ्ग इति चेदिति** । यथा यूयं ब्राह्मणकुलानि युवां त्वमित्यमादेशे कृते शिशीलुको न भवन्त्येवं दिग्यादेशे कृते द्विर्वचनाभावः । इदानीं न्याय्यं परिहारमाह—**अथवेति** । क्वचित्पाठः—नैव युक्तः परिहारो विप्रतिषेधे पुनःप्रसङ्ग इति । योऽयं मदुक्तस्यार्थस्य दिग्यादेशो द्विर्वचनं बाधिष्यत इत्यस्य त्वया परिहारोऽभिहितः पुनःप्रसङ्गविज्ञानाद्द्विर्वचनं प्राप्नोतीति स न युक्त इत्यर्थः । **अनवकाशो दिग्यादेश इति** । पूर्वं सामान्यविशेषाश्रयेणाश्रित्योभयोः सावकाशत्वमुक्तम् । इदानीं तु सामान्यविशेषाश्रयेण नाप्राप्ते द्विर्वचन आरभ्यमाणस्य दिग्यादेशस्यापवादत्वमुच्यते । **यदि तर्हीति** । नन्ववश्यमनवकाशेन बाधकेन भाव्यम् । अन्यथा न कश्चिद्बाधकः स्यात् । एवं तर्ह्यनवकाशाभिमता अनवकाशा इत्यर्थो विवक्षितो नैवायमनवकाशः । कृतेऽपि द्विर्वचने प्रवृत्तेः [illegible]तात् । अथ पुनरेवमवश्यनवकाशत्वं मन्यसे तदा लक्ष्यदोषप्रसङ्गः । **बभूवेति** । अस्तेर्भूरिति भूभावः । **सावकाश इति** । यत्र द्विर्वचनाभावः । **इह तर्हीति** । आचख्यावित्यत्र कृतेऽपि द्विर्वचने ख्याञ्वः प्रवर्तनादनवकाशत्वाभावो यदा

उ०—युक्तम् । यस्मिन्नवश्यं प्राप्ते यदारभ्यते तत्तस्य बाधकमित्येव सिद्धान्तात् । तदप्राप्तिविषये चारिताश्यर्थाभाव एव चानवकाशत्वमिति बोध्यम् । तर्हि पुनःप्रसङ्गेत्याद्यग्रिमग्रन्थासंगतिमाशङ्क्याऽऽह—**इतर इति** । **पूर्वं सामान्येति** । असंभव एव स बाधकप्रयोजक इति वार्तिकमते बाधकत्वप्रयोजकतया तमनाश्रित्येत्यर्थः । (× प्रतिलक्ष्यं लक्षणभेदादित्यर्थः । द्विर्वचनावकाशः पपाचेत्युक्तिस्त्वत्र पक्षे नासङ्गता । एतद्विधेयद्विर्वचनसजातीयावकाशमात्रेणैव सावकाशत्वस्यात्र पक्षे वक्तव्यत्वादिति भावः) । **इदानीं त्विति** । सत्यपि संभवे बाधनं भवतीति भाष्यमत इत्यर्थः । **कृतेऽपि द्विर्वचन इति** । इदं चिन्त्यम् । उक्तरीत्या तदध्वनयन्नाह—**अथ पुनरेवमिति** । ख्याआदेशेऽपि सावकाशत्वाभासं दर्शयति—**आचख्यावित्यत्रेति** । वास्तवमर्थमाह—**यदा त्विति** । अयमेव सिद्धान्त इति बोध्यम् । भूभावस्यावकाशत्वाद्यदि परत्वाद्द्वि-

* ७. १. २६; ७२. + २. ४. ५२.

× अयं ग्रन्थः क. पुस्तकस्थः ।

ख्याञ्द्विर्वचनं बाधेत । इह चापि बभूवेति यदि तावत्स्थाने द्विर्वचनं भूभावः सर्वादेशः प्राप्नोत्यथ द्विःप्रयोगो द्विर्वचनं परस्य भूभावे कृते पूर्वस्य श्रवणं प्राप्नोति । नैष दोषः । आर्धधातुकीयाः सामान्येन भवन्त्यनवस्थितेषु प्रत्ययेषु । तत्राऽऽर्धधातुकसामान्ये भूभावे कृते यो यतः प्रत्ययः प्राप्नोति स ततो भविष्यति ।

ऋतश्च संयोगादेर्गुणः ॥ ७ । ४ । १० ॥

संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम् ॥ १ ॥

संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्यम् । किमर्थम् । कृञर्थम् । इहापि यथा स्यात् । संचस्करतुः संचस्करुः । यदि संयोगोपधग्रहणं क्रियते नार्थः संयोगादिग्रहणेन । इहापि सस्वरतुः सस्वरुः संयोगोपधस्येत्येव सिद्धम् ।

प्र०–तु येन नाप्राप्तिन्यायेनानवकाशत्वमभ्युपगम्यते तदा ख्याञ्नि कृते द्विर्वचनाप्रसङ्गः । **सर्वादेश इति** । स्थानिवद्भावादस्तिग्रहणेन ग्रहणात्कार्यकृतत्वाच्च पुनर्द्विर्वचनाभावादिष्टरूपासिद्धिः । **पूर्वस्य श्रवणमिति** । अय दोषो नोत्सर्गापवादपक्ष उपात्तो भूभावस्यावकाशदर्शनेनोत्सर्गापवादभावनिराकरणात । द्वयोस्तु सावकाशयोः परत्वाद् द्विर्वचने कृते बभूवेति न सिध्यतीति प्रतिपाद्यते । **तत्राऽऽर्धधातुकसामान्य इति** । द्विर्वचननिमित्तस्य लिटोऽनुपजातत्वादसति विप्रतिषेधे पूर्व भूभावः पश्चाल्लिटि परतो द्विर्वचनमित्यदोषः । **यो यतः प्राप्नोतीति** । विषयसप्तमीफलं ज्ञापितम् । ख्याञ्विधावपि विषयसप्तम्याश्रीयत इति येन नाप्राप्त इत्यस्य न्यायस्यानवतारात्कृते ख्याञ्नि द्विर्वचन भवत्येव । दिग्यादेशे तु लिटीति परसप्तम्याश्रयणान्नाप्राप्ते द्विर्वचने दिगिरारभ्यमाणस्तं बाधते ।

ऋतश्च । संयोगादेरिति । इहाङ्गाधिकारादङ्गं संयोगाद्याश्रीयते न चस्कृ इत्येतदङ्ग सयोगादि भवतीति भावः । उपधाग्रहणं संयोगस्य देशविशेषोपलक्षणम-

---

उ०–र्वचनं तदाऽप्यनिष्टमिति । भाष्ये **यर्दाति** । तदाशयमाह—**स्थानिवद्भावादिति** । तदेव दर्शयति—**अयं दोष इति** । भाष्ये **परस्य भूभावे कृत इति** । नानर्थक इति परिभाषायामनभ्यासविकार इत्युक्त्याऽभ्यासस्यानर्थकत्वेऽप्युत्तरखण्डस्यानर्थकत्वे मानाभाव इति भावः । प्रत्ययाव्यवहितप्राग्वर्तिनः सर्वत्रार्थवत्त्वदर्शनेन तत्त्यागे मानाभाव इति तात्पर्यम् । **फलमिति** । तेन भव्यमित्यादौ ण्यन्न भवति । **परसप्तम्याश्रयणादिति** । लक्ष्यानुरोधेन क्वचित्पररात्तमी क्वचिद्विषयसप्तमीत्यर्थः ।

ऋतश्च सं० । ननु चस्कृ इत्यत्र स्कृ इत्यस्य संयोगादित्वाल्लिट्परत्वात्किं संयोगोपधग्रहणेनेत्यत आह—**इहेति** । नन्वलमात्रस्योपधात्वेन संयोग उपधा यस्येति सामानाधिकरण्यमनुपपन्नमत आह—**उपधाग्रहणमिति** । अत्र पक्ष उपधाशब्दो गौणः ।

भवेत्सिद्धं सस्वरतुः सस्वरुरिति। इदं तु न सिध्यति संचस्करतुः संचस्करुरिति। किं कारणम्। सुटो × बहिरङ्गलक्षणत्वात्। बहिरङ्गः सुट्। अन्तरङ्गो गुणः। असिद्धं बहिरङ्गमन्तरङ्गे। संयोगादिग्रहणे तु क्रियमाणे संयोगोपधग्रहणमनन्यार्थं विज्ञायते।

ऋतो लिटि गुणाञ्ञ्णिति वृद्धिर्विप्रतिषेधेन ॥ २ ॥

ऋतो लिटि गुणाञ्ञ्णिति वृद्धिर्भवति पूर्वविप्रतिषेधेन *। ऋतो लिटि गुणस्यावकाशः। सस्वरतुः सस्वरुः। ञ्णिति वृद्धेरवकाशः। स्वारकः ध्वारकः। इहोभयं प्राप्नोति। सस्वार दध्वार। ञ्णिति वृद्धिर्भवति पूर्वविप्रतिषेधेन।

पुनःप्रसङ्गविज्ञानाद्वा सिद्धम् ॥ ३ ॥

अथवा पुनःप्रसङ्गाद्गुणे कृते रपरत्वे चात उपधायाः [७. २. ११६] इति वृद्धिर्भविष्यति। नैष युक्तः परिहारः। पुनःप्रसङ्गो नाम स भवति यत्र

प्र०—ल्मात्रस्योपधासंज्ञाविधानात्संयोगस्योपधात्वासंभवात्। अथवा संयोगावयवे संयोगशब्दो वर्तते तस्योपधात्वमस्त्येव। **बहिरङ्गः सुडिति**। पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण साधनं हि क्रियां निवर्तयति तामुपसर्गो विशिनष्टि न चासिद्धस्य विशेषणेन संबन्धो भवति सुट्कात्पूर्व इत्यत्र तूक्तं पूर्वं धातुरुपसर्गेण युज्यत इति। एवं च सुटोऽन्तरङ्गत्वात्सिद्धो गुण इति नार्थ उपसंख्यानेन। संस्कुर्षीष्ट संस्क्रियत इत्यत्र त्विड्गुणयोः प्रतिविधेयम्। **अनन्यार्थमिति**। कृत्रर्थमेवेत्यर्थः। तत्र वचनादसिद्धत्वं बाध्यते। यथाऽन्यत्रोक्तमाश्रयात्सिद्धत्वं यथा रोरुत्व इति। **पुनःप्रसङ्गविज्ञानाद्वेति**। अस्तु परविप्रतिषेधेन गुणस्तस्मिन्कृते वृद्धिर्भविष्यति। अनाश्रित्य लक्षणभेदं च वृद्धिमेकत्वेनाऽऽश्रित्यैतदुक्तम्। **पुनःप्रसङ्गो नामेति**। वाचोयुक्तिरेवेयं न संगच्छते लक्षणद्वयस्य परस्परप्रतिषेधादप्रवृत्तौ प्राप्तायां विप्रतिषेधे परं

उ०—उत्तरत्र संयोगशब्द इति विशेषः। **साधनेन**। तत्प्रयुक्तकार्येण लिङादिना। एवं च तावत्येव निमित्तसद्भावाद्गुणप्राप्तिरन्तरङ्गा पश्चादुपनतोपसर्गसापेक्षः सुट् बहिरङ्ग इत्यर्थः। **साधनम्**। तत्प्रयुक्तकार्यम्। **क्रियां निर्वर्तयति**। बोधयति। पदस्यैवार्थबोधकत्वादित्यर्थः। **न चासिद्धस्य**। शब्दादनुपस्थितस्य। **उपसर्गेणेति**। तद्द्योत्यार्थेनेत्यर्थः। एवं हि तत्र भाष्यं पूर्वं धातुरुपसर्गेणेति न सारं पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण। सत्यमेवमेतत्। यस्त्वसौ धातूपसर्गयोरभिसंबन्धस्तमभ्यन्तरं कृत्वा धातुः साधनेन युज्यते। एवं च सुट् सर्वतोऽन्तरङ्गतरक इति। **एवं चेति**। संयोगादिलविवक्षयेन संयोगादित्वादेव गुणसिद्धेरिति भावः। **प्रतिविधेयमिति**। तच्च सुट्कादिति सूत्र उक्तं चिन्त्यमेतदिति। न च जाग्र इति सूत्रे गुणे कृत उपधावृद्धिर्नेति णलग्रहणेन ज्ञापनान्नोषः। तस्य जागृमात्रविषयत्वात्। अत एव कृधात्वादौ भाव-

---

× ६. १. १२५ १२९. * ७. २. ११५.

तेनैव कृते प्राप्नोति तेनैव चाकृते । अत्र खलु गुणे कृते रपरत्वे चात उपधाया इति वृद्धिः प्राप्नोत्यकृते चाचो ङ्णितीति । तस्मात्सुष्ठूच्यत ऋतो लिटि गुणाङ्ङ्णिति वृद्धिर्विप्रतिषेधेनेति ।

शृदृप्रां ह्रस्वो वा ॥ ७ । ४ । १२ ॥

किमर्थं ह्रस्वो वेत्युच्यते न गुणो वेत्युच्येत । तत्रायमप्यर्थो गुणग्रहणं न कर्तव्यं भवति । प्रकृतमनुवर्तते । क्व प्रकृतम् । ऋतश्च संयोगादेर्गुणः [१०] इति ।

ऋतो ह्रस्वत्वमित्त्वप्रतिषेधार्थम् ॥ १ ॥

ऋतो ह्रस्वत्वमुच्यत इत्त्वप्रतिषेधार्थम् । इत्त्वं × मा भूदिति । गुणो वेतीयत्युच्यमाने गुणेन मुक्त इत्त्वं प्रसज्येत । ह्रस्वो वेत्युच्यमाने ह्रस्वेन मुक्ते यथाप्राप्तो + गुणो भविष्यति ।

प्र०—कार्यमित्यनेन परस्मिन्कार्ये विहिते निमित्तसंभवात्पूर्वस्य लक्षणस्य पुनः प्राप्तिः पुनःप्रसङ्ग उच्यते न त्वपूर्वलक्षणप्राप्तिः पुनःप्रसङ्गः । **तस्मादिति** । ननु यदि नाम पुनःप्रसङ्गवाचोयुक्तिर्न घटते किमेतावता गुणरपरत्वयोः कृतयोरुपधावृद्धिर्नहि न प्राप्नोति सत्यां च प्राप्तौ किं पूर्वविप्रतिषेधाश्रयेणेत्यत्र चिन्त्यमेतत् ।

शृदृ० । **न गुणो वेत्युच्यतेति** । गुण एव पूर्वसूत्रेण नित्य प्राप्तौ विकल्पनीयस्तत्र गुणपक्षे विशशरतुरित्यादि भविष्यति तदभावपक्षे तु यणादेशेन विश्रुतुरित्यादीति भावः । **तत्रायमर्थाति** । न केवल गुणविधानप्रकरणमनुसृतं भवति यावल्लाघवमपीत्यर्थः । **इत्त्वं प्रसज्येतेति** । वार्णादाङ्ग बलीय इति वर्णाश्रयमन्तरङ्गमपि यणं बाधित्वेत्त्व स्याद्ध्रस्वविधाने तु गुणादेशः सिध्यति । विशशृवान् । विदृद्वान् । विपपृवानिति क्रसौ च सिध्यति । गुणविकल्पे त्वेतद्रूपासिद्धिः । क्रसोः कित्त्वेन प्रतिषेधविषयस्यापि गुणस्य प्रतिषेधः प्रदेशान्तरे भाष्यकृता प्रदर्शितः । उत्तरार्थं च ह्रस्वग्रहण कर्तव्यमिति लाघवमपि नास्ति । ह्रस्वविधावप्युत्तरत्र ह्रस्वविधानादेकप्रकरणता भवतीति नास्ति पूर्वोक्तो विशेषः ।

उ०—कर्मणोः परत्वाद्गुण उपदेशग्रहणाच्चिण्वद्भावे कारिष्यत इत्यादौ वृद्धिरुदाहृता भाष्यकारेण । अचो ङ्णितीति सूत्रेऽपि स्पष्टमेवोक्त भाष्ये । तस्मान्नैष युक्तः परिहार इत्यादि भाष्यमेकदेश्युक्तिरिति तात्पर्यम् । (× पुनःप्रसङ्गविज्ञानादित्यस्यायमर्थ.—पुनर्गुणप्रवृत्त्युत्तरं वृद्धेः शास्त्रान्तरेण प्रसङ्गस्य विज्ञानादिति । एतदजानत एकदेशिनोऽग्रिमग्रन्थ इति बोध्यम्) । वस्तुतस्तु गुण कृत्वा वृद्धौ प्रक्रियागौरवात् । परशब्दस्येष्टवाचितयाऽस्यापि सूत्रेणैव संग्रहात् । सुष्ठूच्यत इत्युक्तिर्भाष्य इति बोध्यम् ।

शृदृप्रां । अपिशब्दार्थमाह—**न केवलमिति** । ह्रस्वविधान त्विति । इत्त्वस्य निमित्ताभावादित्यर्थः । **क्रसोः कित्त्वेनेति** । यद्यपि गुणे सत्यपीष्टं न सिध्यति तथाऽपि तदप्राप्तावपीष्टसिद्धिरित्यर्थः ।

× ७ १. १००. + ७. ४. ११

× धनुश्चिह्नान्तर्गतोऽयं ग्रन्थः स. ग पुस्तकस्थः ।

केऽणः ॥ ७ । ४ । १३ ॥

केऽणो ह्रस्वत्वे तद्धितग्रहणं कृन्निवृत्त्यर्थम् ॥ १ ॥

केऽणो ह्रस्वत्वे तद्धितग्रहणं कर्तव्यम् । किं प्रयोजनम् । कृन्निवृत्त्यर्थम् । कृति मा भूत् । राका धाकेति। तत्तर्हि वक्तव्यम् । न वक्तव्यम्। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ।

उपसर्गाद्ध्रस्व ऊहतेः ॥ ७ । ४ । २३ ॥

इह कस्मान्न भवति । प्रोह्यते उपोह्यते । एकादेशे कृते व्यपवर्गाभावात् । एवमपि आ ऊह्यते ओह्यते समोह्यत इत्यत्र प्राप्नोति । अण इति÷ वर्तते ।

एतेर्लिङि ॥ ७ । ४ । २४ ॥

एतेर्लिङ्युपसर्गात् ॥ १ ॥

प्र०— **उपसर्गात्** । **प्रोह्यत इति** । अकृत एकादेशे ह्रस्वभावाभावयोर्विशेषाभावादन्तरङ्गत्वाच्च प्रागेकादेशेन भाव्यम् । वार्णादाङ्गमित्येतत्तु समानाश्रयाङ्गवार्णविषयं तस्मादेकादेशे कृतेऽन्तादिवद्भावेन ह्रस्वप्रसङ्गश्चोह्यते । **एकादेशे कृत इति** । उपसर्गात्परस्योहतेर्ह्रस्वो विधीयमान एकादेशे कृते भेदाभावाद्भेदनिबन्धनपौर्वापर्यानुपपत्त्योभयत आश्रयेऽन्तादिवद्भावाभावाच्च ह्रस्वत्वाभावः । **आ ऊह्यत इति** । धातूपसर्गयोरसंहिता नास्ति । तदुक्तम्- संहितैकपदे नित्या नित्या धातूपसर्गयोरिति । एवं च लौकिके प्रयोगे विग्रहाभावान्नित्येनैकादेशेन भाव्यम् । एवं च आ उह्यत इति ये ह्रस्वं पठन्ति ते न सम्यङ्न्यायविदः । लौकिकप्रयोगसंपादनाय हि ह्रस्वो विधीयते । तस्मादलौकिकेन प्रक्रियावाक्येनाकृतह्रस्वेनाऽऽङा प्रश्लेषप्रदर्शनमात्रं क्रियतेऽथ त्वलौकिके प्रक्रियावाक्ये ह्रस्वत्वप्रतिपत्तिरुच्यते, तथाऽपि न काचित्क्षतिः । तत्रैकादेशस्याऽऽदिवद्भावाद्गृह्यग्रहणेन ग्रहणात्समः परस्य ह्रस्वत्वप्रसङ्गः। **अण इति वर्तत इति** । एवं च रूपाश्रयोऽयं विधिरिति तादृप्यानातिदेशादणत्वाभावाद्ह्रस्वाभावः ।

उ०—**उपसर्गाद्ध्रस्व०** । **समानाश्रयेति** । अनित्यत्वात्तदनाश्रित्यैकदेश्युक्तिरियमिति तत्त्वम् । यद्यपि वास्तवं पौर्वापर्यं नास्ति तथाऽप्यन्तादिवच्चेति शास्त्रबोधितमार्थसमाजग्रस्तमस्त्येवेत्यत आह—**उभयत इति** । **आ ऊह्यत इति** । ह्रस्वपाठनिगकरणायाऽऽह— **धातूपसर्गयोरिति** । **लौकिकप्रयोगसंपादनायेति** । नहि ह्रस्वप्रवृत्तिमात्रेण लौकिकप्रयोग्रसंपत्तिरिति भावः । **तस्मादलौकिकेनेति** । अन्तरङ्गत्वेनैकादेशस्यैव युक्तत्वेन तत्र ह्रस्वोऽयुक्त इति भावः । न्यायत एव ह्रस्वस्यायुक्तत्वमुच्यते । दोषस्तु नास्त्येवेत्याह—**अथ त्विति** । चिन्त्यमिदम् । लक्ष्ये लक्षणस्येति न्यायेन पुनर्ह्रस्वाप्राप्तेः । उक्तयुक्त्या ह्रस्वस्याप्रवृत्तेश्च । एवं चाणग्रहणानुवृत्तिरप्येकदेशिन एव । **अणत्वाभावादिति** । अण् च सर्वत्र पूर्वेणैवाणुदित्सूत्रं वर्जयित्वेति सिद्धान्तः ।

÷ ७. ४. १३.

एतेर्लिङ्चुपसर्गादिति वक्तव्यम् । इह मा भूत् । ईयात्* । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । उपसर्गादिति+ वर्तते । एवं तर्ह्याचार्योऽन्वाचष्ट उपसर्गादित्यनुवर्तत इति । नैतदन्वाख्येयमधिकारा अनुवर्तन्त इति । एष एव न्यायो यदुताधिकारा अनुवर्तेरन् ।

रीङृतः ॥ ७ । ४ । २७ ॥

दीर्घोच्चारणं किमर्थं न रिङृत इत्येवोच्येत । का रूपसिद्धिः मात्रीयति पित्रीयति । अकृत्सार्वधातुकयोरिति* दीर्घत्वं भविष्यति । एवं तर्हि सिद्धे सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाऽङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति । किमेतस्य ज्ञापने प्रयोजनम् । पिबेर्गुणप्रतिषेधश्चोदितः× स न वक्तव्यो भवति ।

यङि च ॥ ७ । ४ । २९ ॥

यङ्प्रकरणे हन्तेर्हिंसायामीट् ॥ १ ॥

प्र०— **एतेः । ईयादिति** । आशिषि लिङ् । अकृत्सार्वधातुकयोर्दीर्घः । **नैतदन्वाख्येयमिति** । वार्तिककारेण नैतदन्वाख्येयं सर्वाधिकाराणामन्वाख्यानप्रसङ्गात् । वृत्तिकारास्त्वधिकाराणां प्रवृत्तिनिवृत्ती व्याचक्षते ।

रीङृतः । दीर्घत्वं भविष्यतीति । ननु नाप्राप्ते दीर्घे रिङारभ्यमाणस्तस्य बाधकः स्यात । नैतदस्ति । ऋवर्णस्य बाध्यतां रिङस्तु कथं बाध्यते । नहि तस्य दीर्घे प्राप्ते स आरभ्यते । ततश्च द्रव्ये पदार्थे रिङि कृते दीर्घः प्रवर्तत एव ।

यङि च । यङ्प्रकरण इति । हिंसायास्त्वन्यत्र जङ्घन्यत इत्येव भवति ।

उ०— **एतेर्लिङि । आशिषि लिङिति** । विधिलिङि दीर्घाभावादाशीर्लिङेव ह्रस्वविषय इति भावः । तदाह—**अकृदिति । वार्तिककारेणेति** । उक्तानुक्तदुरुक्तचिन्तैव हि तत्कार्यम् ।

रीङृतः । द्रव्ये पदार्थ इति । तत्पक्षे रिविषयकदीर्घशास्त्रस्यार्थवत्त्वादिति भावः । वस्तुतो जातिपक्षेऽपि तज्जात्याश्रयसकलव्यक्तिविषयकत्वाज्जात्याश्रयणसामर्थ्यादेव प्रवृत्तिः सुलभेति द्रव्यपक्ष इति चिन्त्यमेव । किंचानवकाशत्वादेत्र बाधकत्वं स्वस्य पूर्वं प्रवृत्तिरूपं तत्र कृते चोत्सर्गो भवत्येव । सति संभव उत्सर्गे कृतेऽपवादप्राप्तियोग्यतायामेवापवादत्वमिति गुणो यङ्लुकोरित्यत्र निरूपयिष्यते । वस्तुतः पिबेरदन्तत्वाद्गुणप्रतिषेधप्रत्याख्यानसंभवेन परिभाषायाः प्रयोजनान्तराभावाच्च दीर्घोच्चारणं स्पष्टार्थमेवेति बोध्यम् ।

यङि च । जङ्घन्यत इति । कुटिलं गच्छतीत्यर्थः । ननूपधालोपेऽनच्क-

---

* ७. ४. २५. + ७. ४. २३ × ७. ३. ७८.

यङ्प्रकरणे हन्तेर्हिंसायामीड्वक्तव्यः। जेघ्नीयते। यदीड्भ्यासरूपं न सिध्यति*। एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायामीक्। एवमप्युपधालोपो न प्राप्नोति । एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायां घ्नी ।

न च्छन्दस्यपुत्रस्य ॥ ७ । ४ । ३५ ॥

अत्यल्पमिदमुच्यतेऽपुत्रस्येति । अपुत्रादीनामिति वक्तव्यम् । इहापि यथा स्यात्÷ । जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः ।

छन्दसि प्रतिषेधे दीर्घप्रतिषेधः ॥ १ ॥

छन्दसि प्रतिषेधे दीर्घत्वस्य+ प्रतिषेधो वक्तव्यः। संस्वेदयुः मित्रयुः ।

न वाऽश्वाघस्याऽऽद्वचनमवधारणार्थम् ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । अश्वाघस्याऽऽद्वचनमवधारणार्थं भविष्यति× । अश्वाघयोरेव च्छन्दसि दीर्घो भविष्यति नान्यस्येति ।

प्र०—**अभ्यासरूपं न सिध्यतीति**। उपधालोपस्य स्थानिवत्त्वाद्धनिति द्विर्वचनं प्राप्नोति। **एवं तर्हीति** । ईको धातुभक्तत्वाद्द्विर्वचननिमित्तत्वाभावात्स्थानिवत्त्वाभावात् । **एवमपीति**। अजादौ प्रत्यये विधानात् । **एवं तर्हीति** । प्रक्रियालाघवाय घकारादेश विधानम्। घ्नीभावविधावभ्यासाच्चेति कुत्वे गौरवप्रसङ्गात् । व्यक्तिपदार्थाश्रयणे च घ्नीभावे कृते द्विर्वचनं प्रवर्तते। आकृतिपक्षे तु दिग्यादेशेनैव घ्नीभावेन द्विर्वचनबाधप्रसङ्गात् ।

न च्छन्द०। **जनीयन्त इति** । जनमिच्छन्तीति क्यच्। लटः शत्रादेशः । जस् उगिदचामिति नुम् । **छन्दसीति** । आनन्तर्यादीत्त्वस्यैव प्रतिषेधः प्राप्नोति । ततश्चापवादेऽपनीत उत्सर्गो दीर्घः प्राप्नोतीति तस्यापि प्रतिषेधो विधेयः । **संस्वेदयुरिति** । क्यीच्छन्दसीत्युप्रत्ययः । **न वेति** । अश्वाघयोरनेनेत्त्वे प्रतिषिद्धेऽकृत्सार्वधातुकयोरित्याकारे सिद्धे पुनरादुचनं नियमार्थमित्यन्येषामाकारो न भवति ।

उ०—त्वादभ्यास एव दुर्लभोऽत आह—**उपधालोपस्येति** । ईटः प्रत्ययभक्तत्वेन द्वित्वनिमित्ताज्ञनिमित्तत्वादुपधालोपस्येत्यर्थः । नन्वीक्यपि स्थानिवत्त्वेन हन एव द्वित्वेऽभ्यासरूपासिद्धिस्तदवस्थेत्यत आह—**ईक इति** । **अभ्यासाच्चेति** । न च परत्वादन्तरङ्गत्वाच्च द्वित्वात्प्राग्घो हन्तेरिति न्याय्यम् । अङ्गापेक्षत्वेन समतया नित्यत्वात्पूर्वं द्वित्वे परत्वाद्घो हन्तेरिति बाधित्वाऽभ्यासाच्चेति प्रवर्तत इत्याशयात् । **व्यक्तीति** । घ्नीभावविषयकद्वित्वशास्त्रस्याचारितार्थ्येनेति भावः । घ्नीभावे कृत इत्यस्य परत्वादित्यादिः । वस्तुतोऽत्र यङीति विषयसप्तमीति चरव्यावित्यादाविव द्वित्वमिति बोध्यम् ।

न च्छन्दस्यपु० । **जनमिच्छन्तीति** । जनीमिच्छन्तीति व्याख्यानं तु भाष्यविरुद्धम् । **दीर्घ इति** । अकृत्सार्वधातुकत्वेन ।

---

* ६. ४. ९८; १. १. ५९. ÷ ७. ४. ३२. + ७. ४. २५. × ७. ४. ३७.

---

१ ख. ग. उपलक्षणमेतत्। अन्तरङ्गत्वाद्द्वित्वात्प्राग्घो हन्तेरित्यस्य न्याय्यत्वात्।

शाच्छोरन्यतरस्याम् ॥ ७ । ४ । ४१ ॥
श्यतेरित्त्वं व्रते नित्यम् ॥ १ ॥

श्यतेरित्त्वं व्रते नित्यमिति वक्तव्यम् । संशितव्रतः । तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

देवत्रातो+ गलो÷ ग्राह× इतियोगे च सद्विधिः+ ।
मिथस्ते न विभाष्यन्ते गवाक्षः * संशितव्रतः ॥

प्र०— **शाच्छो०** । **श्यतेरिति** । **व्रत इति** । विषयो निर्दिश्यते न तूत्तरपदं तेन संशितो ब्राह्मण इत्यत्रापि नित्यमित्त्वं भवति । यद्येवमित्त्वेन व्रतस्य द्योतितत्वात्संशितव्रत इति व्रतशब्दप्रयोगो न प्राप्नोति । नैष दोषः । अन्यत्रापीत्त्वविधानात् । सशितशब्दः सामान्यशब्द इति विशेषप्रतिपादनायाविरुद्धो व्रतशब्दप्रयोगः । व्रते तु नित्यमित्त्वं विधीयते । **न वक्तव्यमिति** । साधारणेन न्यायेन सिद्धत्वादत एव तुल्यधर्मणः शब्दानुपन्यस्यति । **देवत्रात इति** । नुदविदोन्दत्रेति नत्वं संज्ञायां न भवति । देवग्रहणं संज्ञाविषयोपलक्षणार्थम् । तेन भवत्त्रात इत्यादावपि संज्ञात्वान्नत्वाभावः । यदा तु क्रियाशब्दस्त्राणं त्रातमिति तदा नत्वविकल्पः । **गल इति** । अचि विभाषेति लत्वं प्राण्यङ्गे नित्यं भवति । विषे तु गर इति लत्वाभावः । क्रियाशब्दे तूभयं भवति गरो गल इति । **ग्राह इति** । विभाषा ग्रह इति णप्रत्ययो जलचरे नित्यं भवति । ज्योतिषि पचाद्यजेव ग्रह इति । **इतियोग इति** । लक्षणहेत्वोः क्रियाया इति शतृशानज्विधिर्हन्तीति पलायते वर्षतीति धावतीत्यादाविति प्रयोगे न भवति । **मिथ इति** । एकस्मिन्विषये न विकल्प्यन्ते किंतु विषयभेदेन । एतच्चाऽऽकृतिपक्ष उपपद्यते । तत्र हि सर्व लक्ष्यमेकध्यमापाद्योभयमुपदिश्यते ततश्चोभयं भवतीत्येतावतैव लक्षणस्य व्यापारः । असकीर्णत्वं तु प्रयोगवशात्प्रतीयते । **गवाक्ष इति** । वातायनेऽवङ् स्फोटायनस्येति नित्यमवङ् भवति प्राण्यङ्गे तु गोराक्षि गोक्षीति । भवत्यन्यत्र तु विकल्पेन । एतच्चोदाहरण न व्यवस्थितविभाषाणां परिगणनम् । अन्यासामपि संभवात् ।

उ०— **शाच्छो०** । श्लोके सशितव्रत इति निर्देशाद्व्रतमुत्तरपदमिति भ्रमं निवर्तयति—**तिषय इत्यादि** । **संशितो ब्राह्मण इति** । नियमविशेषे यत्नवानुच्यते । **विशेषप्रतिपादनायेति** । प्रकरणादिना विशेषप्रतीतौ तु क्वचिदप्रयोगोऽपि । **न्यायेन** व्यवस्थितविभाषारूपेण । **संज्ञायामिति** । क्तिच्क्तौ च सज्ञायामिति क्तः । **ज्योतिषि** । रविगुर्वादिरूपे । क्रियाशब्दे तूभयं बोध्यम् । ऐकध्यमेकरूपत्वम् । बुद्ध्या युगपदभिसमीक्ष्येत्यर्थः । व्यक्तिपक्षे प्रतिलक्ष्यं लक्षणभेदादेकत्रैव विषये भावाभावौ प्राप्नुत इति जातिपक्षाश्रयः । व्यक्तिपक्षेऽपि लक्ष्यानुरोधात्तत्तद्व्यक्तिविषयकलक्षणानुपपत्त्व इति वक्तुं शक्यमिति बोध्यम् । जातिपक्षेऽपि लक्ष्यानुसार एवाऽऽवश्यक इति बोध्यम् । **अन्यत्र** । गवाङ्गं गोङ्गमित्यादौ । **अन्यासामपीति** । अजेर्वीति सूत्रे भाष्ये तस्य व्यवस्थितविभाषात्वकथनात् ।

+ ८. २. ५६. — ८, २. २१. × ३. १. १४३. + ३. २. १२६. * ६. १. १२३.

दो दद्घोः ॥ ७ । ४ । ४६ ॥

अवदत्तं विदत्तं च प्रदत्तं चाऽऽदिकर्मणि।
सदुत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

किं पुनरयं तकारान्त आहोस्विद्दकारान्त उत धकारान्तोऽथवा थकारान्तः। **कश्चात्र विशेषः।**

तान्ते दोषो दीर्घत्वं स्यात्।

यदि तकारान्तो दस्ति [६. ३. १२४] इति दीर्घत्वं प्राप्नोति।

दान्ते दोषो निष्ठानत्वम्।

अथ दकारान्तो रदाभ्यां निष्ठात इति+ नत्वं प्राप्नोति।

धान्ते दोषो धत्वप्राप्तिः।

अथ धान्ते झषस्तथोर्धोऽधः [८. २. ४०] इति धत्वं प्राप्नोति।

थान्तेऽदोषस्तस्मात्थान्तः।

अथ थकारान्तो न दोषो भवति।

प्र०— दो दद् । **अवदत्तमिति** । आदिकर्मग्रहणं प्रदत्तशब्दस्यैव संभवाद्विशेषणमवदत्तादिसिद्ध्यर्थत्वाद्वचनस्यावदत्तादयोऽपि भवन्ति। तथा चाच उपसर्गात्त इत्यस्यावकाशः प्रत्तमवत्तमिति वक्ष्यते। तस्मान्निदत्तमिति चेष्यत इति चशब्देनावदत्तादयोऽपीष्यन्त इति सूच्यते। **किं पुनरिति** । यद्यपि दकारः श्रूयते तथाऽपि संहितायां तकारादीनामप्येतस्य रूपस्य संभवात्प्रश्नः। **तान्ते दोष इति** । यदा द इत्येतस्य यस्तकारान्त आदेशस्तत्र दीर्घ इति सूत्रार्थस्तदाऽयं दोषो यदा तु तकारादौ दादेशे दीर्घस्तदा न दोषः। **तस्मात्थान्त इति** । संनिपातपरिभाषाश्रये तु दान्तधान्तयोर्न दोषः।

उ०— दो दद् । **अवदत्तादिसिद्ध्यर्थत्वादिति**। अच उपसर्गादिति तत्वे प्राप्त एतत्सिद्धिबोधनार्थमेवेदं नतु तन्निवृत्त्यर्थमिति भावः। अत एव वचने चकारबाहुल्यम्। तैश्च तस्यापि संग्रह इत्याहुः। **संनिपातेति**। नच नत्वधत्वयोरसिद्धत्वादस्या अप्रवृत्तिः। असिद्धत्वविषयेऽप्यस्याः प्रवृत्तेः कृन्मेजन्तसूत्रे भाष्ये ध्वनितत्वात्। किंच पूर्वत्र कर्तव्येऽसिद्धत्वेऽपि कृते तस्मिन्नस्यासिद्धत्वे मानाभावः। किंचाऽऽतिदेशिकनिमित्तविघाताभावमादायास्या अप्रवृत्तौ गौरीत्यादौ संबुद्धिलोपे स्थानिवद्भावेन ह्रस्वनिमित्तविघाताभावात्संनिपातपरिभाषयाऽतिव्याप्तिपरकृन्मेजन्तसूत्रस्थभाष्यासंगतिः। नच संनिपातस्यांशास्त्रीयत्वान्न तत्र स्थानिवत्त्वमिति चेदसिद्धत्वेऽपि तुल्यम्। किंच तस्य स्थानिवत्त्व आर्थसमाजग्रस्तः संनिपातः। अन्यथा हे त्रपो इत्यत्र न लुमतेति निषेधानित्यत्वेऽपि गुणो दुर्लभ एव स्यात्। भाष्यकृतस्त्वयं भावः—जग्ध-

---

+ ८. २. ४२.

अच उपसर्गात्तः॥ ७। ४। ४७॥

अच उपसर्गात्तत्व आकारग्रहणम् ॥ १ ॥

अच उपसर्गात्तत्व आकारग्रहणं कर्तव्यम् । न कर्तव्यम् । अलोऽन्त्यस्य विधयो भगवन्तीत्याकारस्य भविष्यति+ । न सिध्यति । किं कारणम् ।

आदर्हि परस्य ॥ २ ॥

अत्र हि तस्मादित्युत्तरस्याऽऽदेः परस्य [१. १. ६७; ५४] इति दकारस्य प्राप्नोति । नैष दोषः ।

अवर्णप्रकरणात्सिद्धम् ॥ ३ ॥

अस्येति वर्तते । क्य प्रकृतम् । अस्य च्वौ [३२] इति । यद्यवर्णग्रहणमनुवर्तते दद्धावे* दोषो भवति । एवं तर्ह्येवं वक्ष्यामि दोऽद्धोरिति । दो य आकारस्तस्याद्भवति । ततोऽच उपसर्गात्तः । अस्येत्येव । एवमपि सूत्रभेदः कृतो भवति । नासौ सूत्रभेदः । सूत्रभेदं कमुपाचरन्ति । यत्र तदेवान्यत्सूत्रं क्रियते भूयो वा । यद्धि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेदः । अथवा द्वितकारको निर्देशः क्रियते सोऽनेकाल्शित्सर्वस्य [१. १. ५५] इति सर्वस्य भविष्यति । इहापि तर्हि प्राप्नोति । अद्भिः अद्भ्य इति× । अच इति वर्तते तच्चावश्यमज्ग्रहणमनुवर्त्य लवाभ्यामित्येवमर्थम्÷ । अथवा त्रितकारको निर्देशः करिष्यत इहार्थौ द्वावुत्तरार्थश्चैकः ।

प्र०— **अच उप०** । **यदीति** । दाशब्दाकारस्य दद्धावे दत्तमिति संयोगादि श्रूयेत । **नासौ सूत्रभेद इति** । दोषायेति शेषः । तदेव सूत्र लघु क्रियमाणं प्रत्युत गुण सपादयति । **अथवेति** । लघुकरणेऽपि यदि न्यासान्तरत्वात्स्पष्ट एव सूत्रभेद इति मत तदेवमुत्तरम—अलोऽन्त्यस्य द्वावपवादावादेः परस्यानेकाल् शित्सर्वस्येति तयोर्विप्रतिषेधे परं प्रवर्तते । **अच इति वर्तत इति** । तेनाप्शब्दस्य योऽच् तस्मात्परस्य पकारस्य द्वितकार आदेशस्तत्रान्त्यस्य झलां जशोऽन्त इति जश्त्वं पूर्वस्य झलां जश्झशीति । **लवाभ्यामिति** । लृञ् क्रदोरवित्यप् । अस्यापि भकारादौ त्रः प्राप्नोति । अज्ग्रहणानुवृत्तौ त्वप्शब्दस्य योऽच् तस्मात्परो भकारादौ न कश्चिदस्तीति त्रत्वाभावः । **अथवेति** । तत्र तकारद्वयात्मक आदेशः **पृथग्विभक्तिक**

उ०—मित्यादौ धत्वसिद्धये तादिकित्संनिपातनिमित्तकस्य तद्विघातकविधिप्रवर्तकत्वाय तद्विषये तदनित्यत्वमावश्यकमित्येतत्सूत्रस्थथकारनिर्देश एव तज्ज्ञापक इति चेति दिक् ।

अच उप० । नन्वसावपि सूत्रभेद एवेत्यत आह—**दोषायेति** । ननु त्रितकारकनिर्देशे त्रयाणामप्युभयत्र सबन्धः स्यादितीष्टविभागालाभोऽत आह—**तत्रेति** । **पृथग्विभक्तिक इति** । त इत्यपेक्षयेत्यर्थः । संयोगान्तलोपस्तु नाद्ङ्वत् । नन्वेवमुत्तरत्राज्ग्रहणानुवृत्तौ लवाभ्यामिति दोषः स्यादत आह—**लवाभ्यामित्यादौ चेति** ।

+ १. १. ५२. * ७. ४. ४६. × ७. ४. ४८. — ३. ३. ५७.

द्यतेरित्त्वादचस्तः ॥ ४ ॥

द्यतेरित्त्वादचस्त इत्येतद्भवति विप्रतिषेधेन । द्यतेरित्त्वस्यावकाशः× । निर्दितम् निर्दितवान् । अचस्त इत्यस्यावकाशः । प्रत्तम् । अवत्तम् । इहोभयं प्राप्नोति । नीत्तम् । वीत्तम् । अचस्त इत्येतद्भवति विप्रतिषेधेन ।

अपो भि ॥ ७ । ४ । ४८ ॥

अपो भि मासश्छन्दसि ॥ १ ॥

अपो भीत्यत्र मासश्छन्दस्युपसंख्यानं कर्तव्यम् । माद्भिरिष्ट्वा इन्द्रो वृत्रहा । अत्यल्पमिदमुच्यते ।

स्ववस्स्वतवसोर्मास उषसश्च त इष्यते ।

स्ववद्भिः स्वतवद्भिः । समुषद्भिरजायथाः । माद्भिरिष्ट्वा इन्द्रो वृत्रहा ।

सनि मीमाघुरभलभशकपतपदामच इस् ॥ ७ । ४ । ५४ ॥

इस्त्वं सनि राधो हिंसायाम् ॥ १ ॥

इस्त्वं सनि राधो हिंसायामिति वक्तव्यम् । प्रतिरित्सति । हिंसायामिति किमर्थम् । आरिरात्सति ।

आप्ज्ञप्यृधामीत् ॥ ७ । ४ । ५५ ॥

प्र०—इहार्थो यस्तु साच्चकस्तकारस्तस्याचः स्वरितत्वप्रतिज्ञानादुत्तरत्रानुवृत्तिः । लवाभ्यामित्यादौ तु तत्वं न भवति । पकारलोपादप्शब्दाभावात् । नच भूतपूर्वगत्याश्रयो न्याय्यः । अद्भिरित्यादौ सांप्रतिकाप्शब्दसंभवे गौणस्याग्रहणादत एव समकक्षत्वाभावात्प्रत्ययाप्रत्ययथोः प्रत्यये संप्रत्यय इति नावतिष्ठते । अद्भिः संस्कृतमिति लिङ्गाद्वा । नहि प्रत्ययस्यैव ग्रहणेऽद्भिरिति निर्देशोपपत्तिः । **द्यतेरित्त्वादिति** । पुरस्तादपवादा इति न्यायादित्त्वं दद्भावस्यैव बाधकं न तत्वस्य । ततश्चेत्त्वतत्वयोर्दद्भावापवादयोर्विप्रतिषेधे परं तत्वं प्रवर्तते ।

अपो भि । **माद्भिरिति** । पद्भ्नोमासितिं मासशब्दस्य मासादेशस्य च्छन्दस्येव विधानान्मासश्छन्दसीति च्छन्दोग्रहणं न कर्तव्यम् । तत्क्रियमाणं भाषायामपि क्वचित्पदादयः प्रयुज्यन्त इति ज्ञापनायेत्याहुः ।

आप्ज्ञ० । **ज्ञपेरिति** । इहाज्ग्रहणमनुवर्तते तेन ज्ञपौ विशेष्यमाणेऽजन्तस्य

उ०—**नावतिष्ठत इति** । तस्याः सिद्धान्तिना क्वाप्यनाश्रयणाच्चेत्यपि बोध्यम् । ननु द्यतेरित्त्वं दद्भावस्येव तत्वस्याप्यपवाद इति कथं विप्रतिषेधोऽत आह—**पुरस्तादिति** ।

अपो भि । **छन्दस्येवेति** । वृत्तिकृतोक्तां छन्दसीत्यनुवृत्तिमभ्युपेत्येदम् ।

आप्ज्ञप्० । नन्वच इत्यनुवर्तनादनन्त्यस्यैव भविष्यतीत्यत आह—**इहेति** ।

× ७. ४. ४०.

ज्ञपेरीत्त्वमनन्त्यस्य ॥ १ ॥

ज्ञपेरीत्त्वमनन्त्यस्येति वक्तव्यम् । ज्ञीप्सति । तर्तार्हि वक्तव्यम् । न वक्तव्यम् । लोपो*ऽन्त्यस्य बाधको भविष्यति । अनवकाशा विधयो बाधका भवन्ति सावकाशश्च णिलोपः । कोऽवकाशः । कारणा हारणा । एवमपीत्त्वमन्त्यस्य लोपस्य बाधकं स्यात् । अनवकाशा हि विधयो बाधका भवन्तीत्त्वमपि सावकाशम् । कोऽवकाशः । अनन्त्यः । कथं पुनः सत्यन्त्येऽनन्त्यस्येत्त्वं स्यात् । भवेद्योऽचाऽङ्गं विशेषयेत्तस्यानन्त्यस्य न स्याद्वयं तु खल्वङ्गेनाचं विशेषयिष्यामः । अङ्गस्याचो यत्र तत्रस्थस्येति । एवमप्युभयोः सावकाशयोः परत्वादीत्त्वं प्राप्नोति तस्मादनन्त्यस्येति वक्तव्यम् ।

अत्र लोपोऽभ्यासस्य ॥ ७ । ४ । ५८ ॥

अभ्यासस्यानचि ॥ १ ॥

अभ्यासस्येति यदुच्यते तदनचि द्रष्टव्यम् । पतापतः चराचरः वदावदः+ ।

प्र०—ज्ञपेरीत्त्वं विधीयमानमलोऽन्त्यस्य प्राप्नोतीति भावः । **लोपोऽन्त्यस्येति** । ज्ञपिनाऽज्विशेष्यते यथाऽऽपृधिभ्यामेवं चैकप्रस्थानो विशेषणविशेष्यभावो भवति तत्रानन्त्यस्याचः सावकाशमीत्त्वं पूर्वविप्रतिषेधेन णिलोपो बाधते । इतरस्त्वगृहीताभिप्राय आह—**अनवकाशा इति** । ईत्त्वमेव त्वनवकाशत्वाद्बाधकं प्राप्नोति । **एवमपीति** । नन्वस्तु परत्वादीत्त्वं तस्य स्थानिवद्भावाण्णिलोपो भविष्यति । ईत्त्ववचनं त्वनन्त्यस्य श्रवणार्थं स्यात् । नैतदस्ति । सकृद्गतौ विप्रतिषेधे यद्बाधितमिति लोपाप्रसङ्गात् ।

अत्र लोपः । चराचर इति । चरिचलिपतिवदीनामच्याकृ चाभ्यासस्येति द्विर्वचनमागागमश्चेति हलादिशेषोऽत्र न भवति । नन्वागागमविधानसामर्थ्याद्धलादिशेषो न भविष्यति । नहि हलादिशेष आगमस्याऽऽदेशस्य वा विशेषोऽस्तीत्यादेश एवाऽऽकारो विधेयः स्यात् । नैतदस्ति । सत्यपि हलादिशेषे विगृहीतश्रवणार्थमाग्विधानं स्यादित्यनर्चीत्युच्यते ।

उ०—ननु येन नेति न्यायेनान्त्यस्येत्त्वं लोपस्य बाधकं स्यादत आह—**ज्ञपिनेति** । **यथाऽऽपिति** । तयोरजन्तत्वासंभवादिति भावः । **पूर्वविप्रतिषेधेनेति** । ण्यल्लोपावित्यनेन तत्र दीर्घग्रहणेनास्यापि ग्रहादिति भावः । **ईत्त्वमेवेति** । नतु लोपस्य बाधकत्वं युक्तमित्यर्थः । भाष्य एवमपीत्त्वमित्यस्येवामित्त्वमेवेत्यर्थः । अपिशब्दस्यैवकारार्थस्य स्थानव्यत्ययात् । **स्यादिति** । यदि तु पूर्वप्रतिषेधवार्तिक ईत्त्वमपि दीर्घग्रहणेन गृह्यते पुनःप्रसङ्गविज्ञानमाश्रीयते तदेदं न वक्तव्यमिति बोध्यम् ।

अत्र लोपोऽ० । विगृहीतेति । सवर्णदीर्घबाधनद्वारेत्यर्थः । तत्प्रवृत्तिकाल एव वैयर्थ्योपस्थितेरिति भावः ।

---

* ६. ४. ५१. + ६. १. १२.

हलादिः शेषः ॥ ७ । ४ । ६० ॥

किमयं षष्ठीसमासः । हलामादिर्हलादिः हलादिः शिष्यत इति । आहोस्वित्कर्मधारयः । हलादिर्हलादिः हलादिः शिष्यत इति । कश्चात्र विशेषः ।

हलादिशेषे षष्ठीसमास इति चेदजादिषु शेषप्रसङ्गः ॥ १ ॥

हलादिशेषे षष्ठीसमास इति चेदजादिषु शेषः प्राप्नोति । आनक्ष आनक्षतुः आनक्षुः । अस्तु तर्हि कर्मधारयः ।

कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावे लोपवचनम् ॥२॥

कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभाव आद्यस्य हलोऽभावे लोपो वक्तव्यः । आटतुः आटुः ।

तस्मादनादिर्लोपः ॥ ३ ॥

तस्मादनादिर्हल्लुप्यत इति वक्तव्यम् ।

उक्तं वा ॥ ४ ॥

किमुक्तम् । प्रतिविधास्यते हलादिशेष इति+ । अयमिदानीं स प्रतिविधानकालः । इदं प्रतिविधीयते । इदं प्रकृतमत्र लोपोऽभ्यासस्य [५८] इति ।

प्र०— हला० । **हलामादिरिति** । विग्रहप्रदर्शनं विस्पष्टप्रतिपत्त्यर्थम् । **अजादिष्विति** । अजादिष्वभ्यासेषु हलन्तरापेक्षयाऽऽदित्वे हल आश्रीयमाणे शेषः प्राप्नोति । **आनक्षेति** । अक्षू व्याप्तौ संघाते चेत्यस्मालिट् । अत्र ककारस्य शेषः प्राप्नोति । **कर्मधारये** त्वभ्यासापेक्षयाऽऽदित्वं हलो विज्ञायत इति शेषो न भवति । **आदिशेषनिमित्तत्वादिति** । शेषशब्दोऽन्यनिवृत्तियुक्तमवस्थानमाहेति यत्रैवाभ्यासे पपाचेत्यादावादेर्हलोऽवस्थानं तत्रैवान्यस्य निवृत्तिः स्यान्नान्यत्र । अवस्थानं हि शब्दार्थत्वात्प्रधानम् । नच प्रधानाभाव आनुषङ्गिककार्यप्रवृत्तिरानक्षेत्यत्रापि ककारषकारयोरस्यामवस्थायां निवृत्त्यप्रसङ्गः । षष्ठीसमासेऽप्याटतुराटुरित्यत्र टकारस्याऽऽदिवद्भावे शेषप्रसङ्गः । स च प्रागुक्त एव । तत्र यद्याकृतिपक्ष आश्रीयते तदाऽभ्यासाकृतौ वर्तमानो हलादिः सर्वस्याभ्यासव्यक्तावनादेर्निवृत्तिं करोतीति दोषाभावो व्यक्तिपक्षे तु यस्यामेवाभ्यासव्यक्तौ हल

उ०— हलादिः शेषः । भाष्ये **हलामादिरिति** । नच न निर्धारण इति निषेधात्स दुर्लभः । त्रितयसंनिधान एव निर्धारणे षष्ठीतत्समासनिषेधयोरङ्गीकारेणादोषात् । एवं च प्रकृते शेषष्ठचेवेति समासो भवत्येवेति भावात् । कथमादिशेषनिमित्तत्वमनादिलोपस्येत्यत आह—**इत्यादि शब्द इति** । **आनुषङ्गिकेति** । सामर्थ्यसिद्धेत्यर्थः । अवस्थितस्यावस्थानविधानं हि सामर्थ्यादन्यनिवृत्तिं फलतीति यत्रैव तत्तत्रैव तत्फलितमपि स्यादित्यर्थः । **अस्यामवस्थायामिति** । कर्मधारयाश्रयण इत्यर्थः । **आदिवद्भाव इति** । आद्यन्तवदित्यनेन । **प्रागुक्त एवेति** । प्रागुक्तोदाहरणन्यायेनोक्त एवेत्यर्थः । के ह्रस्वभावि-

---

+ ६. १. २.

ततो वक्ष्यामि । ह्रस्वः [५९] ह्रस्वो भवत्यादेशः । अभ्यासस्य लोप इत्यनुवर्तते । तत्र ह्रस्वभाविनां ह्रस्वो लोपभाविनां लोपो भविष्यति । ततो हलादिः शेषश्चेति । अथवैवं वक्ष्यामि । ह्रस्वोऽहल् । ह्रस्वो भवत्यभ्यासस्येति । ततोऽहल् अहल्च भवत्यभ्यासः । तत आदिः शेषः । आदिः शेषो भवत्यभ्यासस्येति । अथवा योगविभागः करिष्यते । ह्रस्वादेशो भवत्यभ्यासस्य । ततो हल् । हल्च लुप्यतेऽभ्यासस्य । तत आदिः शेषः । आदिः शेषश्च भवत्यभ्यासस्य ।

शर्पूर्वाः खयः ॥ ७ । ४ । ६१ ॥

शर्पूर्वशेषे खर्पूर्वग्रहणम् ॥ १ ॥

शर्पूर्वशेषे खर्पूर्वग्रहणं कर्तव्यम् । खर्पूर्वाः खयः शिष्यन्ते खरो लुप्यन्त इति वक्तव्यम् । किं प्रयोजनम् । उचिच्छिषति व्युचिच्छिषति । तुकः श्रवणं

प्र०—आदेरवस्थानं तत्रैवानादेर्निवृत्तिर्नान्यत्रेति दोषप्रसङ्गः । **ह्रस्वभाविनामिति** । ह्रस्वश्रुत्याऽऽपरिभाषोपस्थानादजन्तस्याभ्यासस्य ह्रस्वो विधीयमानोऽलोऽन्त्यस्येत्यचनादच एव दीर्घस्य ह्रस्वस्य च लोपबाधनार्थो विज्ञायत इति हलविषय एवाऽऽदिशेषनिरपेक्षो लोपोऽवतिष्ठते । तत आदेरपि हलो लोपे प्राप्ते **तद्बाधनार्थं हलादिः शेष इति** सूत्रम् । एतदेव ज्ञापकं लोपविधावलोऽन्त्यपरिभाषा नोपतिष्ठत इत्यानक्षेत्यादावनन्त्यस्यापि हलो लोपो भवतीति न कश्चिद्दोषः । **अहल् चेति** । अविद्यमानहल्कोऽभ्यासो भवतीत्यर्थः ।

शर्पूर्वाः । **उचिच्छिषतीति** । उच्छी विवासे । छे चेत्यन्तरङ्गत्वात्तुक् सनू इट् पूर्वत्रासिद्धमिति चुत्वस्यासिद्धत्वात् त्छिशब्दो द्विरुच्यते । तकारस्य शेषे प्राप्ते छशेषार्थं वार्तिकम् । ननु च पूर्वत्रासिद्धीयमद्विर्वचन इति इचुत्वे कृते च्छिशब्दस्य द्विर्वचने चकारशेषेणैव रूपं सिध्यति । न चेदमस्ति निमित्ताभावे नैमित्तिकस्याप्यभाव इति येन चुत्वं निवर्तते । एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इत्येतदनित्यमुभौ साभ्यासस्येति वचनात् । अन्यथा कृतणत्वस्य द्विर्वचने प्राणिणदित्यादि सिध्यतीति किं सूत्रेण । तथा चौजढदित्यसिद्धत्वस्योदाहरणं प्रदर्शयिष्यते । इतरो

उ०—नस्तत्राऽऽह—**ह्रस्वश्रुत्येति** । ह्रस्व इति सूत्रे लोप इत्यनुवर्तनादभ्यासह्रस्वौ लोपश्च विधीयते । तत्र लोपस्य हलविषये चरितार्थस्य ह्रस्वेन स्वीयाजविषये बाध इति भावः । **अजन्ताभ्यासस्येति** । अभ्यासावयवस्याच इति वक्तुं युक्तम् । अन्यथा क्षी इत्यादावेव स्यान्नतु पपाचेत्यादावित्याहुः । **आदिशेषनिरपेक्ष इति** । तेनाऽऽट्टुरित्यादि सिद्धम् ।

शर्पूर्वाः खयः । **न चेदमस्तीति** । पपुत्तस्य निवर्तयितुमशक्यत्वादिति भावः । अनित्यत्वाद्वा तदभावोऽत्र । **प्रदर्शयिष्यत इति** । वृत्तिकारादिभिरिति शेषः । इदं च वार्तिकमपि तदनित्यत्वे ज्ञापकमिति तत्त्वम् । अतूधातोः के निष्पन्नात्कशब्दा-

मा भूदिति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । चर्त्वे* कृते तुग्न भविष्यति । असिद्धं चर्त्वं तस्यासिद्धत्वात्तुक्प्राप्नोति+ । सिद्धकाण्डे पठितमभ्यासजश्त्व-चर्त्वमेवमुकोरिति+ । एवमप्यन्तरङ्गत्वात्प्राप्नोति तस्मात्सर्वपूर्वग्रहणं कर्तव्यम् । न कर्तव्यम् । एत्वतुग्ग्रहणं न करिष्यते । अभ्यासजश्त्वचर्त्वं सिद्धमित्येव ।

आदिशेषप्रसङ्गस्तु ॥ २ ॥

आदिशेषस्तु प्राप्नोति× । तिष्ठासति । ननु चानादिशेष आदिशेषं बाधिष्यते । कथमन्वाख्यायमानस्य बाधकं स्यात् । असति ह्यल्पेऽपि संभवे बाधनं भवत्यसति च संभवे यदुभयं स्यात् । यद्यादिशेषोऽपि भवति शर्पूर्ववचनमिदानीं किमर्थं स्यात् ।

शर्पूर्ववचनं किमर्थमिति चेत्स्वयां लोपप्रतिषेधार्थम् ॥३॥

प्र०—व्यवस्थितस्य समुदायस्य प्रविभज्यान्वाख्यानेऽन्तरङ्गत्वं तुकोऽनपेक्ष्यकृत एव तुकि द्विर्वचनं मत्वाऽऽह—चर्त्वे कृत इति । अभ्यासे चर्चेति चर्त्वे झस्य कृते तुगभावाद्रूपं सिध्यति । असिद्धमिति । तुकि कर्तव्ये । एवमप्यन्तरङ्गत्वादिति । शब्दनित्यत्वेऽप्युपायानामवश्याश्रयणीयोऽन्तरङ्गबहिरङ्गभावः । एत्वतुग्ग्रहणमिति । तदकरणे हलादिशेषेऽपि कर्तव्ये चुत्वलक्षणस्य चर्त्वस्यासिद्धत्वाभावात्तकारस्य चकारे कृते हलादिशेषेण निर्वर्तिते छकारे रूपं सिध्यति । आदिशेषप्रसङ्गस्त्विति । विषयभेदाद्विरोधाभावान्न बाध्यबाधकभावायोगः । शर्पूर्ववचनमिति + अपवादा वाक्यार्थद्वयं

उ०—व्याख्यानाणिचि चङि त्कशब्दस्य द्वित्व आकत्कदिति रूपार्थं वार्तिकमावश्यकमित्यन्ये । तन्न । एतत्प्रत्याख्यानपरभाष्यविरोधेनैषामनभिधानात् । द्विर्वचन इत्यस्य च द्वित्वे कर्तव्ये कृते च इत्यर्थः । अत एव वाक् वाक्क इति भाष्योदाहृतं संगच्छते । अन्यथा चर्त्वस्यासिद्धत्वाद्गस्यैव द्वित्वेऽन्त्यस्य वाऽवसान इति चर्त्वे गश्रवणं स्यात् । किंच कृतेऽपि कस्य द्वित्वे चर्त्वस्यासिद्धत्वाद्ककारे झशि पूर्वस्य जश्त्व उक्तरीत्यैव चर्त्वाभावे मस्य श्रवणं स्यात् । नन्वन्तरङ्गस्तुक् कथमभ्यासचर्त्वं प्रतीक्षेतेत्यत आह—इतर इति । अकृत एव तुकि इति । परत्वमल्पापेक्षत्वरूपान्तरङ्गत्वं चानपेक्ष्येदम् । शब्दनित्यत्वेऽपीति । अन्वाख्येयस्य शब्दस्य नित्यत्वेऽपीत्यर्थः । वाक्यपदरूपश्च स नित्यः । उपायानाम् । तदन्वाख्यायकानां शास्त्रीयाणाम् । अवश्याश्रयणीय इति । अन्यथा क्वचिदप्यन्तरङ्गबहिरङ्गभावो न स्यादिति भावः । चुत्वलक्षणस्येति । तच्छिशब्दस्य द्वित्वेऽभ्यासखण्डे तकारस्थानिकचुत्वेत्यर्थः । 'पूर्वत्रासिद्धीयपदृत्वे' इत्यनेनापि सिद्धेर्व्यर्थमेतदिति बोध्यम । ननु येन नाप्राप्तिन्यायेनास्य हलादिशेषबाधकत्वात्कथमादिशेषप्रसङ्गोऽत आह—विषयभेदादिति । ननु स्वयः शेषविधानार्थत्वात्कथमानर्थक्यं शङ्कितमत आह—अपवादवाक्यार्थद्वयमिति । अपवा-

---

* ८. ४. ५४. + ६. १. ७३. ÷ ८. २. ६. × ७. ४. ६०.

---

१ क. ख. ग. °ख्या न्याख्यमन्वाख्या न ।

शपूर्ववचनं किमर्थमिति चेत्खयां लोपो मा भूदिति।

व्यपकर्षविज्ञानात्सिद्धम् ॥ ४ ॥

व्यपकर्षविज्ञानात्सिद्धमेतत्। किमिदं व्यपकर्षविज्ञानादिति। अपवादविज्ञानात्। अपवादत्वादत्रानादिशेष आदिशेषं बाधिष्यते। ननु चोक्तं कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादिति। इदं तावदयं प्रष्टव्यः। यदि तन्नोच्येत किमिह स्यात्। हलादिशेषः। हलादिशेषश्चेन्नाप्राप्ते हलादिशेष इदमुच्यते तद्बाधकं भविष्यति। यदप्युच्यतेऽसति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यादिति सत्यपि संभवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं बाधकं भवति। एवमिहापि सत्यपि संभवेऽनादिशेष आदिशेषं बाधिष्यते।

दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्धरिभ्रद्दविध्वतो दविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च ॥ ७। ४। ६५॥

दाधर्तीति किं निपात्यते। धारयतेः श्लावभ्यासस्य दीर्घत्वं णिलुक् च। अनिपात्यम्। तूतुजानवदभ्यासस्य दीर्घत्वं× पर्णशुषिवर्णिलुग्भविष्यति। धृङो वाऽभ्यासस्य दीर्घत्वं परस्मैपदं च। अनिपात्यम्। तूतुजानवदभ्यासस्य

प्र०—साधयन्ति। अपवादं च विदधत्युत्सर्गं च निवर्तयन्ति। तत्रोत्सर्गाभ्युपगम एकार्थवद्द्वितीयार्थस्य त्यागादानर्थक्यप्रसङ्ग एवेत्यर्थः। हलादिः शेष इत्यनेन खयां निवृत्तौ प्राप्तायामवस्थानविधानादानर्थक्यं नास्ति। **व्यपकर्षविज्ञानादिति**। व्यपकर्षणमुत्सर्गस्य निवर्तनं तस्य विज्ञानं तस्मादपवादविधानादित्यर्थः। एकाभ्यासविषयत्वादविरोधेऽप्युत्सर्गापवादभावः।

दाधर्त्ति०। **श्लाविति**। बहुलं छन्दसीति शपः श्लुः। **तूतुजानवदिति**। तुजादीनां दीर्घोऽभ्यासस्येति दीर्घत्वमित्यर्थः। **पर्णशुषिवदिति**। यथा पर्णानि शोषयन्ति पर्णशुषो वाता इत्यादौ क्विपि बहुलमन्यत्रापि संज्ञाछन्दसोरिति णिलुक् भवत्येवं दाधर्तीत्यादौ भविष्यतीत्यर्थः। **धृङ् इति**। धृङ् अवस्थान इत्यस्य शे प्राप्ते

उ०—दत्वमेवास्यासिद्धमित्युत्तरवादिन आशयमाह—**हलादिः शेष इत्यनेनेति**। ननु विषयभेदे विरोधाभावे च कथमपवादत्वमत आह—**एकाभ्यासेति**। साक्षात्कार्यिविशेषणत्वादवयवद्वारा तस्यैव कार्यित्वमिति भावः। विषयभेदेऽपि बाधकत्वदर्शनादस्योपयोगश्चिन्त्यः। इदं तावदयं प्रष्टव्य इत्यादिना भेदेनैव बाधकत्वस्योक्तेर्भाष्य इत्यलम्।

दाधर्ति दर्धर्तीति। धृञो ण्यन्तस्य जुहोत्यादिष्वपाठादाह—**बहुलमिति**। **तुजादीनां दीर्घोऽभ्यासस्येति**। तूजानवदिति क्वाचित्कोऽपपाठः। **णिलुगिति**। अत

दीर्घत्वं युध्यातिवत्परस्मैपदं भविष्यति।

दर्धर्तीति किं निपात्यते। धारयतेः स्रावभ्यासस्य रुग्णिलुक्च। आनिपात्यम्। देवा अदुह्रवद्रुट्+ पर्णशुषिवर्णिलुग्भविष्यति। धृङो वाऽभ्यासस्य रुक्परस्मैपदं च। आनिपात्यम्। देवा अदुह्रवद्रुडचुध्यतिवत्परस्मैपदं च भविष्यति।

दर्धर्षीति किं निपात्यते। धारयतेः स्रावभ्यासस्य रुग्णिलुक्च। आनिपात्यम्। देवा अदुह्रवद्रुट्पर्णशुषिवर्णिलुक् च भविष्यति। धृङो वाऽभ्यासस्य रुक्परस्मैपदं च। आनिपात्यम्। देवा अदुह्रवद्रुडचुध्यतिवत्परस्मैपदं च भविष्यति।

बोभूत्विति किं निपात्यते। भवतेर्यङ्लुगन्तस्यागुणत्वं निपात्यते। नैतदस्ति प्रयोजनम्। सिद्धमत्रागुणत्वं भूसुवोस्तिङि [७. ३. ३८] इति। एवं तर्हि नियमार्थं भविष्यति। अत्रैव यङ्लुगन्तस्य गुणो न भवति नान्यत्रेति। क्व मा भूत्। बोभवीतीति।

तेतिक्त इति किं निपात्यते। तिजेर्यङ्लुगन्तस्याऽऽत्मनेपदं निपात्यते। नैतदस्ति प्रयोजनम्। सिद्धमत्राऽऽत्मनेपदमनुदात्तङित आत्मनेपदम् [१.३.१२] इति। नियमार्थं तार्हि भविष्यति। अत्रैव यङ्लुगन्तस्याऽऽत्मनेपदं भवति नान्यत्रेति। क्व मा भूत्। बेभिदीति चेच्छिदीति।

प्र०—व्यत्ययेन शप्। **युध्यतिवदिति**। व्यत्ययो बहुलमित्यनेनेत्यर्थः। **रुडिति**। शीङो रुट् बहुलं छन्दसीत्यनेन। **बोभवतीति**। लिङर्थे लेट्। लेटोऽडाटावित्यट्। **सिद्धमत्रेति**। प्रत्ययलक्षणेन यद्यप्यनुदात्तङित इति ङित्त्वनिमित्तमात्मनेपदं न प्रत्ययनिमित्तं तथाऽपि लोलूयत इत्यादौ यद्यङन्तादात्मनेपदं तत्प्रत्ययस्य ङित्वात्प्रत्ययलक्षणं भवत्येव। **एतन्नियमार्थमिति**। एवं चादादिषु चर्करीतं परस्मैपदमिति

उ०—एव गुणाभावः, प्रकृते वृद्ध्यभावः। भाष्ये **धृङो वेति**। ण्यन्तार्थस्य केवलार्थस्य च प्रयोगेषु प्रतीतेरिति भावः। **व्यत्ययेनेति**। अस्य तुदादित्वादिति भावः। शस्यैव व्यत्ययेन श्लुरित्यन्ये। कैयटमते श्लुरपि च्छान्दसत्वात्कल्प्यः। देवा अदुह्रवदिति भाष्ये पाठः। अदुद्रुवदित्यपपाठः। द्रुधातोश्चङि रूपस्य सत्त्वात्। **अत्रैव यङ्लुगन्तस्येति**। भ्वन्तस्याङ्गस्य गुणो नेत्यर्थ इति भावः। भूसुवोरित्यत्राङ्गस्येति तु निर्बीजम्। न च दीङो युडचीत्याद्यनुबन्धनिर्देशानां भरेत्यादिशपा निर्देशानां श्तिपा निर्देशानां च प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमित्यर्थज्ञापकत्वं श्तिपेत्यादिपरिभाषया भाष्यानादृतत्वात्। यङ्लुगन्तस्य च्छान्दसत्वाच्चेत्याहुः। **प्रत्ययलक्षणेनेति**। न लुमतेति तु न। आत्मनेपदस्याङ्गकार्यत्वाभावात्। **तथाऽपि लोलूयत इति**। प्रत्ययलक्षणसूत्रं विध्यर्थमिति वार्तिककृन्मत इदम्। नियमार्थत्वपक्षे तु प्रत्ययासाधारणरूपानाश्रयणात्। प्रत्ययलक्षणेनाऽऽत्मनेपदाप्राप्तिरेवेति विध्यर्थमेवेदम्।

+ ७. १. ८.

द्युतिस्वाप्योः संप्रसारणम् ॥ ७ । ४ । ६७ ॥

किमर्थं स्वपेरभ्यासस्य संप्रसारणमुच्यते यदा सर्वेष्वभ्यासस्थानेषु स्वपेः संप्रसारणमुक्तम्* ।

स्वापिग्रहणं व्यपेतार्थम् ॥ १ ॥

स्वापिग्रहणं क्रियते व्यपेतार्थम् । व्यपेतार्थोऽयमारम्भः । सुष्वापयिषतीति । अस्ति प्रयोजनमेतत् । किं तर्हीति ।

तत्र क्यजन्तेऽतिप्रसङ्गः ॥ २ ॥

तत्र क्यजन्तेऽतिप्रसङ्गो भवति । इहापि प्राप्नोति । स्वापकमिच्छति स्वापकीयति स्वापकीयतेः सन्सिस्वापकीयिषतीति ।

सिद्धं तु णिज्ग्रहणात् ॥ ३ ॥

सिद्धमेतत् । कथम् । णिग्रहणं कर्तव्यम् । न कर्तव्यम् । निर्देशादेव हि

प्र०—लिङ्गसिद्धानुवादः । परस्मैपदग्रहणं कर्तर्येव चेदमात्मनेपदं नियम्यत इति भावकर्मणोर्यङ्लुगन्तादात्मनेपदं भवत्येव ।

द्युति० । **किमर्थमिति** । स्वपिरेव सौत्रत्वान्निर्देशस्य दीर्घं कृत्वा निर्दिष्ट इति पूर्वः पक्षः । तत्र लिटि किति वचिस्वपीति संप्रसारणविधानात्कृतसंप्रसारणस्य द्विर्वचने सत्यभ्यासस्य संप्रसारण श्रूयते । अकिति लिट्यभ्यासस्येति संप्रसारणं सन्नो रुदविदेति कित्वविधानाद्वचिस्वपीति संप्रसारणम् । स्वपिस्यमिव्येयां यङि इति यङि चङि स्वापेश्चङीति । **व्यपेतार्थमिति** । स्वपेः सनादिषु परतो विहितं संप्रसारणं णिच्च व्यवधाने न प्राप्नोतीति स्वापेर्पण्यन्तस्याभ्यासस्य संप्रसारणं विधीयते । **सुष्वापयिषतीति** । स्वापयितुमिच्छतीति सन् । इङ्गुणायादेशाः । णौ कृतस्य स्थानिवत्त्वात्स्वपो द्विर्वचनमभ्याससंप्रसारणं स्तौतिण्योरिति षत्वम् । इतरस्तु ण्यन्तस्य ग्रहणमबुद्ध्वा येन केनचित्प्रत्ययेन व्यवहितस्य स्वपेरभ्याससंप्रसारणमनेनोक्तमिति मत्वाऽऽह—**अस्ति प्रयोजनमिति** । स्वपितीति स्वापकस्तमिच्छतीति क्यच् । **निर्देशादेवेति** ।

उ०—**लिङ्गसिद्धानुवाद इति** । अनुदात्तङिदादिभ्यो यङ्लुकोऽनभिधान इदं, तत्सत्त्वे तु वचनमेवेदं बोध्यम् । **कर्तर्येवेति** । तुल्यजातीयविषयत्वान्नियमस्येत्यर्थः । अत एव प्रत्ययलक्षणसूत्रस्थनियमपक्षेण न फलभेदः । यदि यङ्लुगन्ताद्भावकर्मणोरभिधानमस्ति तदेदम् ।

द्युतिस्वाप्योः । ननु स्वापीति ण्यन्तग्रहणात्तस्य च लक्षणान्तरेणासिद्धत्वा प्रश्नोऽयुक्तोऽत आह—**स्वपिरेवेति** । वार्तिके व्यपेतशब्देन व्यवहितमुच्यते । वस्तुतो निमित्तत्वप्रयोजकधर्मेभ्यश्च्युतं व्यपेतं तत्त्वं चात्र सनो व्यवहितत्वादकित्त्वाच्च बोध्यम् । **स्वापेर्पण्यन्तस्येति** । अन्यथा ह्रस्वमेवोच्चारयेदिति भावः । **णौ कृतस्येति** । वृद्धि-

---

* ६. १. १५, १७, १८, १९. (१. २. ८.)

व्यक्तं ण्यन्तस्य ग्रहणमिति । नात्र निर्देशः प्रमाणं शक्यं कर्तुम् । यथा हि निर्देशस्तथेहापि प्रसज्येत । स्वापं करोति स्वापयति स्वापयतेः सन्निस्वापविषतीति । तस्माण्णिग्रहणं कर्तव्यम् ।

निजां त्रयाणां गुणः श्लौ ॥ ७ । ४ । ७५ ॥

त्रिग्रहणानर्थक्यं गणान्तत्वात् ॥ १ ॥

त्रिग्रहणमनर्थकम् । किं कारणम् । गणान्तत्वात् । त्रय एव निजादयः ।

उत्तरार्थं तु ॥ २ ॥

उत्तरार्थं तर्हि त्रिग्रहणं कर्तव्यम् । भृञामित् [७६] त्रयाणां यथा स्यात् । इह मा भूत् । जहाति ।

आर्तिपिपर्त्योश्च ॥ ७ । ४ । ७७ ॥

आर्तिग्रहणं किमर्थं न बहुलं छन्दसि [७८] इत्येव सिद्धम् । न ह्यन्त-

---

प्र०—ण्यन्त एव स्वपिः सूत्रे निर्दिष्ट इत्यर्थः । **स्वापं करोतीति** । स्वापेर्घञन्तात्करोतीति णिच् । **तस्माण्णिग्रहणमिति** । स्वपेर्णेरिति वक्तव्यं तेन स्वपेर्यो णिर्विधीयते तदन्तस्य ग्रहणाद्घञन्ताण्णेर्ग्रहणाभावः ।

निजां । **त्रिग्रहणमिति** । वृत्करणपरिच्छिन्नास्त्रय एव निजादय इत्यर्थः । एकारे विधातव्ये गुणग्रहणमिक्परिभाषोपस्थानार्थम् । तेन हलादिशेषे कृते गुणो भवत्यन्यथा तदपवादो हलः स्थान एकारः स्यात् । अथाभ्यासविकारेऽपवादा नोत्सर्गान्बाधन्त इत्याश्रीयते तदा विस्पष्टार्थं गुणग्रहणम् ।

अर्त्ति० । **अर्त्तिग्रहणमिति** । ऋ सृ गताविति जुहोत्यादौ पठ्यते । गा

उ०—रूपस्येत्यर्थः । णावच आदेशः स्थानिवदिति वचनादिति भावः । अस्य प्राप्तिमात्रेणोल्लेखो न त्वत्र फलमस्ति किंचित् । तस्माण्णिग्रहणं कर्तव्यमित्यस्य स्वपेर्ण्यन्तस्य ग्रहणमिति व्याख्येयमित्यर्थः । **ग्रहणाभाव इति** । स्वपिप्रकृतिकण्यन्तस्यैव शीघ्रोपस्थितिकत्वेन द्युतिसाहचर्येण चानामधातोरेव ग्रहणमिति तत्त्वम् । द्युतेस्त्वण्यन्तस्यैव । एवं च वृत्त्याद्युक्तमदिद्युतदिति चिन्त्यमेव । भाष्यानुक्तत्वात् । अभ्यासेनाङ्गेन चाऽऽक्षिप्तप्रत्यययोरैक्य एवैतत्प्रवृत्तेश्च । अत एव द्युतोतकीर्यिषतीत्यादौ न दोष इति बोध्यम् ।

निजां त्र० । **तेनेति** । विषयभेदात् । गुणेन हलादिःशेषानुबाध इति भावः । गुणोत्तरं वा हलादिःशेष इत्यपि बोध्यम् । **विस्पष्टार्थमिति** । लिङ्सिद्धपरिभाषाश्रयणगौरवपरिहारायेत्यर्थः । तदाश्रयणे च हलादिःशेषोत्तरमवशिष्टस्यैकार इति बोध्यम् । भाष्ये—**उत्तरार्थमिति** । कपिञ्जलाधिकरणन्यायस्त्वत्र शास्त्रे नाऽऽश्रीयत इति भावः ।

आर्तिपि० । गणान्तःस्थं छन्दसीति घृप्रभृतीनां सर्वेषां शेष इति पूर्वपक्षः । इत एव ज्ञापकान्न सर्वशेष इत्युत्तरम् ।

रेण च्छन्दोऽर्तेः श्लुर्लभ्यः । एवं तर्हि सिद्धे सति यदर्तिग्रहणं करोति तज्ज्ञापयत्याचार्यो भाषायामर्तेः श्लुर्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । इयर्तीत्येतत्सिद्धं भवति ।

गुणो यङ्लुकोः ॥ ७ । ४ । ८२ ॥

ऐचोर्यङि दीर्घप्रमङ्गो ह्रस्वाद्धि परं दीर्घत्वम् ॥ १ ॥

ऐचोर्यङि दीर्घत्वं प्राप्नोति । डोढौक्यते तोत्रौक्यत इति । ननु च ह्रस्वत्वे कृते दीर्घत्वं न भविष्यति* । न सिध्यति । किं कारणम् । ह्रस्वाद्धि परं दीर्घत्वम् । ह्रस्वत्वं क्रियतां दीर्घत्वमिति किमत्र कर्तव्यम् । परत्वाद्दीर्घत्वेन भवितव्यम् ।

न वाऽभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् ॥ २ ॥

न वैष दोषः । किं कारणम् । अभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् । अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्त इत्येषा परिभाषा कर्तव्या । कान्येतस्याः परिभाषायाः प्रयोजनानि ।

प्रयोजनं सन्वद्भावस्य दीर्घत्वम् ॥ ३ ॥

अचीकरत् अजीहरत् । सन्वद्भावमपवादत्वाद्दीर्घत्वं न बाधते+ ।

मान्प्रभृतीनां दीर्घत्वमित्त्वस्य ॥ ४ ॥

मान्प्रभृतीनां दीर्घत्वमपवादत्वादित्त्वं न बाधते÷ ।

गणेरीत्त्वं हलादिशेषस्य ॥ ५ ॥

गणेरीत्त्वमपवादत्वाद्धलादिशेषं न बाधते× ।

प्र०—स्तुतौ च च्छन्दसीति च्छन्दोग्रहणं पूर्वेषामपि घृप्रभृतीनां शेष इति च्छान्दस एवार्तिः श्लुविषयः । **इयर्तीति** । तिप् । शप् । शपः श्लुः । द्विर्वचनमुरादित्यत्त्वाभित्त्वमभ्यासस्यासवर्ण इतीयङ् गुणरपरत्वे ।

गुणो । ऐचोरिति। ह्रस्वस्यावकाशः पपावित्यादि । दीर्घोऽकित इत्यस्यावकाशः कृतेऽकृते वा ह्रस्वत्वे पापच्यत इति । डोढौक्यत इत्यादौ तु परत्वादौकारस्य दीर्घ औकार एव प्राप्नोति । ऐकारस्योदाहरणं वेवैत इति । **ह्रस्वत्वे कृत इति** । वक्ष्यमाणोऽभिप्रायः । **गुणश्च**

उ०— **गुणो यङ्लुकोः** । **औकार एवेति** । ततश्चेगन्तत्वाभावाद्गुणस्याप्राप्तिः । **पेपैण्यत इति** । पैणृ गतीत्यादिधातुः । अस्य स्थाने प्रैणृ इत्यन्ये पठन्ति । **तन्मते पेप्रैण्यत इति** रूपम् । वेवेथ्यत इति पाठे विथृ वेथृ याचन इति धातुः । **ऐचोरित्युपलक्षणमिति** भावः । वेवैत इति पाठे धातुश्चिन्तनीयः । कैयटप्रामाण्याद्वैपूधातुं प्रकल्पयन्ति । यङ्लुकि च रूपं वदन्ति । ननु कृतेऽपि ह्रस्वत्वे दीर्घः स्यात्परत्वान्नतु गुण इत्यत आह—**गुणस्त्विति** । दीर्घे नाप्राप्ते गुणारम्भादिति भावः । प्रति-

---

* ७, ४. ५९; ८३. + ७. ४. ९३; ९४. – ३. १. ६; ७. ४. ७९. ×७. ४.९७; ६०.

इदमयुक्तं वर्तते। किमत्रायुक्तम्। ऐचोर्यदि दीर्घसङ्गे ह्रस्वादि परं दीर्घत्वमित्युक्त्वा तत उच्यते न वाऽभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वादिति। तस्याश्च परिभाषायाः प्रयोजनान्यपि नामोच्यन्ते प्रयोजनं सन्वद्भावस्य दीर्घत्वं मान्मृतीनां दीर्घत्वमित्त्वस्य गणेरीत्त्वं हलादिशेषस्येति च। न च सन्वद्भावमपवादत्वाद्दीर्घत्वं बाधते। किं तर्हि। परत्वात्। न खल्वपि मान्मृतीनां दीर्घत्वमपवादत्वादित्त्वं बाधते। किं तर्हि। अन्तरङ्गत्वात्। न खल्वपि गणेरीत्त्वमपवादत्वाद्धलादिशेषं बाधते। किं तर्हि। अनवकाशत्वात्। एवं तर्हीयं परिभाषा कर्तव्याऽभ्यासविकारेषु बाधका न बाधन्त इति। सा तर्हेषा परिभाषा

प्र०—दीर्घस्यापवाद इति दीर्घाभावः। इदमयुक्तमिति। परत्वाद्दीर्घप्रसङ्गमुक्त्वोत्सर्गापवादयोर्बाध्यबाधकत्वाभावः प्रतिपाद्यत इति। उक्तं प्रयोजनमपि किंचिन्न वचनानुरूपमिति पौर्वापर्यविरोधादयुक्तम्। न च सन्वद्भावमिति। सन्वद्भावस्यावकाशोऽचिक्षणदिति। दीर्घत्वस्यावकाशोऽदीदिपदिति। इहोभयं प्राप्नोति। अभ्यीकरादिति। तत्र परत्वाद्दीर्घः प्राप्नोति। न खल्वपीति। सन्प्रत्ययोऽभ्यासदीर्घत्वं च संनियोगेन विधीयत इत्यन्तरङ्गं दीर्घत्वम्। इत्त्वं तु बहिरङ्गम्। सनि परतोऽङ्गाधिकारेऽभ्यासस्याकारान्तस्य विधानात्। न खल्वपीति। आदेः शेषो विधीयतेऽन्त्यस्य त्वीत्त्वमिति नास्त्युत्सर्गापवादभावो हलादिशेषेऽभ्यासस्येत्यवयवषष्ठी। ई च गण इत्यत्राभ्यासस्येति स्थानषष्ठीति भिन्नविषयावीत्त्वहलादिशेषावनवकाशत्वात्तु बाधकर्मीत्त्वं हलादिशेषस्य। निरवकाशा हि विधयः सावकाशान्विधीन्बाधन्ते इति न्यायात्। यदा तु येन

उ०—पाद्यत इतीति। अस्यायुक्तत्वं हेतोर्वैयधिकरण्यात्। उक्तं प्रयोजनमपीति। तदपि वैयधिकरण्यादयुक्तमित्यर्थः। अचिक्षणादिति। अत्राभ्यासस्य लघुत्वाभावाद्दीर्घाप्राप्तिः। अदीदिपदिति। अत्र सन्यत इत्यादिना सनि कस्यचित्कार्यस्याविधानात्सन्वत्त्वाप्राप्तिः। दीर्घस्तु सन्वद्भावविषय उच्यते नतु तेनेति भावः। सन्प्रत्ययोऽभ्यासेति। ननु सन्प्रत्ययकालेऽभ्यासाभावेन कथं दीर्घस्यान्तरङ्गत्वमिति चेन्न। अभ्यासस्याऽऽश्रयकत्वेन तावत्पर्यन्तं दीर्घस्यावस्थानेऽपीत्त्वपर्यन्तमवस्थितौ कार्याभावेन तदपेक्षयाऽन्तरङ्गत्वादिति भावः। नन्वनवकाशत्वमेवापवादत्वमित्ययुक्तमत आह—आदेः शेष इति। नास्तीति। विषयभेदादिति भावः। विषयभेदेऽप्यनवकाशत्वमात्रं बाधानिमित्तमस्तीति तात्पर्यं तदाह—निरवकाशा हीति। उत्सर्गे कृते चरितार्थस्यैवापवादत्वं गणेरीत्त्वं तु नाभ्यासलोपे कृते प्राप्नोति। अलोऽन्त्यस्येत्येकवाक्यतया वाक्यार्थेन णस्यैव तत्प्राप्तेः। एवं चानवकाशत्वं स्पष्टमेवेति भावः। शेषपदलभ्यनिवृत्तिबाधकत्वे भाष्यतात्पर्यादत्र कैयटश्चिन्त्यः। यदा त्विति। एकाभ्यासविषयत्वान्नाप्राप्ते हलादिशेष

कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति **यदयम-कित** इति प्रतिषेधं शास्ति+ ।

दीर्घोऽकितः ॥ ७ । ४ । ८६ ।

अकित इति किमर्थम् । यंयम्यते रंरम्यते । **अकित** इति शक्यमकर्तुम् । कस्मान्न भवति यंयम्यते रंरम्यत इति । नुकि कृते×ऽनजन्तत्वात् । अत उत्तरं पठति ।

अकिद्वचनमन्यत्र किदन्तस्यालोऽन्त्यनिवृत्त्यर्थम् ॥ १ ॥

अकिद्वचनं क्रियते ज्ञापकार्थम् । किं ज्ञाप्यम् । एतज्ज्ञापयत्याचार्योऽन्यत्र किदन्तस्याभ्यासस्यालोऽन्त्यविधिर्न भवतीति* । किमेतस्य ज्ञापने प्रयोजनम् ।

प्रयोजनं ह्रस्वत्वात्त्वेत्त्वगुणेषु ॥ २ ॥

ह्रस्वत्वम् । अवचच्छतुः अवचच्छुः । अत्त्वम् । चच्छृदतुः चच्छृदुः । इत्त्वम् । चिच्छादयिषति चिच्छर्दयिषति । गुणः । चेच्छिद्यते चोच्छुप्यते । नुकि कृतेऽनन्त्यत्वादेते विधयो न प्राप्नुवन्ति÷ ।

प्र०—नाप्राप्त इति न्यायस्तदाऽस्त्येवोत्सर्गापवादभावः । अभ्यासविकारेषु बाधका इति बाधकत्वमनपेक्षितनिमित्तविशेषमाश्रणीयमित्यर्थः । **यदयमिति** । यथा चाकित इति ज्ञापकं तथोत्तरत्र वक्ष्यते ।

दीर्घोऽ० । **नुकि कृत इति** । दीर्घश्रुत्याऽच्परिभाषोपस्थानादचाऽभ्यासस्य विशेषणादजन्तस्याभ्यासस्य दीर्घो विधीयते । स चालोऽन्त्यस्येति वचनादन्त्यस्याचो भवति । **अकिद्वचनमिति** । यद्यचाऽभ्यासो विशेष्यतेऽकित इति प्रतिषेधोऽनर्थकः स्यात् । तस्माद्भ्यासेनाञ्जिशेष्यते । ततोऽभ्यासस्येति विशेषणषष्ठीत्यलोऽन्त्यस्येति नोपतिष्ठत इत्येतज्ज्ञाप्यत इत्यर्थः । **अवचच्छतुरिति** । छो छेदन आत्वं लिट् छाशब्दस्य द्विर्वचनमन्तरङ्गत्वात्तुकि कृतेऽनन्त्यस्याप्यचो ह्रस्वत्वम् । **चच्छृदतुरिति** । उच्छृदिर् दीप्तिदेवनयोः । छृदो द्विर्वचनम् । छे चेति तुकि कृत उरदित्यत्त्वमभ्यासेन ऋवर्णस्य विशेषणात् । छद संवरणे । **चिच्छादयिषतीति** । **परत्वादेते विधय इति** । न

उ०—इत्त्वमारभ्यत इति यद्याश्रीयत इत्यर्थः । **अनपेक्षितेति** । अनपेक्षितो निमित्तविशेषो येन नाप्राप्तत्वपरत्वादिकं येन तदित्यर्थः ।

दीर्घोऽकितः । ननु कृतेऽपि नुक्यन्तरय नस्य दीर्घः स्यादत आह—**दीर्घश्रुत्येति** । अस्यालोऽन्त्यनिवृत्तौ ज्ञापकत्वमुपपादयति—**यद्यचेति** । **अन्तरङ्गत्वादिति** । वर्णाश्रयत्वेनेति भावः । न च तुकि कृतेऽपि हलादिशेषेण तन्निवृत्तौ

+ ७. ४. ८३. ×७, ४, ८५. *१. १. ५२. –६. १. ७३; ७. ४. ५९, ६६; ७९; ८२.

विप्रतिषेधात्सिद्धम् ॥ ३ ॥

नैतानि सन्ति प्रयोजनानि । विप्रतिषेधेनाप्येतानि सिद्धानि । तुक्किकयता-मेते विधय इति किमत्र कर्तव्यम् । परत्वादेते विधय इति ।

तदन्ताग्रहणाद्वा ॥ ४ ॥

अथवा नैवं विज्ञायतेऽभ्यासस्याजन्तस्यर्कारान्तस्याकारान्तस्येगन्तस्येति । कथं तर्हि । अभ्यासे योऽजभ्यासे य ऋकारोऽभ्यासे योऽकारोऽभ्यासे य इगिति। एवं च कृत्वा दीर्घत्वं प्राप्नोति । एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति । किम् । अपवादो नुग्दीर्घत्वस्येति ।

एवं तर्हि सिद्धे सति यदकित इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाऽभ्यासविकारेषु बाधका न बाधन्त इति । किमेतस्य ज्ञापने

प्र०—ह्येतेषूदाहरणेषु तुगन्तरङ्गः । प्रत्ययविशेषनिमित्तत्वात् । अभ्यासस्याभ्यासाश्रयत्वात्तु ह्रस्वादीनाम् । **तदन्ताग्रहणाद्वेति** । ज्ञापकमन्तरेणापि विशेषणविशेष्यभावे कामचारात्कृतेऽपि तुक्येते विधयः सिध्यन्ति । **एवं च कृत्वेति** । ततश्चाकित इति वचनं दीर्घनिषेधाय नतु ज्ञापकाय । **अपवादो नुगिति** । नाप्राप्ते दीर्घे नुक आरम्भात् । **एवं तर्हीति** । ओहाक् त्याग इत्यस्य तु निषेधायाकित इति न भवति । धातुर्ह्ययं कित्त्वभ्यासः । ककारो हि ह्रश्च व्रीहिकालयोरित्यत्र हाङ्हाकोः सामान्यग्रहणार्थः ।

उ०—ह्रस्वः सुलभः । अभ्याससंज्ञाप्रवृत्तिकाले स्थानिद्वारा साक्षाद्वा संनिहितानां हलामेव तेन निवृत्तेः । अत एव नुगत इत्यादि चरितार्थमिति तात्पर्यम् । **नन्वन्तरङ्गस्य** तुको बहिरङ्गह्रस्वादीनां च विप्रतिषेधोऽयुक्तोऽत आह—**नह्येतेष्विति** । **प्रत्ययविशेषनिमित्तत्वादिति** । तुग्विधावभ्यासस्यानाश्रयणेऽपि प्रकृतलक्ष्येऽभ्याससापेक्षत्वं तुकः । अत एव दध्यानयेत्यादौ यणः संयोगान्तलोपं प्रत्यसिद्धत्वं वार्तिककारेणाऽऽश्रितमिति भावः । तुकोऽन्तरङ्गत्वेन विप्रतिषेधात्सिद्धमित्ययुक्तम् । ह्रस्वादीनामाङ्गत्वेन बहिरङ्गत्वादित्याशयेन तदन्ताग्रहणाद्वेति वार्तिकं तव्याचष्टे—भाष्येऽथवेति । अत एव चिच्छासति चाच्छायत इत्यादावन्तरङ्गत्वात्तुक्यभ्यासह्रस्वत्वेत्त्वदीर्घत्वसिद्धिः । ननु ज्ञापकेनाप्यस्यैवार्थस्योक्तत्वात्पुनरुक्तमेतदत आह—**ज्ञापकमन्तरेणेति** । न्यायसिद्धेऽर्थे लिङ्गमनावश्यकमित्यर्थः । **नाप्राप्त इति** । अपवादप्रवृत्तौ नोत्सर्गप्रवृत्तिस्तद्विषय इति भावः । **नन्वेवं धातोः कित्करणं व्यर्थमत आह—ककार इति** । अन्यथा तदनुबन्धकपरिषया ओहाङो न स्यादिति भावः । अत्र सूत्रेऽनुबन्धानुच्चारणादेतत्परिभाषाया विषयाभावेन वनो र चेत्यत्रेव सामान्यग्रहणं ककारं विनाऽपि सूपपादमिति चिन्त्यम् ।

प्रयोजनम् । ऐचोर्यङि दीर्घप्रसङ्गे ह्रस्वाद्धि परं दीर्घत्वमित्युक्तं+ स न दोषो भवति ।

नुगतोऽनुनासिकान्तस्य ॥ ७ । ४ । ८५ ॥

नुकि यंयम्यते रंरम्यत इति रूपासिद्धिः ॥ १ ॥

नुकि सति यंयम्यते रंरम्यत इति रूपं न सिध्यति× ।

अनुस्वारागमवचनात्सिद्धम् ॥ २ ॥

अनुस्वारागमो वक्तव्यः । एवमपीदमेव रूपं स्यात् यय्यम्यते +। इदं न स्यात् । यंयम्यते ।

पदान्तवच्च ॥ ३ ॥

पदान्तवच्चेति वक्तव्यम् । वा पदान्तस्य [८. ४. ५९] इति ।

रीगृदुपधस्य च ॥ ७ । ४ । ९० ॥

रीगृत्वतः संयोगार्थम् ॥ १ ॥

रीगृत्वत इति वक्तव्यम् । किं प्रयोजनम् । संयोगार्थम् । संयोगान्ताः प्रयोजयन्ति । वरीवृश्च्यते परीपृच्छ्यते बरीभृज्यते ।

प्र०– **नुग०** । तपरकरणं भूतपूर्वस्यापि दीर्घस्य निवृत्त्यर्थम् । तेन बाभाम्यत इति नुक् न भवति । **नुकि यंयम्यत इति** । अज्झलृपरत्वादनुस्वारो न प्राप्नोति । **एवमपीति** । नित्यं परसवर्णः प्राप्नोति । विकल्पेन चेष्यते । **पदान्तवच्चेति** । तेन वा पदान्तस्येति परसवर्णविकल्पः ।

उ०–तस्मात् ' गस्थकन् ' ' प्रुसृत्वः ' इति पूर्वोत्तरसाहचर्येण हश्चेति सूत्रेऽप्यव्यनुबन्धकस्यैव ग्रहणं स्यादिति हाकः कित्त्वमिति कैयटाशयः । ज्ञापकपरभाष्यप्रामाण्याद् हाधातोर्यङ्लुकावेव न स्तः । अन्यथा कित्त्वस्य चारितार्थ्येऽपि द्विः प्रयोगत्वाद्द्विर्वचनस्याभ्यासस्य कित्त्वमेवेत्यकिदग्रहणचारितार्थ्यं स्पष्टमेवेत्यपरे । अन्ये तु न विद्यते कियस्मिन्निति बहुव्रीह्याश्रयणात्तत्र चानन्तरस्येति न्यायेन प्रतिपदोक्तपरिभाषया चाभ्यासनिमित्तकित एव ग्रहणमिति न दोषः । अत एव चाच्छायत इत्यादौ माघवाद्युदाहृतो दीर्घः संगच्छत इत्याहुः ।

नुगतो० । **नित्यं परसवर्ण इति** । अनुस्वारस्य ययीत्यनेन । भाष्ये पूर्वत्र परसवर्णघटित उत्तरत्रानुस्वारघटितः पाठः ।

रीगृ० । **रीगृत्वत इति** । अपूर्वमेवेदम् । नतु ऋदुपधस्येत्यस्य स्थाने । उत्तरार्थं तस्याऽऽवश्यकत्वात् ।

+ ७. ४. ८२. × ८. ३. २४. ÷ ८. ४. ५८.

रुग्रिकौ च लुकि ॥ ७। ४। ९१ ॥

मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानम् ॥ १ ॥

मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानं कर्तव्यम्। मर्मृज्यते मर्मृज्यमानासः।

ऋतश्च ॥ ७। ४। ९२ ॥

किमिदमृकारग्रहणमङ्गविशेषणम्। ऋकारान्तस्याङ्गस्येति। आहोस्विदभ्यासविशेषणम्। ऋकारान्तस्याभ्यासस्येति। अङ्गविशेषणमित्याह। कथं ज्ञायते। यदयं तपरकरणं करोति। कथं कृत्वा ज्ञापकम्। न हि कश्चिदभ्यासे दीर्घोऽस्ति× यदर्थं तपरकरणं क्रियते। अथाङ्गविशेषण ऋकारग्रहणे सति तपरकरणे किं प्रयोजनम्। इह मा भूत्। चाकर्ति चाकीर्तः चाकिरति।

किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत्।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः॥

सन्वल्लघुनि चङ्परेऽनग्लोपे ॥ ७। ४। ९३ ॥

प्र०— **रुग्रि०। मर्मृज्यत इति**। रुग्रिकौ च लुकीति रुग्विधीयमानो न प्राप्नोति इति वचनम्।

ऋतश्च। अङ्गविशेषणमिति। यद्यप्यभ्यासविशेषणे भूतपूर्वदीर्घनिवृत्त्यर्थं तपरकरणं तथाऽपि मुख्यकल्पनासंभवे गौणी कल्पना किमित्याश्रीयत इति मत्वा भाष्यकारेणाङ्गविशेषणमृत इत्याश्रितम्। **पचतीति**। लट उपलक्षणं तेन लटि चाकर्त्तीत्यादिरूपाणि किरतिं यो नयेदित्यर्थः। **प्राप्तिज्ञमिति**। तपरकरणादङ्गविशेषणमृत इति। तेन रुगादीनां विषयविभागेन प्राप्तिस्तां जानातीत्यर्थः। **प्रारब्ध इति**। संग्रहणं संग्रहः। साधुशब्दराशिः। स तेन प्रारब्ध इति योग्यतातिशयोद्भावनेन स्तूयते।

सन्वत्। चङ्पर इति बहुव्रीहिणाऽन्यपदार्थो णिराश्रीयते। तेनाचकमतेति केवले चङि सन्वद्भावो न भवति। नहि णिजभ्यतिरेकेणान्यश्चङ्परः संभवति। तेन चङ्परे णौ यल्लघु

उ०— **ऋतश्च। उपलक्षणमिति**। दशलकाराणामपि। चाकरितेत्यादावपि रुगाद्यभावात्। **नयेदिति**। प्रापयेदित्यर्थः।

सन्वल्लघुनि। अग्रिमभाष्योत्थानाय सोपपत्तिकं सूत्रार्थं दर्शयति—**चङ्पर इतीति**। परशब्दसामर्थ्याच्चङ् परो यस्मादिति बहुव्रीहिः। कर्मधारये हि चङीत्येव वदेदिति भावः। भाष्यस्थचङ्परपदेष्वप्येवमेव। अन्यपदार्थश्च सामर्थ्यान्णिरेव **तदाह—णिरिति**। लघ्वक्षरे त्वन्यपदार्थे बहुव्रीह्याश्रयणं परशब्दश्च व्यर्थः स्यादिति भावः। एवं च चङ्परे लघुनीति वैयधिकरण्येन संबन्ध इत्याह—**तेनेति**। **सन्वदिति**।

× ७. ४. ५९.

इह कस्मान्न भवति अजजागरत् । लघुनि चङ्परे इत्युच्यते व्यवहितं चात्र लघु चङ्परम् । इहापि तर्हि प्राप्नोति । अचीकरत् अजीहरत् । वचनाद्भविष्यति । इहापि वचनात्प्राप्नोति । अजजागरत् । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । केन च नाव्यवधानम् । वर्णेन । एतेन पुनः संघातेन व्यवधानं भवति न भवति च । एवमपि आचिक्षणत् अत्र न प्राप्नोति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामित्त्वमिति यदयमत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् [९५] इतीत्त्वबाधनार्थमत्त्वं शास्ति ।

सन्वद्भावदीर्घत्वे णेर्णिच्युपसंख्यानम् ॥ १ ॥

सन्वद्भावदीर्घत्वे णेर्णिच्युपसंख्यानं कर्तव्यम् । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन । किं पुनः कारणं न सिध्यति । णिचा व्यवहितत्वात् । लोपे कृते* नास्ति व्यवधानम् । स्थानिवद्भावाद्व्यवधानमेव । प्रतिषिध्यतेऽत्र स्थानिवद्भावो दीर्घविधिं प्रति न स्थानिवदिति× । एवमप्यनग्लोप

प्र०—तस्मिन्परतोऽभ्यासस्य सन्वत्कार्यं भवति। **इह कस्मादिति**। न क्वचिदभ्यासो लघोरनन्तरः संभवतीति सत्सप्तमीविज्ञानादत्रापि प्रसङ्ग इति भावः । इतरः परसप्तम्याश्रये येन नाव्यवधानमित्याश्रीयत इत्याह—**लघुनीति**। **एवंजातीयकानामिति**। संयोगव्यवहितानामित्यर्थः । **णिचा व्यवहितत्वादिति** । चङ्परे णौ यल्लघु तस्मिन्परतोऽभ्यासस्य सन्वद्भावः । यस्मिंश्चात्र णौ लघुर्नासौ चङ्परः । यस्तु चङ्परो न तस्मिन्परतो लघुः । **दीर्घविधिं प्रतीति** । ननु दीर्घे कर्तव्ये भवति स्थानिवत्त्वनिषेधः । सन्वद्भावे तु प्राप्नोति स्थानिवद्भाव । एवं तर्हि दीर्घभावित्वादिकारोऽप्युपचाराद्दीर्घशब्देनोच्यत इति भाष्यकारस्याभिप्रायः । किंतु

उ०—सन्यत इत्यादियोगत्रयेण विहितमित्यर्थः । नन्वजजागरदित्यादावभ्यासस्य लघ्वक्षरपरत्वाभावात्कथमतिप्रसङ्गोऽत आह—**न क्वचिदिति** । **सत्सप्तमीति** । सामर्थ्यात्तस्मिन्निति परिभाषाया अप्रवृत्तेरिति भावः । अपीपचदित्यादावपि पकारेण व्यवधानमिति तात्पर्यम् । भाष्ये **व्यवहितं चात्र लघु चङ्परमिति**। चङ्परे णौ यल्लघु तदभ्यासस्य व्यवहितमित्यर्थः । चङ्परमिति पाठेऽपि चङ्पदेन तत्परणिर्लक्ष्यत इति न दोषः । अत्स्मृदृत्वरेत्यत्र चङ्परे णाविति वर्तते । तद्धीत्त्वबाधनार्थम् । अन्यथाऽचिक्षणदित्यादाविव तत्रापि सन्वत्त्वाभावादित्त्वाप्राप्तौ तद्वैयर्थ्यं स्पष्टमेवेति बोध्यम् । नन्वव्यवहितणिचमादाय दीर्घोऽस्त्वत आह—**चङ्पर इति** । **सन्वद्भावे त्विति** । एवं चेत्त्वं न स्यादिति भावः । सन्वद्भावदीर्घत्वे इति विषयनिर्देशमध्ये दीर्घत्वरूप विषयनिर्देशप्रत्याख्यानपरतया भाष्यस्य युक्तत्वेन कैयटोक्तं चिन्त्यमेव चिन्त्यम् ।

---

* ६. ४. ५१. × १. १. ५८.

इति प्रतिषेधः प्राप्नोति । वृद्धौ* कृतायां लोपस्तन्नाङ्गलोप्यङ्गं भवति । एवं तर्हीदमिह संप्रधार्यम् । वृद्धिः क्रियतां लोप इति किमत्र कर्तव्यम् । परत्वाद्वृद्धिः । नित्यो लोपः । कृतायामपि वृद्धौ प्रामोत्यकृतायामपि । लोपोऽप्यनित्यः । अन्यस्य कृतायां वृद्धौ प्रामोत्यकृतायामन्यस्य शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । उभयोरनित्ययोः परत्वाद्वृद्धिः । वृद्धौ कृतायां लोपस्तन्नाङ्गलोप्यङ्गं भवति ।

मीमादीनां तु लोपप्रसङ्गः ॥ २ ॥

मीमादीनां तु लोपः प्रामोति× । अमीमपत् ।

सिद्धं तु रूपातिदेशात् ॥ ३ ॥

सिद्धमेतत् । कथम् । रूपातिदेशोऽयम् । सनि यादृशमभ्यापरूपं तत्सन्वद्भावेनातिदिश्यते न च मीमादीनां सन्यभ्यासरूपमस्ति ।

अङ्गान्यत्वाद्वा सिद्धम् ॥ ४ ॥

अथवा ण्यन्तमेतदङ्गमन्यत् । लोपे कृते नाङ्गान्यत्वम् । स्थानिवद्भावादङ्ग-

---

प्र०—मुख्ये दीर्घे संभवति गौणग्रहणमयुक्तमिति चिन्त्यमेतत् । **वृद्धौ कृतायां लोप इति** । एतच्च णौ चङीति सूत्रभाष्येण विरुध्यते । तत्र ह्यगिति प्रत्याहारग्रहणसामर्थ्यादकृतायां वृद्धौ लोप इति प्रतिपादितम् । **मीमादीनां त्विति** । सनि यद्दृष्टमभ्यासकार्यं तदतिदिश्यते मीमादीनां च सन्यभ्यासस्य लोपो दृष्ट इति सन्वद्भावात्प्राप्नोति । **सिद्धं त्विति** । नेह कार्यमतिदिश्यतेऽपि तु रूपम् । लोपश्चाभावः । रूपं लोपो न भवतीति नातिदिश्यते । किंचात्र लोपोऽभ्यासस्येति । अत्रग्रहणं विषयावधारणार्थम् । तेनेसादिविषय एवाभ्यासस्य लोपो भवतीति तदभावे तु सन्वद्भावान्न भवति । **अङ्गान्यत्वादिति** । मीमादीनामङ्गानामभ्यासलोपो

उ०—**एतच्चेति** । ण्यन्ताण्णिविषय एव तत्र तदाश्रितं ण्यल्लोपाविति. पूर्वविप्रतिषेधसत्वाच्च णिविषये वृद्धौ कृतायां लोप इत्याश्रयितुमशक्यमित्यपि बोध्यम् । तस्मादुपसंख्यानमेवाऽऽश्रयणीयम् । **तन्नाङ्गलोप्यङ्गमिति** । तत्रेवाप्येकदेशिनो वाक्यं तस्य तत्रत्यदूषणमपि सूचितमनेनेति बोध्यम् । **सनि यद्दृष्टमिति** । कार्यातिदेशाश्रयेण पूर्वः पक्ष इति भावः । **सन्वद्भावादिति** । सन्वद्भावाल्लोपः प्राप्नोतीत्यर्थः । कार्यातिदेशेऽपि स्वयं परिहरति—**किंचेति** । **तदभावे त्विति** । धातोः सन्वद्भावाभावादिसभावस्य सन्वद्भावेनाभावे त्वित्यर्थः । यद्वा सादौ सनि तद्विधानात्सामान्यातिदेशे विशेषानतिदेशेनोभयोरपि सन्वद्भावेनाभाव इति तात्पर्यम् । मीमादीनामिति चङ्निरूपिताङ्गाभ्यासस्य ह्यनेन सन्वद्भावः । न च तदङ्गसंबन्ध्यभ्यासस्य लोपोऽत्र लोपो

---

* ७. २. ११५. × ७. ४. ५४; ५८.

मत्वात् । कथमजिज्ञपत् । अत्र सन्यपि ण्यन्तस्यैवोपादानमाज्ञप्यृधामीत् [७. ४. ५५] इति । अनङ्गत्वान्न्यत्वाभावादभ्यासलोपः स्यात् । तस्मात्पूर्व एव परिहारः सिद्धः तु स्थानिवदेशादिति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् । पादश्च समाप्तः ।

सप्तमोऽध्यायः समाप्तः ॥

प्र०—विहितः । अयं त्वभ्यासो ण्यन्तानामिति न लुप्यते । अन्ये तु व्याचक्षते--चङ्परे णौ यदङ्गं तदभ्यासस्य सन्वद्भावो विधीयते । णौ मीमादीन्येवाङ्गानि पुकस्तद्भक्तत्वात्तद्ग्रहणेन ग्रहणात्तस्मादङ्गान्यत्वादित्यस्यायमर्थः—येषामङ्गानामच इसादिर्विधीयते तदभ्यासस्यात्र ग्रहणाद्विषयावधारणाल्लोपो नान्येषामितीसादिरहितानाममीमपदित्यादौ च धातोः सन्वद्भावाभावादिसाद्यभावादभ्यासलोपाभावः । अथवा सकारादौ सन्यभ्यासलोपो विहितो न सन्मात्रे । सामान्यातिदेशे विशेषानतिदेशाल्लोपाभावः ॥

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् । पादश्च चतुर्थोऽध्यायश्च सप्तमः समाप्तः ।

उ०—इत्यनेनेति नानेन तदतिदेश इति भावः । **अन्ये त्विति** । चङ्परे णौ यल्लघु इत्यर्थेऽप्यङ्गस्याभ्यास इत्यत्राङ्गं किंनिरूपितं ग्राह्यम् । चङ्निरूपितं णिनिरूपितं वा । तत्रोपस्थितत्वात्प्राधान्याच्च णिनिरूपितमेव गृह्यत इति तात्पर्यान्न पूर्वभाष्यविरोधोऽत्रेति बोध्यम् । एवं चोक्तव्याख्याऽसंगतैवेत्याशयेनाऽऽह—**तस्मादिति** । नान्येषामित्यस्य व्याख्या—इसादिरहितानामिति । इसाद्यभावे हेतुः—धातोः सन्वद्भावाभावादिति । **मीमादीनां** धातूनामच इसादयो विधीयन्ते । न च धातुकार्यं प्रति सन्वद्भावोऽस्ति । अभ्यासकार्यविषयत्वात्तस्येत्यर्थः । एतण्ण्यन्तमङ्गमभ्यासलोपविषयादिसादिविशिष्टादङ्गादन्यदिति भाष्याक्षरार्थः । **सकारादाविति** । सः सीत्यनुर्वतादिति भावः । यद्यपि शब्दं प्राधान्यं णेस्तथाऽपि ण्यन्तप्रकृतिकतिङर्थद्योतकतया चङोऽप्यर्थे प्राधान्यमेवेति तन्निरूपितादङ्गसंबन्ध्यभ्यासस्यैव सन्वत्त्वमिति पूर्वोक्तार्थमेव भाष्यस्याभिप्रेत्य शङ्कते—भाष्ये **लोपे कृत इति** । सिद्धान्त्येकदेश्याह—**स्थानिवद्भावादिति** । चोदक आह—**कथमजिज्ञपदिति** । अत्र ण्यन्ताङ्गाभ्यासस्यैवाऽऽज्ञपीतीच्चविषयसकन्तसंबन्धिनो लोप इति भावः । सिद्धान्त्येकदेश्याह—**तस्मादिति** ॥

इति श्रीशिवभट्टसुतसतीगर्भजन्मगोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकं पादोऽध्यायश्च समाप्तः ॥